श्रीमत्कविकुलतिलक-
श्रीमद्वादिराजश्रीमत्पूज्यचरणविरचिता

युक्तिमल्लिका

विश्वसौरभम्

श्रीमत्सत्यप्रमोदतीर्थश्रीचरणविरचितया

विवृत्या

समलंकृतम्

सम्पादक :— केशव श्रीनिवासाचार्य कट्टि

प्रकाशिका :— श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणी सभा
बेंगलूर—४.

१९९३

श्रीमत्कविकुलतिलक-
श्रीमद्वादिराजश्रीमत्पूज्यचरणविरचिता

युक्तिमल्लिका

विश्वसौरभम्

श्रीमत्सत्यप्रमोदतीर्थश्रीचरणविरचितया

विवृत्या

समलंकृतम्

सम्पादकः :— केशव श्रीनिवासाचार्य कट्टि

प्रकाशिका :— श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणी सभा

बेंगलूर—४.

१९९३

Yuktimallika – Vishwasaurabha

Written by : Shri Vadirajateertha

Comentry by : Shri Satyapramodateertha

Published by : **Shriman Madhva Siddhanta Abhivruddhikarini Sabha,**
Uttaradi Mutt, Bangalore - 560 004

Price : Rs. 70–00

Printed at : **Raja Printers**
S. R. Nagar
Bangalore

॥ श्री दिग्विजयरामो विजयते ॥

'बहुचित्रजगद्बहुधाकरणात्परशक्तिरनन्तगुणः परमः' इत्येवं श्रीभगवत्पादैः विष्णोरनन्तगुणत्वं प्रधानलक्षणं, तथा पञ्चभेदाख्यवैचित्र्योपेतस्य जगतः समासव्यासयोगतो यथासंभवं जन्माद्यष्टककर्तृत्वं च तत्संभावकं लक्षणमिति लक्षणद्वयं समभ्यधायि। अत्र भेदसौरभेणोपासनान्तरङ्गतया भेदानां सत्यत्वं तत्तद्धर्मिस्वरूपत्वं च समस्थापि। भेदसत्यत्वं च तत्तद्धर्मिभूतभावाभावात्मक-विश्वस्य सत्यतामनादाय न पर्यवस्यति। अतो विश्वस्य त्रिकालाबाध्यत्वलक्षणं सौरभं समर्थयितुं विश्वसौरभमिदं प्रवर्तते। तदिदं वक्ष्यते 'जगच्च जगतीनाथो द्वावेतौ नियतौ सदा। अभटो यन्नृपो नष्टो नष्टं राष्ट्रमराजकमि'ति ॥ [श्लो. ३५८]

'अजस्य नाभाविति यस्य नाभेरभूच्छ्रुतेः पुष्करं लोकसारम्' इति भाष्योदाहृतप्रमाणेन प्रमितमिदं विश्वसारं कमलं सौरभसमृद्धिसमुपबृंहितमेव समुज्जृम्भते। अत एव सौरभास्वादनलोलुपेन भृङ्गायितेन कमलासनेन समधिष्ठितम्। तस्मान्नात्र नभोनलिनस्येव मिथ्यात्ववार्ताऽपि अवकाशमासादयतीति तत्त्वं विश्वसौरभेऽस्मिन्समर्थ्यते।

अयमत्र संक्षेपतो विचारक्रमः। आदौ देहलीदीपन्यायेन 'प्रपञ्चो यदि विद्येत निवर्तेत न संशयः' इत्यादिका श्रुतिः भेदपञ्चकस्यानादितां सत्यतां च निरवकाशतया तर्कमुखेन निर्धारयतीति समर्थ्यते। तदनु श्रौतवाक्यानि सृष्टिविषये मायामयत्व-क्रीडार्थत्व-कालचिन्तकादिपक्षाननूद्य सर्वानितान्पूर्वपक्षे निक्षिप्य 'इच्छमात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः' इत्येवं स्वसिद्धान्तं श्रुतिः स्वयं कण्ठोक्त्यैव व्यवस्थापयतीति प्रदर्श्यते। तेन च 'करोति पितृवद्विश्वं पूर्णाशेषगुणात्मकः' इति भगवत्पादीयवचनस्यैव प्रमाणानुगुण्यं तदितरेषां च तद्वैगुण्यं च संप्रकाश्यते। ज्ञाननिवर्त्यत्वान्यथाऽनुपपत्त्या बन्धमिथ्यात्वसिद्धिरिति परोपक्षिप्तार्थापत्तेः सर्वाङ्गविकलतयाऽऽभासता, 'इत्युक्तेर्बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते' इत्यनुव्याख्यानदर्शिताध्वना व्युत्पाद्यते। तेन च परकीयाध्यास-भाष्यस्याकाण्डताण्डवायितत्वं निरूप्यते। 'व्यावहारिकमेतस्मात्सत्यमित्येव

चागतं' इति भगवत्पादीयं वचनमुपजीव्य परमार्थसत एव साधकत्वं सुनिपुणतयाऽवधार्यते ।

अन्ते परोक्तप्रपञ्चबाधानां स्वयं बाधितत्वे सुबहुधा तत्र तत्र विक्षिप्योक्ता युक्तीः संगृह्य, 'दशधा बाधबाधानां प्रमतिर्यस्य चेतसि । दशप्रमतिनामाऽसौ गुरुर्विजयतेतरामि'ति श्लोकेन श्रीमदाचार्याणां मन्त्रवर्णोक्तं यत्पूर्णप्रमत्यपरपर्यायं दशप्रमतिनाम तस्यात्यनुरूपरूपता संप्रकाश्यते ।

तदेवं रसस्निग्धैर्हृद्यपद्यैर्दुर्ज्ञेयानामपि माध्वसिद्धान्तप्रमेयानां दभ्रबुद्धिभिरपि सद्यः सुज्ञेयतां संपादयन्ती प्राज्ञहृद्रोचनी निरवद्या पद्धतिर्ग्रन्थेऽद्भुतेऽस्मिन् प्रद्योतते ।

एवमीदृशयुक्तिजटिलग्रन्थविवृतावस्माकमयं समुद्यमः श्रद्धाजाड्येन, बुद्धिशुद्धये, मन्दोपकृतये चेति पुनरत्र निवेद्यते ॥

यत्सत्याभिज्ञगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीसत्याभिज्ञपादयोः सेवा ॥

श्रीमदुत्तरादिमठाधीशाः
श्रीसत्यप्रमोदतीर्थश्रीचरणाः ।

॥ प्रणतिभिः प्रीणये पूर्णबोधम् ॥

प्रकाशकानां निवेदनम्

अयि भो ! विपश्चिदपश्चिमाः सुविदितचरमेतत् भवतां यत् "सिविल् सूट्, गीताप्रतिपदार्थचन्द्रिका, षट्टिप्पिणीसहिता श्रीमन् न्यायसुधा" इत्यादिग्रन्थानां प्रकटनेन सार्थकीकृतनाम्नी इयं श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणी सभा नूनमनेकेषां विदुषां विद्यार्थिनां तथा लौकिकानां च प्रतिवर्षं विद्वज्जनानां उपन्यासानां समायोजनेन महोपकारभारं नितरां भारयन्तीति ।

सैव प्रकाशनकृतौ निरता श्रीमद्वादिराजतीर्थैः विरचितायाः युक्तिमल्लिकायाः **विश्वसौरभाख्यं ग्रन्थं** श्रीमत् परमपूज्य १००८ श्रीसत्यप्रमोदतीर्थश्रीपादानां विवृत्या समेतं प्राकाश्यतां उन्नेष्यतीति सामोदं निवेदयामः ।

ग्रन्थमिमं प्रकाशयितुं अनुज्ञां दत्वा आशीराशिं च प्रयुज्य महोपकारं कृतवतां श्री १००८ श्री सत्यप्रमोदतीर्थानां चारुचरणनलिनयोः समर्पयामो वयं भूयो भूयो दीर्घदण्डप्रणामान् ।

अस्य ग्रन्थस्य सम्पादकान् श्री कट्टी केशवाचार्यांश्च प्रापयामो भूयांसि नमांसि ।

तथा ग्रन्थस्यास्य प्रकाशने यथाकालं कृतधनसाहाय्यं श्री जयसत्यप्रमोदनिधिं तथा प्राणेशराव् महोदयं च सादरं अभिनन्दयामः ॥

इति

श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणी सभा

उत्तरादिमठ, बेङ्गलूर ४

विश्वसौरभम्

विषयानुक्रमणिका

॥ श्रीः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

युक्तिमल्लिकायाम्

विश्वसौरभम्

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ १ ॥

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ २ ॥

इयं श्रुतिः पञ्चभेदनित्यतासत्यते स्फुटम् ।
सयुक्तिकं साधयितुं प्रावर्तत किल क्रमात् ॥ ३ ॥

॥ श्री दिग्विजयरामो विजयते ॥

रमाया रमणं वन्दे रामं विधिकरार्चितम् ।
श्रीमध्वं जयतीर्थार्यं वादिराजं मुनीश्वरम् ॥ १ ॥

अस्मद्देशिकपादाब्जे नत्वा तत्करुणां श्रितः ।
विवृणोमि यथाबोधं धीशुद्ध्यै विश्वसौरभम् ॥ २ ॥

पूर्वस्मिन् सौरभे चेतनाचेतनात्मकात् विश्वस्माद्भेदः विष्णौ समर्थितः । तस्य विश्वस्य सत्यत्वमत्र समर्थ्यत इति अनन्तरसङ्गतिः स्वस्मिन् एकवाक्यता च । तत्तद्धर्मिस्वरूपस्य भेदपञ्चकस्य अनादित्वसत्यत्वसमर्थने धर्मिभूतविश्वस्यापि तदुभयं सेत्स्यतीत्याशयवान् तत्र श्रुतिद्वयमुदाहृत्य प्रकृतिनयानुव्याख्यानोक्तदिशा तदर्थमाह **प्रपञ्च इति ॥ इयं श्रुतिः** माण्डूकोपनिषद्गता । **पञ्चभेदेति ।** तत्त्वनिर्णयटीकायां उक्तप्रकारेण पञ्चभेदानां प्रकृतत्वमनुसन्धेयम् । अनादिमाययेति पूर्वश्लोके जीवेश्वरयोर्जडेश्वरयोः 'जीवजडयोश्च भेदाः सन्तीति लब्धम् । 'प्रभवः

सर्वभावानां' इत्यत्र सर्वेतिविशेषणेन भावानामितिबहुवचनेन च भावशब्दित-जीवानां मिथो भेदः । आवरणानां जडानामपि मिथो भेदः इति पञ्च भेदाः । **नित्यतेति** । अनादितेति भावः । तदुक्तं अनुव्याख्याने 'सोऽयं सत्यो ह्यनादिश्चे'त्यादि । **स्फुटमिति** । भेदपञ्चकः, अनादिः, भावत्वे सति अविनाशित्वात् । सत्यः, बाधाभावात् इति प्रयोगद्वये व्यभिचारशङ्कानिरासकत्वात् । **किलेति** । अस्यैवार्थस्य 'सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात्' इत्यादिसमाख्याश्रुत्या व्याख्यानस्य प्रसिद्धत्वादिति भावः । **क्रमादिति** । प्रथमश्लोके पूर्वार्धेन अनादित्वं उत्तरार्धेनानादित्वं सत्यत्वं च, द्वितीयश्लोकेन सत्यत्वं इति क्रमात् ॥ १ ॥ २ ॥ ३ ॥

यदाह पञ्चदशतौ वर्गे वेति स पाणिनिः ।
तेन वर्गे निपातौ द्वौ वाशब्देन तथाऽपरम् ॥ ४ ॥

अनुशास्ति न चेत्तत्स्यादव्ययं सव्ययं किल ।
स च प्रयोगबलतः पञ्च इत्येव गम्यते ॥ ५ ॥

सूत्रे वाशब्देन वर्गरूपार्थे पञ्चशब्दः वैदिकप्रयोगबलाज्ज्ञाप्यते इत्याह **यदिति** । तत्र तत्त्वनिर्णयटीकोक्तं "नात्र प्रपञ्चो विश्वविस्तारः । किन्तु जातीयरोऽर्थे पञ्चन्शब्दाड्डुप्रत्ययः । ततश्च पञ्चविधः पञ्चः स च प्रकृष्टत्वात्प्रपञ्चः । प्रकृष्टत्वं च मोक्षाङ्गज्ञानत्वात्" इत्यादिकमनुसन्धेयम् ॥ ४ ॥

सव्ययं व्यर्थम् ॥ **प्रयोगः** वैदिकप्रयोगः 'प्रपञ्चो भेदपञ्चकः' इत्यादिः ॥ ५ ॥

तत्पञ्चानां समूहोऽपि पञ्चोऽभूदनुशासनात् ।
ते च पञ्च प्रसिद्धत्वाद्भेदा वेदान्तवेदिषु ॥ ६ ॥

प्रसिद्धाः "जीवेशयोर्भिदा चैव जीवभेदः परस्परम् । जडेशयोर्जडानां च जडजीवभिदा तथा । पञ्चभेदा इमे नित्याः" इत्यादिप्रमाणेषु ॥ ६ ॥

उपसर्गोऽपवर्गार्थज्ञानत्वाद्विशिनष्टि तम् ।
अतः पञ्चविधो भेदः प्रपञ्चोऽभूद्विचारणे ॥ ७ ॥

तं भेदवर्गं सैषा वागाजुहाव तयाऽऽख्यया।
तत्पञ्चभेदवर्गोऽभूत्प्रपञ्चोऽयं श्रुतौ श्रुतः ॥ ८ ॥

अपवर्गार्थेति। 'पञ्चभेदांश्च विज्ञाय विष्णोः स्वाभेदमेव च। निर्दोषत्वं गुणोद्रेकं ज्ञात्वा मुक्तिर्न चान्यथा' इत्युक्तेः ॥ ७ ॥ ८ ॥

किं च प्रपञ्चरूपं च तं पञ्चं सुप्रपञ्चयन्।
श्लोकः प्रपञ्चमाहेति प्राञ्चः सञ्चोदयन्ति नः ॥ ९ ॥

अप्रसिद्धप्रपञ्चशब्देन भेदानां निर्देशे प्रयोजनमाह **प्रपञ्चरूपमिति**। तत्तद्भेदानां तत्तद्धर्मिस्वरूपत्वात् ॥ ९ ॥

किञ्चेदं द्वैतमित्यत्रैवोत्तरार्धे स्वयं श्रुतिः।
परामृशति यद्भेदं तेनादावपि भेदवाक् ॥ १० ॥

प्राग्भेदाप्रस्तुतौ द्वैतपदेनेह पुनश्श्रुतिः।
कथं तमेवानुवदेदनुक्तमनुवक्ति कः ॥ ११ ॥

किं चोत्तरार्धे 'इदं द्वैतं' इति द्वैतशब्देन भेदस्यानुवादः। इदंशब्देन तत्परामर्शश्च क्रियते। एतदुभयं पूर्वार्धेन भेदस्य प्रकृतत्व एव संभवति। वादानुवादयोः समानविषयकत्वनियमात्। परामर्शश्च प्रकृतस्यैवेति नियमाच्च। अतोऽपि प्रपञ्चशब्दोऽयं भेदपर एवेत्याह **किं चेत्यादिभिः** ॥ १० ॥ ११ ॥

वादानुवादावेकस्येत्याहुः प्राहुणिका अपि।
इदमित्युदितार्थस्य परामर्शे तु किं पुनः ॥ १२ ॥

प्राहुणिका इति॥ कन्यापक्षीयैः 'वृणीध्वमि'त्युक्तायाः कन्याया एव वरपक्षीयैः 'वृणीमहे' इत्यनुवाददर्शनादिति भावः ॥ १२ ॥

अतः प्रपञ्चभेदोऽभूच्छ्रुतेर्हृदयशोधने।
व्याख्यां तत्ख्यापयेद्दिक्षु भेर्याचार्यशिरोमणेः ॥ १३ ॥

व्याख्यां 'तस्मादनादिरेवायम्। प्रकृष्टः पञ्चविधः भेदः प्रपञ्चः' इत्येवं तत्त्वनिर्णयोक्ताम्। भेरी श्रुतिसंवादित्वादियमेव व्याख्या ग्राह्या इत्येवंरूपा ॥१३॥

त्वं च द्वैतं भिदां ब्रूषे तथाऽद्वैतं तवाऽभिदा।
अर्थात्प्रपञ्चोऽपि भेदः किं शब्दं तु प्रमुञ्चसि ॥ १४ ॥

अर्थात् भेदवाचिद्वैतशब्दसमानाधिकरणेन इदंशब्देन परामृष्टत्वात् ॥ १४ ॥

वागीश एव वागर्थावेकीकुर्यान्न चापरः।
न चेद्विकल्पशब्देन भेदमेव कथं बुधाः।
प्रावक्ष्यन्नुत्तरश्लोके नावक्ष्यन्यदि तं पुरा ॥ १५ ॥

एकीकर्तुं प्रपञ्चः, द्वैतं, विकल्पः इति शब्दत्रयस्य भेद एक एवार्थः इति बोधयितुम् ॥ १५ ॥

समाख्या हि महाव्याख्या प्रायपाठे तु किं पुनः।
अर्थान्तरायुक्तितश्च भेदार्था वाङ्न संशयः ॥ १६ ॥

समाख्या "प्रपञ्चो भेदपञ्चकः' इत्येवंरूपा। **अर्थान्तरं** प्रपञ्चशब्दस्य विश्वमिति, विद्यते इत्यस्य विद्यमानं सत्यं इत्यर्थान्तरम्। **अयुक्तितः** उत्तरश्लोकोक्तरीत्या ॥ १६ ॥

यदि प्रपञ्चो विद्येत निवर्तेत तदा किल।
इममर्थं महाऽनर्थकरं कः पण्डितो वदेत्।
ब्रह्मैवोन्मूलयेद्यस्मात्तर्कोऽयमतिकर्कशः ॥ १७ ॥

इदानीं 'प्रपञ्चो यदि विद्येत भवेत उत्पद्येत तर्हि निवर्तेत। न च निवर्तन्ते। तस्मादनादिरेवायं' इति तत्त्वनिर्णयोक्तदिशा तर्कस्वरूपं विविनक्ति। तत्र विद्यतेर्विद्यमानत्वरूपास्तित्वार्थकत्वे पराभिमते बाधकमाह **यदीति**। **महाऽनर्थकरं** ब्रह्मणोऽपि बाध्यत्वापादकम् ॥ १७ ॥

बाधो निवृत्तिशब्दार्थो विद्यमानत्वमद्भुतम् ।
व्याप्नोति बाध्यतां नात्र संशयः किल धीमताम् ॥ १८ ॥

अतः विद्यमानत्वबाध्यत्वयोः व्याप्तिः परोक्ता अपहसनीयेत्याह **अद्भुतमिति किलेति** च ॥ १८ ॥

एवं च ब्रह्मणो हर्त्री किं न व्याप्तिरियं तव ।
विपर्ययो महानासीत्तर्कस्यास्य विपर्यये ॥ १९ ॥

तर्कस्य विपर्यये न च बाध्यते अतो न विद्यमानं सत्यं इत्येवं विपर्ययपर्यवसाने । **विपर्ययः** । ब्रह्मणोऽसत्यत्वम् ॥ १९ ॥

अबाध्यत्वे न नास्तित्वं यन्नास्तिकमतेऽपि न ।
अतस्सर्वैश्च धात्वर्थो वाच्योऽन्योऽत्र मयैव न ॥ २० ॥

उत्पत्तिनाशौ यद्व्याप्तौ निवृत्तिश्च विनाशनम् ।
अतो व्यापकशक्त्यैव व्याप्योत्पत्तिरिहागता ॥ २१ ॥

नास्तिकमते शून्यमते । तेनापि अबाध्यस्य शून्यस्य तत्वरूपताऽभ्युपगमात् । अतः उत्पत्तिर्नाश इति च क्रमेण अर्थः धात्वोर्वाच्य इत्याह **उत्पत्तिरिति । शक्त्येति** यद्भावत्वे सति उत्पत्तिमत् तद् विनाशवत् इत्येव व्याप्तेः सत्त्वात् ॥ २१ ॥

यतः प्रागसतस्सत्तैवोत्पत्तिर्धातुतोऽपि तत् ॥ २२ ॥

विदधातोरुत्पत्त्यर्थकत्वं त्रेधोपपादयति **यत** इत्यादिभिः । सत्ता च कादाचित्की विवक्षिता इति तत्त्वनिर्णयटीकोक्तिमनुरुध्याह **प्रागिति** ॥ २२ ॥

यथा सत्तार्थधात्वर्थो भूतिर्जन्म विदां मते ।
तथेह सत्तार्थधातोरर्थोऽप्युत्पत्तिरेव हि ॥ २३ ॥

धात्वर्थः भूधात्वर्थः। जन्म विदामिति पदच्छेदः। **विदां** मीमांसकानाम्। तदुक्तं न्यायामृते 'तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः। प्रयोजकक्रियामाहुर्भावनां भावनाविदः' इति। **तथा** तत्समानार्थकविदधातोः ॥ २३ ॥

तस्मादुत्पत्तिरत्रार्थो यद्धात्वर्थोऽप्यनेकधा ॥ २४ ॥

'अनेकार्थत्वाद्धातूनां विद्यतिरेवोत्पत्तिवाची'ति तत्त्वनिर्णयटीकामनुरुध्याह **यदिति** ॥ २४ ॥

एवं च नित्यजडगो जीवगो ब्रह्मगश्च यः।
भेदवर्गः प्रपञ्चाख्यो यद्युत्पद्येत तर्ह्यसौ ॥ २५ ॥

विनश्येन्न च नाशोऽस्ति तस्मान्नोत्पद्यते च सः।
इति तन्नित्यतामाह श्रुतिर्नास्त्यत्र संशयः ॥ २६ ॥

नित्यजडग इति। अनादिप्रकृत्याकाशादिधर्मिकः। **भेदवर्गः** जीवानां जडानां च परस्परं भेदमादाय पञ्चविधः। **नित्यतां** अनादिताम् ॥ २५ ॥ २६ ॥

इत्यर्धे नित्यतामुक्त्वा वक्त्यर्धे सत्यतां च सा ॥ २७ ॥

एवं पूर्वार्धेन भेदस्य सादित्वं निरस्य उत्तरार्धेन मायामात्रमित्यादिना मिथ्यात्वं निरस्यते इत्याह **इतीति** ॥ २७ ॥

मात्रा लेशस्तद्विहीनस्स्यादमात्रो विवेकिनाम्।
मायालेशोज्झितं वस्तु मायाऽमात्रं ततोऽभवत् ॥ २८ ॥

उक्तद्वैतं च मायाया लेशतोऽप्युज्झितं किल।
अतस्तद्ब्रह्मवद्द्वैतं सच्चाभूत्परमार्थतः ॥ २९ ॥

मायामात्रमित्यस्य 'मितं त्रातं मायाख्यहरिविद्यया' इत्यनुव्याख्यानोक्तेऽर्थे सत्येव मायाशब्दस्य पराभिमतमर्थमुपेत्याप्याह **मात्रेति**। अनादित्वात् ब्रह्मवदेव निरुपादानकत्वात्, अविद्योपादानकत्वरूपमिथ्यात्ववार्ताया मात्रयालेशतोऽप्यत्रा-संभावितत्वादित्याह **मायालेशोज्झितमिति** ॥ २८ ॥ २९ ॥

माया हि कल्पनामूलं तस्या लेशोऽपि यस्य न।
तदद्वैतं परमं तत्त्वं किं (नासी)न स्याच्छब्दशोधने ॥ ३० ॥

हीत्यनेन भ्रमोपादानत्वमविद्याया लक्षणमिति तन्मतप्रसिद्धिं द्योतयति ॥ ॥३० ॥

मिथ्यात्वार्थं तु पूर्वोक्तं नित्यत्वं सहते न ते।
उत्तरश्लोकतर्कोऽपि न्यक्करोत्यतिकर्कशः ॥ ३१ ॥

यत्किञ्चित्कालवृत्तित्वमपि कालत्रयनिषेधप्रतियोगित्वरूपमिथ्यात्वं यदा विरुणद्धि तदा पूर्वार्धोक्तं भेदस्यानादिनित्यत्वं तु मिथ्यात्वं न सहते इति किं वक्तव्यमित्याशयेनाह **मिथ्यात्वेति**। **अतिकर्कशः** कल्पकाभावात् कल्पितत्वाभावः इति सुदृढव्याप्तिकः ॥ ३१ ॥

एवं सा द्वैतसत्यत्वं साधयित्वा सहेतुकम्।
अद्वैतस्सर्वभावानामित्याद्युक्तिं स्वरोधिनीम्।
अर्थान्तरे नेतुकामा पुनराह श्रुतिः किल ॥ ३२ ॥

'अद्वैतं परमार्थतः' इति श्रुतेरापातार्थविरोधं श्रुतिः स्वयमेव परिहरतीत्याह **पुनरिति** ॥ ३२ ॥

यदद्वैतं तत्र तत्र श्रूयते स्मर्यतेऽपि वा।
सर्वोत्तमत्वात्परममर्थं हरिमपेक्ष्य तत् ॥ ३३ ॥

परमार्थशब्दो योगेन परमश्चासावर्थश्चेति व्युत्पत्त्या स्वतन्त्रं हरिमाह। न पुनः परपरिभाषामात्रकल्पितं पारमार्थिकसत्यरूपं सत्प्रभेदम्। 'स्वतन्त्रं परमार्थाख्यं' इति

स्मृत्यैव निरुक्तत्वेन यववराहाधिकरणन्यायेन शास्त्रे शास्त्रीयार्थस्यैव ग्राह्यत्वात् । अवयवशक्तेः क्लृप्तत्वेन प्रोक्षण्यधिकरणन्यायेन समुदायशक्तिकल्पनाऽनवकाशात् । पञ्चमी च ल्यब्लोपनिमित्ता । अतः स्वतन्त्रो हरिरेक एव इत्यर्थः फलित इत्याह **यदित्यादिना**। [न्याया. १-३५ प. २७७] उक्तं चानुव्याख्याने 'उत्तमोऽर्थो हरिस्त्वेकस्तदन्यन्मध्यमाधमं' इति ॥ ३३ ॥

यतो ल्यब्लोपतः प्राप्ता पञ्चम्यस्ति स्थले स्थले ।
अतस्साऽर्थान्तरं ब्रूयादित्युक्त्वा विरराम च ॥ ३४ ॥

स्थले स्थले इति । आसनात्प्रेक्षते, श्वश्वा जिह्रेति इत्यादौ ॥ ३४ ॥

पुनः कुवादि(भिः)नां प्रोक्तकुतर्कच्छेदनायसा ।
तर्कमुद्रामुपाश्रित्य प्रतिब्रूते परान्किल ॥ ३५ ॥

एवं भेदस्य भास्करादिमतप्राप्तं सत्योपाधिकृतत्वं निरस्य मायावादप्राप्तमारोपितत्वं निरस्यति श्रुतिरित्याह **पुनरिति**। **कुतर्कः** भेदः कल्पितः भेदत्वात् चन्द्रभेदवत् इत्येवंरूपः ॥ ३५ ॥

विकल्पनामा भेदोऽयं वस्तुवैचित्र्यकल्पनात् ।
संवृत्या मायया वाऽज्ञानेन वा येन केनचित् ॥ ३६ ॥

'विकल्पः प्रकृतो भेदः यदि केनचिदज्ञानादिना कल्पितः स्यात्तर्हि चन्द्रभेदवन्निवर्तेत । बाध्येत । न च बाध्यते । तस्मान्न कल्पितः । किं तु सत्य एव' इति सुधोक्तिमनुरुध्याह **विकल्प इति**। तथा च अनुमानस्य बाधितत्वमुपाधिरित्युक्तं भवति ॥ केनचिदित्यस्यार्थमाह **संवृत्येत्यादिना**। शून्यवादिमतानुसारेण संवृत्येति। अद्वैतमतानुसारेण मायया अज्ञानेन वा। मायया अम्बरादिकं व्यावहारिकम् । अज्ञानाख्याविद्यया दुःखादिकं प्रातिभासिकं इति विवेकः । यद्वा येन केनचिदिति कल्पकाभावोक्तिः । तथा हि कल्पकं न चिन्मात्रम् । तस्य कल्पनोपयुक्तदेहेन्द्रियाद्यभावात् । न जीवः स्वयं कल्पितत्वात् ॥ ३६ ॥

यदि कल्पित एव स्याद्बाधाख्यविनिवृत्तिमान्।
तदा स्यादुपसर्गोऽसौ यतो बाधमसाधयत् ॥ ३७ ॥

यत्प्राचीनोपसर्गोऽत्र नञर्थोऽभाववाक्ततः।
विशेषेण निवृत्तिर्या सोऽत्यन्ताभाव एव हि ॥ ३८ ॥

विनिवृत्तिशब्दस्य बाधः इत्यर्थं साधयति **असौ उपसर्गः**। 'वि' इत्येवंरूपः। **प्राचीनः** नीत्युपसर्गः। **अभाववाक्**। अभावं वक्तीति, अभाववाची। विशब्दः विशेषवाची। विशेषश्च कालत्रयवृत्तित्वम्। तथा च विनिवृत्तिः अत्यन्ताभावः॥ ॥३७॥ ३८॥

न च बाधोऽस्य नित्यस्य तेनासौ कल्पितोऽपि न।
इति सा भेदसत्यत्वद्रोहिणां प्राहिणोद्भयम् ॥ ३९ ॥

नित्यस्य पूर्वश्लोके साधितरीत्या अनादिनित्यस्य। एवं मायामात्रं इत्युक्तेः ईश्वरस्वरूपप्रज्ञप्तिरूपमायाविषयत्वात्। ईश्वरेण सर्वदावर्तमानतयाऽनुभूयमानत्वात् इति यावत्। "यदि ईश्वरेणानुभूयमानोऽपि बाध्येत तर्हि ईश्वरस्य भ्रान्तत्वं प्रसज्येत। बाध्यशुक्तिकारजतद्रष्टृवत्। न चेश्वरस्य भ्रान्तत्वं युज्यते' इति वादावल्युक्तमत्रानुसन्धेयम्॥ ३९॥

अथवा भेदतत्त्वेऽस्मिन्भिन्नाभिन्नादिरूपकः।
विकल्पो यदि केनापि कल्पितः स्यात्कुबुद्धिना॥ ४०॥

'किं चैवं ब्रह्मण्यपि प्रपञ्चाद्भिन्नं अभिन्नं वेत्यादि विकल्पदोषाः समा एव' इति तत्त्वोद्योतोक्तं श्रुत्यारूढं दर्शयति **अथवेति**॥ ४०॥

अद्वैते तस्य दुस्तत्वे विनिवर्तेत तर्हि सः।
विनिवृत्तिं यतः प्राहुः परावृत्त्यागतिं बुधाः ॥ ४१ ॥

इति वाऽर्थमभिप्रेत्य दुस्तर्कं धिक्चकार सा।
अतः खण्डनकारस्य खण्डयामास खण्डनम्॥ ४२॥

अद्वैते निर्विशेषे ब्रह्मणि ॥ ४१ ॥ ४२ ॥

बोधोऽयं तर्हि सर्वस्य कुतो नासीदितीरिते ।
तत्र हेतुमुपादातुं पुनः प्रावर्तत श्रुतिः ॥ ४३ ॥

"तदेतदुपदेशात् श्रुत्वाद्यनुसारित्वात् । अयमेव सतां वादः । यो भेद-सत्यत्वादिविषयः । द्वैतं न विद्यते इति तु तत्त्वेऽज्ञाते सति भवति । अतो दुर्वाद इति" इति सुधोक्तिमनुरुध्याह **बोध इति । अयं** श्लोकद्वयेन निर्णीतः । **हेतुं** 'तमसा मुष्टदृष्टयः' इत्यनुव्याख्यानोक्तम् ॥ ४३ ॥

गुरूपदेशाज्ज्ञातेऽर्थे सोऽयं वादस्सतां हृदि ।
स्थिरीभवति तच्चित्ते नाद्वैतं विद्यते किल ॥ ४४ ॥

गुरुः भेदज्ञानी सम्यग्लक्षणसंपन्नः । "प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ" इति श्रुतेः । **उपदेशः** सुप्रसन्नेन कृतः । **स्थिरीभवति** सफलं भवति । 'सम्यग्लक्षणसंपन्नो यद्द्यात्सुप्रसन्नधीः । शिष्याय सत्यं भवति तत्सर्वं नात्र संशयः' इत्युक्तेः । **ज्ञाते** गुरूपदेशानुसारेण तत्त्वे ज्ञाते सति । अद्वैतं इति पदच्छेदमाश्रित्याह **अद्वैतं इति** ॥ ॥४४ ॥

गुरूपदेशात्तत्वार्थे त्वज्ञाते स्वस्वबुद्धिभिः ।
यस्मिन्कस्मिंश्चिदर्थे च ज्ञाते सति दुरात्मनाम् ॥ ४५ ॥

तेषां हृदि तमो दातुं सोऽयं वादस्तु तिष्ठति ।
यः पूर्वखण्डने प्रोक्तो न द्वैतं विद्यते किल ॥ ४६ ॥

अज्ञाते द्वैतं न विद्यते इति पदच्छेदमाश्रित्य श्रुतिं "द्वैतं न विद्यते इति तस्मादज्ञानिनां मतं" इति समाख्यावाक्यानुसारेणार्थान्तरपरतया योजयति **गुर्विति** 'पुंसां हि मतयो गुणभेदतः । पृथक् पृथक् प्रजायन्ते तमसैवान्यथामतिः' इत्यनुव्याख्यानानुसारेणाह **दुरात्मनामिति** ॥ ४५ ॥ ४६ ॥

इत्यर्थद्वयमप्युत्तरार्धेऽसौ वाग्जगौ किल ।
भेदसौरभसर्वस्वं नित्यं सत्यमतो भवत् ॥ ४७ ॥

अर्थद्वयं सात्विकानां भेदज्ञानं, तामसानां अभेदज्ञानं इत्येवंरूपम् । **नित्यमिति** । निवर्तेतेत्यस्य इष्टापादनत्वपरिहारः तत्त्वनिर्णयटीका-तद्भावबोधादितोऽवसेयः । तथा हि । 'यदि जडजीवभेदो नश्येत् तदा जीवस्य जडत्वापत्त्या मोक्षशास्त्रवैयर्थ्यम् । यदि जडेश्वरभेदो नश्येत्तदा ईश्वरस्य जडत्वापत्त्या सत्यं ज्ञानमित्यादिशास्त्रस्य विरुद्धार्थत्वापत्तिः । यदि जीवानां परस्पर भेदो नश्येत् तर्हि परस्परमैक्यापत्त्या परस्परगतसुखदुःखाद्यनुसन्धानापत्तिः । यदि जीवेश्वरभेदो नश्येत् तदेश्वरस्य वा दुःखाद्यनुभवः, जीवस्य वा सार्वज्ञाद्यनुभवः स्यादिति यथायथं श्रुत्यनुभवरूपप्रमाणविरुद्धार्थस्वीकारापत्तिरूपानिष्टापत्तिः' ॥ ४७ ॥

धर्मस्य धर्मिमूलत्वाज्जीवनित्यजडात्मकम् ।
विश्वसौरभसर्वस्वमपि तादृगभूद्बलात् ॥ ४८ ॥

धर्मस्य भेदस्य । **धर्मिमूलत्वात्** धर्मिस्वरूपत्वात् । **जीवेति** जीवाश्च नित्यजडाश्च तदात्मकम् । **विश्वसौरभसर्वस्वं** ईशावास्यत्वात् सुरभि सर्वं विश्वम् । **तादृग्** सत्यं नित्यं च ॥ ४८ ॥

एवञ्च प्रकृतेर्नित्यसत्यभावे समर्थिते ।
तदुपादानकं सर्वं सत्यमासीदिदं जगत् ॥ ४९ ॥

सर्वं जडरूपं प्राकृतम् । **सत्यं आसीत्** । उपादानं सत्यं, उपादेयं मिथ्या इत्यस्य व्याहतत्वात् इति भावः ॥ ४९ ॥

अतः श्रुतिरियं रम्या देहलीदीपवद्बभौ ।
यतस्स्थानद्वयस्यार्थमुदमीमिलदुच्चकैः ॥ ५० ॥

उदमीमिलत् प्रकाशयामास । अन्तरङ्गसाधनपरं आवृत्त्यधिकरणं फलनिरूपणौपयिकं चेति यथा फलाध्यायोपक्रमे निवेशितं तथाऽस्या अपि श्रुतेः उभयसौरभोपकारिण्या अत्र चर्चा श्लिष्टेति भावः ॥ ५० ॥

श्रीमध्वमुनिचन्द्रस्य ज्योत्स्ना कृत्स्ना जगत्त्रये।
मद्धृद्व्योम्न्यस्य सद्धाम्नि व्याप्तेयमपि चन्द्रिका ॥ ५१ ॥

स्वहृदये श्रीमध्वमुनिचन्द्रचद्रिकायाः कृपापूर्वं सन्निहितत्वादेवेदं व्याख्यानकौशलं प्राप्तमिति तन्महिमानं संस्मरति **श्रीमध्वमुनीति**। **जगत्त्रये** इत्युपलक्षणम्। 'अपि त्रिलोक्या बहिरुल्लसन्ती' इत्युक्तेः ॥ ५१ ॥

दयाशीलेन कोलेन पालेनातिबलीयसा।
मह्यै द्रुह्यन्मदान्मुह्यंस्तस्करः प्रतिचस्करे ॥ ५२ ॥

समुद्रे निमज्जनेन भूलोकस्य तिरोभावं प्रापितवन्तं हिरण्याक्षं वराहो भूत्वा सञ्जहार। स हरिर्ब्रह्मातिरिक्तस्य सर्वस्यात्यन्ताभावं समीहमानानां मायिनां दौर्जन्यं कथं न भर्जयेदित्याह **दयाशीलेनेति**। **प्रतिचस्करे** संहृतः ॥ ५२ ॥

तिरो(धान)भावकृतो हन्ता सोऽत्यन्ताभावकारिणम्।
रक्षोरूक्षेभहर्यक्षो न रक्षेदिति मे मतिः ॥ ५३ ॥

हन्ता तमःप्रापयिता। **अत्यन्ताभावकारिणं** मिथ्यात्ववर्णनेन विश्वस्वरूपापलापिनम्। **न रक्षेत्** तमसि क्षिपेदेवेति भावः। तेन 'स व्यासरूपो भगवान् क्षमाब्धिः' इत्युक्तिः प्रौढिवाद एवेति भावः। (भेदप.ब्र.सू. प.) ॥ ५३ ॥

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ ५४ ॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ५५ ॥

इति गीतासु हरिणा जगन्मिथ्यात्ववादिनाम्।
जगतः क्षयकृत्ता च जगतोऽहितता तथा ॥ ५६ ॥

उक्ता सोऽपि जगत्कर्ता हर्ता चोत्पथवर्तिनाम्।
अतोऽतिभीतो यातोऽहं मतं सत्यत्ववेदिनाम् ॥
वेदानुमोदिनां वैरिभेदिनां तत्त्ववादिनाम् ॥ ५७ ॥

मिथ्यात्ववादस्य निरवकाशस्मृतिविरोधमाह **असत्यमिति**। न चात्र असत्यशब्दः अत्यन्तासत्वपरः। अत्यन्तासत्वाभ्युपगन्तुर्वादिन एवाभावात् आहुरित्यस्यायोगात्। शून्यवादिभिरपि सांवृतसत्यत्वाङ्गीकारात्॥ 'आसुरीं पार्थ मे श्रुणु' इत्युपक्रमात् 'ततो यान्त्यधमां गतिं' इत्युपसंहारात् च अत्र मिथ्यात्वमतनिन्दा ज्ञायते। यद्वा 'न निरोधो न चोत्पत्ति'रिति गौडपादकारिकाव्याख्याने परेणैव 'सतो हि घटादेरुत्पत्तिर्विनाशो वा दृष्टः। नासतः शशविषाणादेः' इति जगतः शशविषाणदृष्टान्तोक्तिपूर्वकं अत्यन्तासत्त्वस्य भाषितत्वादियं निन्दा मायावादिविषयैवेति निर्धार्यते।**अतिभीत इति**। परतत्वप्रद्वेषपरत्वेन अस्य वादस्य महातमोहेतुत्वेन महातमोऽधिकरणे निर्णीतत्वात्॥ ५४॥ ५५॥ ५६॥ ५७॥

भवतीति हि भूरेषा तदभावः कथं वद ॥ ५८॥

भूशब्दस्यैव विद्यमानार्थकत्वात् भुवः अभावः अविद्यमानतेति शब्दत एव व्याहतमित्याह **भवतीति**॥ ५८॥

देहाभावे कथं वाक्ते तस्य सत्त्वेऽपि सा कथम्।
निमित्तं कालकर्मादिकर्ता नारायणः प्रभुः ॥ ५९॥

उपादानं तु सैवैका प्रकृतिस्त्रिगुणात्मिका।
इति श्रुतिपुराणाद्यैर्जगतस्सृष्टिरीर्यते ॥ ६०॥

वाक् उच्चारणक्रिया। **कथं** कारकाभावात्। देहेन्द्रियादेरेव तत्कारकत्वात्। **सा** सर्वं मिथ्येति वाक्। देहादावेव प्रामाण्यस्य भग्नत्वात्। सृष्ट्युक्त्याऽपि जगतः सत्यत्वं सिद्ध्यति इत्याह **निमित्तमित्यादिना**। सृष्टेरुपादानगोचर-चिकीर्षाकृतिपूर्वकत्वनियमादिति भावः। **त्रिगुणात्मिका** गुणत्रयोपादानम्। 'सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः' इत्युक्तेः॥ ५९॥ ६०॥

मायाख्या प्रकृतेरस्ति तेन मायामयाभिधा ।
प्राकृताख्या च जगतः प्रोच्यते तत्र तत्र हि ॥ ६१ ॥

माया इति आख्या । 'मायेति प्रकृतिं विद्यात्' इति श्रुतेः । एवं **प्रकृतेः** भगवदिच्छायाः । 'प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यते' इति प्रकृतिनये भाष्योक्तेः । **तेन** जडप्रकृत्युपादानकत्वेन भगवदिच्छानिमित्तकत्वेन च । **तत्र तत्र हि** 'मायामये वासनया शयानः' इति भागवतादौ ॥ ६१ ॥

ब्रह्मज्ञाननिवर्त्यत्वमेषां न श्रूयते क्वचित् ।
अतो मिथ्यात्वमप्येषामाग्रहादेव केवलम् ॥ ६२ ॥

एषां गुणत्रयस्य, भगवतः ज्ञानेच्छादिगुणानां, कालकर्मादीनां च ॥ ६२ ॥

मयाध्यक्षेण प्रकृतिस्सूयते स चराचरम् ।
इति प्रकृतिकार्यत्वं गीतोक्तमनुसंस्मर ॥ ६३ ॥

सत्यत्वे गीतां प्रमाणयति **मयेति**। अनेन वाक्येन सत्यत्वसिद्धिः श्रीसत्यध्यानतीर्थविरचिते सभासारसंग्रहे (भाग ५) द्रष्टव्या ॥ ६३ ॥

अज्ञानोपादानकत्वाभावात्तन्न मृषा जगत् ।
अनाद्यनन्तकालेषु नैवास्योपरमः किल ।
कथं मिथ्यात्वमस्य स्याद्भ्रान्तिसिद्धत्वमेव वा ॥ ६४ ॥

एवमेतदनाद्यं तं भूतसङ्घातकारकम् ।
अनादिनिधनं लोके चक्रं संपरिवर्तते ॥ ६५ ॥

तत् सत्यकारणजन्यत्वात् । **उपरमः** स्वरूपेण निषेधः । **अस्य** प्रमाणसिद्धस्य ॥ ६४ ॥ ६५ ॥

इति भारतवाक्येन ह्यनाद्यन्तत्वमुच्यते ।
अनन्तत्वादबाध्यं च जगद्ब्रह्मवदेव हि ॥ ६६ ॥

अनन्तत्वादित्युपलक्षणं अनादित्वादित्यपि ग्राह्यम्। तदुक्तं वादावल्यां 'अनादिभावरूपस्य विज्ञानविलापनासंभवाच्च ब्रह्मवदि'ति ॥ ६६ ॥

अतोऽवसानं तन्नित्ये न ब्रह्मणि जगत्यपि।
एकं स्वरूपतो नित्यमन्यन्नित्यं प्रवाहतः ॥ ६७ ॥

एकमिति आकाशवर्णादिकं व्याप्तं वस्तुजातं स्वरूपत एव नित्यम्। 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततमि'ति गीतोक्तेः ॥ ६७ ॥

स्वप्रमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥ ६८ ॥

श्रुत्यैवानूद्य स्वयं खण्डितत्वेन न मिथ्यात्वमित्याह **स्वप्रेत्यादिना। विकल्पिता** भ्रान्त्या कल्पिता ॥ ६८ ॥

मिथ्यासृष्टिकथा येयं साऽन्येषां कल्पना किल।
इत्यन्यमतमाक्षिप्य श्रुतिस्स्वमतमाह च ॥ ६९ ॥

आक्षिप्य निराकृत्य ॥ ६९ ॥

इच्छामात्रं प्रभोस्सृष्टिरिति सृष्टौ विनिश्चिताः।
स्वेच्छयैव प्रभुस्सर्वं सृजतीशो न मायया ॥ ७० ॥

सिद्धान्तमाह **इच्छेति। विनिश्चिताः** विमर्शपूर्वकं निश्चयवन्तः। **मायया** अनिर्वचनीयया ॥ ७० ॥

विशिष्य निश्चितं सृष्टौ येषां तेषां त्विदं हृदि।
इति स्तुत्योत्तरार्धोक्तमेव स्वमतमाह सा ॥ ७१ ॥

सृष्टौ निश्चयवन्तो ये पक्षमेनं वदन्ति ते।
सन्दिग्धमनसस्त्वन्यान्पक्षानाचक्षते किल ॥ ७२ ॥

यतः पक्षान्तरे सर्वत्रान्य इत्याह सा श्रुतिः।
कालचिन्तकपक्षत्वमेकपक्षे जगाद च ॥ ७३ ॥

सिद्धान्तार्थे तात्पर्यज्ञापकं अर्थवादमाह **स्तुत्येति**। परपक्षे निन्दां दर्शयति **सन्दिग्धेति**। प्रमाणनिर्णीतार्थनिश्चयहीनेत्यर्थः। 'व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन। बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनां' इति गीतोक्तेः ॥ ७१ ॥ ॥७२ ॥ ७३ ॥

अतोऽपि पक्षास्ते सर्वे स्वपक्षा नेति शंसति।
अत्र कर्तुः प्रभुत्वोक्त्याप्यभिप्रैति स्वपक्षताम्॥ ७४ ॥

सपक्षे उपपत्तिं चाह **प्रभुत्वेति**। सत्यसृष्टौ सामर्थ्येत्यर्थः। विमता सृष्टिः, न मायिका, समर्थकर्तृकत्वात् व्यतिरेकेण ऐन्द्रजालिकसृष्टिवत् इति प्रयोगः। 'अशक्ताः सत्यसृष्टौ हि मायासृष्टिं वितन्वते' इति विपक्षे बाधकमुन्नेयम् ॥ ७४ ॥

यतः फलविकल्पेऽपि सर्वान्पक्षानुपेक्ष्य सा।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥ ७५ ॥

इत्येकमेव स्वमतं निर्णिनाय ततोऽपि तत् ॥ ७६ ॥

फलविकल्प इति। प्रयोजनं क्रीडा वा भोगो वा इति विकल्प इत्यर्थः। **उपेक्ष्य** तिरस्कृत्य। **अयं** सृष्ट्यादिविषयः **एषः** इच्छापूर्विका प्रवृतिः। **स्वभावः** आनन्दोद्रेकरूपा लीलैव केवलम्। न तु तदर्था। तत्र हेतुः **आप्तकामस्येति**। पूर्णकामस्येत्यर्थः। **का स्पृहा**। का स्वप्रयोजनेच्छा ॥ ७५ ॥ ७६ ॥

का स्पृहेति यतः क्रीडाभोगपक्षौ सहेतुकम्।
आचिक्षेप स्वभावेन कर्तुः पूर्णस्य च प्रभोः ॥ ७७ ॥

का फलस्य स्पृहा तेन पूर्वौ द्वौ पूर्वपक्षिणाम्।
प्रभुत्वदूषकौ विष्णोर्न मत्पक्षावुभावपि।
तृतीय एव पक्षो मे प्रभुतापोषकः प्रभोः ॥ ७८ ॥

प्रभोः का फलस्य स्पृहेत्युत्तरेणान्वयः ॥ ७७ ॥ ७८ ॥

मामानयत्तमोजिद्यः पुत्रायोपदिदेश च ।
परार्थकर्ता कृत्यज्ञस्स स्वार्थकृत्यसदोज्झितः ॥ ७९ ॥

कोऽन्वर्थस्तस्य तेनाभूत्पूर्णस्स्वफलवान्न तत् ।
अन्वभावि मयैवेदं तेनानुभवबाधितौ ॥ ८० ॥

तौ पूर्वौ नैव पक्षौ मे किन्तु गन्तुस्तमांसि तौ ।
इत्यर्थः प्रबलाक्षेपलभ्यो ह्यत्रोपलभ्यते ॥ ८१ ॥

हरिः स्वप्रयोजनशून्य इत्यत्र श्रुतिः स्वानुभवं प्रमाणयति **मामिति** ॥ दैत्यं निहत्य वेदानयनं मत्स्यरूपस्य हरेः चतुर्मुखायोपदेशार्थमेवेति भावः । तदुक्तं भागवते 'प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा । दितिजमि'ति ॥ ७९ ॥ ८० ॥ ८१ ॥

अतः फलपरीक्षायामेकस्यैव स्वपक्षताम् ।
साऽभिप्रैति तथा पूर्वत्राप्येकस्य स्वपक्षताम् ॥ ८२ ॥

एकस्यैव स्वभावत्वेन प्रयोजनराहित्यस्य । **एकस्य** इच्छामात्रत्वस्य ॥ ॥८२ ॥

देवस्य ह्याप्तकामस्य प्रागुक्ता प्रभुतोचिता ।
अतस्समाख्यया पक्षौ तावेवाभिमतौ जगौ ॥ ८३ ॥

श्लोकद्वयस्य परस्परसंवादरूपतां स्फोरयति **देवस्येति** ॥ ८३ ॥

स्वभावतोक्तितश्श्रान्ते मायासृष्टिं निषेधति ।
अत्रोक्तं निःस्पृहत्वं च तथेशस्याप्तकामता ॥ ८४ ॥

सृष्टेरिच्छामात्रतोक्त्या यत्तत्रापि निरूप्यते ।
अतोऽपि पक्षौ द्वावेतौ श्रुतेस्स्वमततां गतौ ॥ ८५ ॥

निषेधप्रकारमेव दर्शयति अत्रेति। न हि मायावी आप्तकामः संभवति इति भावः। तत्रापि 'स्वप्नमाया सरूपे'ति पूर्व श्लोकेऽपि ॥ पक्षौ स्वभावत्वं निःस्पृहत्वं चेति ॥ ८४ ॥ ८५ ॥

नानाजीवादिभावेन क्रीडाभोगादिलब्धये।
यतस्सृष्टिपरीक्षायामपि पक्षद्वयं प्रभोः ॥ ८६ ॥

सृष्टिमाह ततस्तच्च पक्षद्वयमियं श्रुतिः।
फलस्याक्षेपिका न्यायसाम्यादाक्षिपदेव हि ॥ ८७ ॥

लब्धये प्रयोजनाय। इयं आप्तकामस्येति श्रुतिः ॥ ८६ ॥ ८७ ॥

का स्पृहेति श्रुतिस्तस्मात्स्थानद्वितयगौ च तौ।
द्वौ द्वौ पक्षौ फलापेक्षापक्षपर्यवसायिनौ।
धिक्कृत्य तत्र चात्रापि तृतीयं पक्षमाददे ॥ ८८ ॥

द्वौ द्वौ स्वाप्नी, मायामयी, इति द्वौ तथा क्रीडार्था भोगार्था इति च द्वौ। तृतीयं आनन्दोद्रेकादेवेति पक्षम् ॥ ८८ ॥

चतुर्मुखस्य वाणीव वाणीयं शोभतेतराम्।
एकाकारापि या पक्षचतुष्कं शुष्कमातनोत् ॥ ८९ ॥

इच्छामात्रमितीशस्य सृष्टीच्छैवास्ति केवलम्।
न फलेच्छेत्याह तत्तान्पक्षानेषाप्यदूषयत् ॥ ९० ॥

शोभतेतरामित्युक्तस्य उपपादनं एकाकारेति। चतुर्भ्यो मुखेभ्यो निःसृता वाणी अनेकाकारा। यथोक्तं 'युगपद्रचन्नेनां' इति। इच्छामात्रमित्येकया उक्त्यैव पक्षचतुष्टयमपि निराचष्टेति अत्र तरप्प्रत्ययबोध्योऽतिशयः ॥ ८९ ॥ ९० ॥

अतस्स्थानद्वयगतावप्येकार्थपरायणौ।
शब्दौ विधिप्राणसमौ सत्यं लोकमरक्षताम् ॥ ९१ ॥

शब्दौ इच्छामात्रं इति स्वभावोऽयं इति च शब्दौ। **स्थानद्वयगतौ** पूर्वोत्तरश्लोकगतौ। **एकार्थः** हरेः प्रभुत्वं, तत्र **परायणौ** तात्पर्यातिशयवन्तौ। **सत्यं लोकं** जगत्सत्यत्वम्। **अरक्षतां** समर्थयामासतुः। विधिप्राणपक्षे **स्थानद्वयं** प्रदेशद्वयम्। **सत्यं** तदाख्यं लोकम्॥ ९१॥

किञ्चाविकाररूपस्य ब्रह्मणो जगदात्मना।
विकारापादकं विश्वोपादानत्वमतं पुरा।
अन्य इत्यन्यपक्षत्वं वदन्ती नान्वमंस्त सा ॥ ९२ ॥

अविकाररूपस्येति तदुक्तमनुव्याख्याने 'इच्छामात्रं प्रभोः सृष्टिरविकारस्य सर्वदा। 'स्वभावोऽयमनन्तस्य रजो येनाभवज्जगदि'ति। 'न चेतनविकारः स्याद्यत्र कापि ह्यचेतनमि'ति च॥ ९२॥

विभूतिं प्रसवं त्वन्य इति यच्छ्रूयते श्रुतौ।
विविधाकारभवनं विभूतिर्हि विदां मते ॥ ९३ ॥

यत् इति। **तत्** नान्वमंस्तेति पूर्वेणान्वयः। तत्र हेतुः **विविधेति**। विकारपर्यवसानादिति भावः॥ ९३॥

सर्वमिथ्यात्ववादं च मध्ये साऽतिविगर्हितम्।
सोपहासं दूषयितुं पुनराहेति मे मतिः ॥ ९४ ॥

मध्ये विकारपक्षस्वभावपक्षयोर्मध्ये। **पुनः** तात्पर्यद्योतनाय॥ ९४॥

अन्यैरित्यन्यमततां यदत्राप्याह सा स्फुटम्।
विकल्पितत्ववाचा च सर्वे सन्दिहते परम् ॥ ९५ ॥

सन्दिहते स्वस्वपक्षेषु निश्चयवन्तोऽपि प्रमाणनिर्णीतार्थनिश्चयवन्तो न भवन्ति॥ ९५॥

नैव निर्णयवन्तस्त इति तानाह सा श्रुतिः।
विरुद्धकल्पनारूपो विकल्पः संशयो यतः ॥ ९६ ॥

श्रुतौ विकल्पिता इत्यस्य विपरीतनिश्चयवन्त इत्यर्थ इत्याह **विरूद्धेति** ॥ ॥९६ ॥

यतः स्वप्नवदित्येको वक्ति मायावदित्यपि ।
अन्यो रज्जुभुजङ्गीवदिति वक्ति तथापरः ॥ ९७ ॥

रज्जुभुजङ्गीवदिति । रज्जुरेव भुजङ्गात्मना विवर्तते इति 'विभूतिं प्रसवं चेति' वदन्तो विवर्तवादिनः ॥ ९७ ॥

एवं दृष्टान्तविभ्रान्तस्वान्तास्ते सर्वखण्डने ।
दृष्टान्तं क्वाप्यपश्यन्तस्सदा संशेरते किल ॥ ९८ ॥

दृष्टान्तेति दृष्टान्ताभासेत्यर्थः । स्वप्नदृष्टान्तः 'वैधर्म्याच्च न स्वप्नादिववत्' इति सूत्रेण दूषितः । तदुक्तं शाङ्करभाष्ये 'किं पुनर्वैधर्म्यं बाधाबाधाविति ब्रूमः' इति । मायादृष्टान्तस्तु 'न च मायाविना माया दृश्यते विश्वमीश्वरः । सदा पश्यति तेनेदं न मायेत्यवधार्यतां' इति आगमपराहतः । अधिष्ठाने कारणत्वाव्यवहारात्, निर्विशेषस्य ब्रह्मणोऽधिष्ठानत्वासंभवाच्च विवर्तवादः निराकृतः । स्थितेऽप्येवं दृष्टान्ताभासान् दृष्ट्वा 'तमसा मुष्टदृष्टयः' इत्यर्थः । संशेरते इत्यस्य प्राग्वदर्थः ॥ ॥९८ ॥

अन्ये तु वादिनो विश्वसत्यत्वद्रोहिणो न हि ।
इति तांस्तानुपेक्ष्यान्ते श्रुतिस्स्वमतमाददे ॥ ९९ ॥

तार्किकाणां तु अनुमानाभासपरिकल्पितः अशरीर ईश्वरो न जगत्सर्जनस्येष्टे । एवं सांख्यपरिकल्पितं ज्ञानेच्छाविधुरं अचेतनं प्रधानं न जगत्कर्तृ संभवति । इति उपलक्षणतया तावपि दूषयित्वेत्यर्थः । जगत्सत्यत्वमङ्गीकुर्वाणानामपि तेषां सृष्टिकथा अपहसनीयैवेति श्रुतेराशयः ॥ ९९ ॥

यतोऽन्यमतताशंसिपदं नात्र प्रदृश्यते ।
अतः स्वमतमेवैतदिति मन्यामहे वयम् ॥
विनिश्चितत्वस्तुत्या च तथाऽन्ते कथनादपि ॥ १०० ॥

अनुवादकत्वलिङ्गाभावात् अन्ते सिद्धत्वाच्च 'इच्छामात्रं प्रभोः सृष्टिः' इत्युक्त एव श्रुतेः सिद्धान्त इत्याह यत इति ॥ १०० ॥

कालचिन्तकपक्षं तु स्वानुकूलत्वतः श्रुतिः ।
पुनर्जगाद सिद्धान्तः स एवेति मतिर्मम ॥ १०१ ॥

सांख्यमतनिराकरणेन तत्समानयोगक्षेमाः कालचिन्तकादिपक्षा अपि निराकृता वेदितव्या इत्याह **कालेति** ॥ जगत्सत्यतामात्रमभ्युपगच्छन्तोऽपि कालकर्मादिकस्याचेतनस्य स्वातन्त्र्याभ्युपगमान्निन्द्या एव ते सर्वे वादा इत्याशयेनाह **पुनरिति** उपलक्षणतया निन्द्यत्वज्ञापनायेति भावः ॥ तदुक्तं भगवत्पादैः 'न च कर्मविमामलकालगुणप्रभृतीशमचित्तनु तद्धि यतः । चिदचित्तनु सर्वमसौ तु हरिर्यमयेदिति वैदिकमस्ति वचः' इति ॥ **स एव** इच्छामात्रं इत्युक्त एव ॥ १०१ ॥

यतः स्वप्नादिवैधर्म्यं जगतः सूत्रकृत्स्वयम् ।
स्पष्टमाह ततोऽप्येष पक्षो न श्रुतिसूत्रयोः ।
मतस्तत्पूर्वपक्षोऽसावासीन्नास्त्यत्र संशयः ॥ १०२ ॥

वैधर्म्यं बाधाबाधरूपम् । उक्तं हि परभाष्ये 'बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य । — । एवं मायादिष्वपि भवति यथायथं बाधः । नैवं जागरितोपलब्धं वस्तु स्तम्भादिकं कस्यांचिदवस्थायां बाध्यते' । इति । [भे. प. ब्र. सू. भाग २. प. १०] सिद्धान्ते स्वाप्नपदार्थानां सत्यत्वेन स्वाप्नजाग्रत्त्ववदिति वैधर्म्यं मन्तव्यम् ॥१०२ ॥

तस्मात्स्वप्नादिसारूप्यान्माय्रासृष्टिं वदन्नयम् ।
मायावादी श्रुतेर्हार्दवेदी नैवाभवत्कुधीः ॥ १०३ ॥

अतः सर्वस्य सत्यत्वसिद्धान्तोऽभूच्छ्रुतेर्बलात् ।
मिथ्यात्वं पूर्वपक्षत्वादुपेक्ष्यमिति च स्थितम्॥ १०४ ॥

मायासृष्टिं अज्ञानोपादानकत्वेन मिथ्याभूतसृष्टिम् । वदन् 'स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा । तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः' इति ग्रन्थेन । **हार्दं**

अनित्यत्वविकारित्वपारतन्त्र्यरूपेणैव साम्यम् । न तु बोधनिवर्त्यता' इत्येवंरूपम् ॥ ॥१०३ ॥ १०४ ॥

इच्छामात्रे तु सा सृष्टिर्यस्मादव्यवधानतः ।
स्यादेव तत्क्षणे तस्मात्तां तत्त्वेन श्रुतिर्जगौ ॥ १०५ ॥

इच्छामात्रं सृष्टिरिति सामानाधिकरण्येन स्वातन्त्र्यैक्यमेव विवक्षितम् । तेन अस्वतन्त्रकारणान्तरसद्भावोऽनुमत इत्याह **इच्छेति**। **स्यादेवेति** स्वातन्त्र्यमभिहितम् । 'स्वेच्छानुसारितामेव स्वातन्त्र्यं हि विदो विदुरि'त्युक्तेः ॥ १०५ ॥

यथा सत्या हरेरिच्छा तथा सृष्टिश्च सा सती ।
इति प्रबोधनायापि तां तत्त्वेन जगौ श्रुतिः ॥ १०६ ॥

अभेदव्यपदेशे सादृश्यैक्यमपि निमित्तम् । सादृश्यं च सत्त्वेनैवेत्याह **यथेति** ॥ १०६ ॥

प्रभोस्सकाशाद्या सृष्टिस्तस्यां सृष्टावियं स्थितिः ।
प्रभोस्सकाशाद्यासृष्टिर्मत्स्यकूर्मादिरूपिणी ॥ १०७ ॥

सा त्विच्छामात्रमेवेति भावाद्वा प्राह तां तथा ।
द्वयोरप्यनुकूलाय मन्ये सामान्यकीर्तनम् ॥ १०८ ॥

इयं पारमार्थिकीति, 'स्वभावः इति प्रयोजननिरपेक्षतया इति च पूर्वोक्ता । स्वरूपैक्यं सामानाधिकरण्यार्थ इति स्वीकृत्य तदनुगुणं श्रुतेरर्थान्तरमाह **मत्स्यकूर्मादिरूपिणीति**। द्वयोः ईशसृष्टेः प्रपञ्चसृष्टेश्च । अनुकूलाय संग्रहाय । **सामान्येति** उभयसाधारणसृष्टिशब्देनेत्यर्थः ॥ १०८ ॥

इच्छाऽधीनं यतस्सर्वमुपादानादिकारणम् ।
अतस्तस्याः प्रधानत्वात्सैव सृष्टिरितीरितम् ॥ १०९ ॥

मात्रशब्देनेतरकारणनिषेधः स्वातन्त्र्यरूपधर्मान्तरेणैव न स्वरूपेणेत्याह **इच्छेति** ॥ १०९ ॥

स्वाज्ञानतो जगत्सृष्टिं तस्याः स्वानिष्टरूपताम् ।
न्यवारयत्प्रभुपदमिच्छामात्रपदं च तत् ॥ ११० ॥

स्वरूपतो व्यावर्त्या तु पराभिमतमायामयी सृष्टिरेवेत्याह **स्वाज्ञानेति**। स्वस्यैवाज्ञानापादकत्वे स्वानिष्टरूपता स्यादेवेति भावः । अज्ञानस्य सर्वानिष्टमूलत्वं 'अविद्याक्षेत्रत्वमुत्तरेषां' इति प्रमितम् । 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्' इत्युक्तेः ॥ ११० ॥

स्वाज्ञानञ्च प्रभुत्वञ्च यतो नैकत्र युज्यते ।
यतो नेच्छति सर्वोऽपि स्वानिष्टं किमुत प्रभुः ।
तस्मात्प्रकृतितः सृष्टिर्जीवानां सुखदुःखदा ॥ १११ ॥

यतश्च का स्पृहेत्यन्ते स्वफलञ्च निषेधति ।
ततः स्वविफलाप्त्यैतां सृष्टिं कः कोविदो वदेत् ॥ ११२ ॥

आप्तकामत्वमपि च कथं सङ्गच्छते तदा ।
अतः श्रुतिपदार्थज्ञो न तद्व्याख्यातुमर्हति ॥ ११३ ॥

सत्यपीतांबरालाभे मायापीतांबरं सृजेत् ।
लब्धे तु सत्यवसने मायासृष्टौ यतेत कः ॥ ११४ ॥

नैकत्र युज्यते सर्वधर्मोपपत्त्यधिकरणोक्तरीत्या । नेच्छतीति जिहासा, प्रभुरिति तत्प्रहाणसामर्थ्यं चोच्यते । **तस्मादिति** । 'स्रक्ष्ये हि चेतनगणान्सुखदुःख-मध्यसंप्राप्तये' इति भगवत्पादवचनात् ॥ १११ ॥११२ ॥ ११३ ॥ ११४ ॥

मायासृष्टिं निराचष्टे प्रभुत्वोक्तिरतः प्रभोः ।
स्वप्रमायासरूपेति ततोऽपि स्वमतं न तत् ॥ ११५ ॥

प्रभोः सत्यसर्जनसमर्थस्य । 'धाम्ना स्वेन सदा निरस्तकुहकमि'त्युक्तेः ॥ ॥११५ ॥

यतश्च सूत्रे वैधर्म्याच्च न स्वप्नादिवत्त्विति ।
स्वप्नवैधर्म्यमुदितं तस्मादपि न तन्मतम् ॥ ११६ ॥

स्वप्नवैधर्म्यं बाधितस्वप्नादिवैधर्म्यं अबाधितत्वरूपम् ॥ ११६ ॥

यतश्च पदशक्त्या तन्मतं श्रुतिरगर्हयत् ।
ततोऽप्यन्यमतं मन्ये नान्यत्वोक्त्यैव केवलम् ॥ ११७ ॥

पदशक्त्या विरुद्धकल्पनाबोधकविकल्पपदशक्त्या ॥ ११७ ॥

यतः स्वभावतैवोक्ता कर्तृत्वादेः परात्मनि ।
स्वभावस्यानपायादियुक्त्या तन्नित्यतोदिता ।
अज्ञानोपाधिकत्वञ्च तद्धर्माणां निवारितम् ॥ ११८ ॥

स्वभावहानौ स्वरूपहानिप्रसङ्गरूपयुक्त्या । आदिपदेन अनौपाधिकत्व-सङ्ग्रहः ॥ ११८ ॥

तेन लक्षणताटस्थ्यं नानुमेने परात्मनि ।
देवसंबन्धितोक्त्या च नान्वमंस्त तदन्यगम् ॥ ११९ ॥

तेनेति । स्वरूपानन्तर्गतस्य, व्यावृत्तिधीकाले अविद्यमानस्यैव तटस्थत्वात् ॥ **तदन्यगं** मायागतम् ॥ ११९ ॥

यच्च सृष्ट्यादिकरणक्रियैवोक्ता स्वभावतः ।
तत्क्रियानित्यता चोक्ता शक्तिव्यक्त्यात्मता हरौ ॥ १२० ॥

सृष्ट्यादेः करणरूपा क्रिया सर्जनक्रियेति यावत् । **शक्तिव्यक्त्यात्मतेति** । 'सविशेषोऽपि क्रियाशक्त्यात्मना स्थिरः' इत्यनुव्याख्यानोक्तेः ॥ १२० ॥

यतः क्रियानित्यतोक्त्या कार्यस्यापि प्रवाहतः ।
नित्यत्वमुदितं सर्वलयं तेन न्यवारयत् ॥ १२१ ॥

भाविबाधकशङ्कां च तत एव निराकरोत् ।
पारमार्थिकसत्यत्वं जगतस्तेन सा जगौ ॥ १२२ ॥

न्यवारयत् 'न चाशेषनृनाशास्तु दृष्टो दृश्योऽस्ति वा क्वचित्' इत्यनुव्याख्यानोक्तेः ॥ १२१ ॥ १२२ ॥

तस्मात्सृष्टेः स्वभावत्वकीर्तनात्सृज्यवस्तुतः ।
स्वभावतैव प्राप्तेति तदभावो न कर्हिचित् ॥ १२३ ॥

तदभावः जगतः स्वरूपेण त्रैकालिकनिषेधः ॥ १२३ ॥

स्वेच्छयैव च सृष्टयुक्तेः कर्तृतां घटकर्तृवत् ।
आहोपादानतां तेन प्रत्याह परमात्मनः ॥ १२४ ॥

तदपि प्रभुतामाह यतश्च परमात्मनः ।
सर्वतोऽत्यन्तभेदं च सर्वेशत्वं च वक्ति तत् ॥ १२५ ॥

स्वप्रमायासरूपेति सृष्टिं वाचा वदन्ति ते ।
अर्थतस्तद्विरोधात्तैः कल्पिता जगतो जनिः ॥ १२६ ॥

प्रत्याह 'करोति पितृवद्विश्वं पूर्णाशेषगुणात्मकः' इत्युक्तरीत्या ॥ १२४ ॥ ॥१२५ ॥ १२६ ॥

स्वप्नेऽपि द्रष्टृदेहोऽस्ति शय्याभूवसनादिकम् ।
अन्ये च जाग्रतः सन्ति स्वाप्नं तन्नास्ति किञ्चन ॥ १२७ ॥

चशब्देन स्वप्नदृष्टा वासनामयाः करितुरगादयश्च ग्राह्याः । किञ्चन स्वाप्नजाग्रत्त्वं बाह्यपदार्थोपादानकत्वं च ॥ १२७ ॥

मायायां च स्वदेहोऽस्ति चक्षुरादीन्द्रियाणि च ।
भूर्द्रष्टारश्च ते सर्वे मायिकं नास्ति किञ्चन ।
तत्सरूपा स्वसृष्टिश्चेत्सर्वं मिथ्या कथं भवेत् ॥ १२८ ॥

'अधिष्ठानं च सदृशं सत्यवस्तुद्वयं विना। न भ्रान्तिर्भवति क्वापि स्वप्नमायादिकेष्वपि' इत्युक्तिमनुरुध्याह **मायायामिति।** सरूपत्वमुपेत्याप्याह **सर्वेति** ॥ १२८ ॥

किञ्च मायासरूपत्वं कथमस्ति विचार्यताम्।
मायया कल्पितं वस्तु मायाकालेऽपि नास्ति हि ॥ १२९ ॥

वस्तुतः प्रपञ्चस्यार्थक्रियाकारितायाः साक्षिसिद्धत्वेन अतथाभूतमाया-सरूपता नास्त्येवेत्याह **किञ्चेति** ॥ १२९ ॥

भ्रान्त्या प्रतीयतेऽस्तित्वं तत्कार्यस्यापि विभ्रमः।
जलञ्च मिथ्या परितस्स्यन्दनं पानमेव च ॥ १३० ॥

मिथ्यैव दृश्यते पानजनितं तु सुखं तदा।
साक्षिणा वीक्ष्यते नैव बाधात्पूर्वं च किञ्चन ॥ १३१ ॥

जगतस्तत्सरूपत्वे ब्रह्मज्ञानात्पुरा जलम्।
जलकार्यं च पानान्तं मृषाऽस्तु जलपानतः।
तन्निवृत्तिस्सुखं चात्र साक्षिणा वीक्ष्यते कथम् ॥ १३२ ॥

मायाकालेऽपि नास्ति। वियदादेस्तु भ्रान्तिकाले व्यावहारिकसत्यत्व-मभ्युपगतम्। बाधात्पूर्वमपि तत्र जले स्यन्दनं पानं च न। पानेन दुःखाभावस्य सुखस्य च अनुभवस्तु दूरे॥ प्रपञ्चस्तु ब्रह्मज्ञानात्पूर्वं साक्षिपर्यन्तपरीक्षया अर्थक्रियावत्त्वेन निश्चित इत्येवं बहुधा वैषम्यमाह **बाधात् पूर्वं चेति** ॥ १३० ॥ ॥१३१ ॥ १३२ ॥

बाधदूरत्वसामीप्यान्न विशेषोऽस्ति कश्चन।
बाधात्प्राग्भ्रान्तिकाले स्यान्मिथ्यात्वे
समतोभयोः ॥ १३३ ॥

बाधविलम्बमात्रं नार्थक्रियां प्रयोजयतीत्याह **बाधेति**। तदुक्तमनुव्याख्याने "दीर्घभ्रान्तिकरी चेत् स्यादतत्त्वावेदकप्रमा। रज्जुसर्पादिविज्ञानादप्याधिक्यादमानता" इति ॥ १३३ ॥

सत्यज्ञानोद्भवं सौख्यं मायायामपि दृश्यते।
मिथ्यार्थजनितं सौख्यं नैव तत्रास्ति किञ्चन॥ १३४ ॥

अतो मायाविरूपत्वाज्जगत्सत्यमभूद्बलात् ॥ १३५ ॥

सत्यस्य सुखहेतुत्वं मिथ्याभूतस्य नेति च।
अन्वयव्यतिरेकाभ्यां यतस्सिद्धमतोऽपि च ॥ १३६ ॥

'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम्। तदेवार्थक्रियाकारि तत्सदेवार्थकारकमि'त्यनुव्याख्यानोक्तं प्रकृते सङ्गमयति **सत्येति**॥ १३४ ॥ ॥१३५ ॥ १३६ ॥

इत्थं सत्यस्य जगतस्सृष्टेर्मिथ्यात्वमाग्रहात्।
विरुद्धं कल्पितं यस्मात्तस्मात्सृष्टिर्विकल्पिता॥ १३७ ॥

अतः स्वोक्तविरुद्धोक्त्या न मत्पक्षो भवेदयम्।
अन्येषामेव पक्षोऽसौ नाहं व्याहतभाषिणी ॥ १३८ ॥

इत्थं सरूपत्वहेतोरसिद्धत्वात्, उक्तरीत्या सत्यजगद्द्वयाङ्गीकारापत्त्या विरुद्धत्वाच्च ॥ १३७ ॥ १३८ ॥

तस्मान्निदर्शनाभावात्सर्वमिथ्यात्ववादिनः।
दुरदृष्टानुसारास्ते नैव दृष्टानुसारिणः।
पदानां शोधने त्वेवं श्रुतेर्भावोऽवसीयते ॥ १३९ ॥

निदर्शनाभावात् सर्वत्र भ्रान्तौ, अधिष्ठानस्य, प्रधानस्य, द्रष्टुः, तद्देहेन्द्रियादिकस्य, दोषस्य, बाधस्य, इत्येतदादीनां सत्यत्वावश्यंभावादित्याशयः ॥ १३९ ॥

अतस्सर्वं जगदिदं सत्यसङ्कल्पतः प्रभोः ।
जायमानं सदा सत्यमित्याहोत्तरवागियम् ॥ १४० ॥

सत्येति समर्थप्रवृत्तिप्रयोजकेत्यर्थः ॥ १४० ॥

स्वप्नमायासरूपत्वे त्वीषन्मिथ्या जगद्भवेत् ।
सर्वमिथ्यात्ववादोऽयं न श्रौतो नापि यौक्तिकः ।
इत्याह पूर्ववाक्ये सा शब्दशब्दार्थवेदिनाम् ॥ १४१ ॥

यौक्तिक इति 'एकदेशापवादेन कल्प्यमाने तु बाधके । न सर्वबाधनं युक्तमिति न्यायविदः स्थिताः' इति युक्तिसंमतः ॥ १४१ ॥

वागीशयोग्या वागेषा यदनेकैर्मुखैस्स्वकैः ।
प्रतिवक्ति परान्सर्वान्वक्ति विष्णोर्गुणानपि ॥ १४२ ॥

एवञ्च सर्वमिथ्यात्ववादस्ते नैव शोभते ।
विश्वसत्यत्ववादो नः श्रुत्युक्तः शोभतेतराम् ॥ १४३ ॥

वागीशः भाविचतुर्मुखः श्रीमध्वः ॥ १४२ ॥ १४३ ॥

स्वप्नमायादिदृष्टान्तैर्जगन्मिथ्यात्वसाधनम् ।
उक्तश्रुत्या बाधितत्वान्नैव शक्यं परस्य तत् ॥ १४४ ॥

बाधितत्वात् निन्दामुखेनेति भावः ॥ १४४ ॥

शश्वद्यथार्थतो ह्यर्थान्व्यदधात्परिभूः कविः ।
इत्यर्थानां यथार्थत्वं श्रुतिरन्या जगाद ह ॥ १४५ ॥

अतो यथार्थसृष्ट्युक्तेर्भ्रमजत्वकथा गता।
शाश्वतत्वोक्तितश्चास्य बाधोऽभूद्बाधितस्तव ॥ १४६ ॥

'कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः' इति श्रुतिं अर्थतोऽनुवदति **शश्वदिति**। "अनाद्यनन्तं जगदेतदीदृक् प्रवर्तते नात्र विचार्यमस्ति। तच्चान्यथा क्वापि न कस्य चेदं अभूत्पुरा नापि तथा भविष्यत्" इति तत्त्वनिर्णयोदाहृतश्रुत्यनुसारेणार्थमाह **यथार्थत्वं इति**। याथातथ्यतः याथार्थ्येनैव सत्यानेव इति तट्टीकायां व्याख्यातम्। 'न क्वाप्यनीदृशं विश्वं तत्तत्कालानुसारतः' इत्युक्तरीत्या शाश्वतत्वं ज्ञेयम्॥ १४५ ॥ १४६ ॥

विश्वं सत्यमिति श्रुत्या सत्यत्वं स्पष्टमुच्यते।
प्रमाणसिद्धतां चास्य प्रमिनन्तीति सा जगौ ॥ १४७ ॥

'विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वा' इत्यस्या अर्थः। हे मघवानौ धनवन्तौ, इन्द्राबृहस्पती। भगवत एव रूपद्वयविवक्षया द्विवचनम्। युवोः युवयोः अधीनं विश्वं सत्यमित् सत्यमेव। एवं कुतः । वां युवयोः सत्यं जगत्पालनादिकं, व्रतं कर्म, आपश्चन सर्वा देवता अपि प्रमिनन्ति जानन्ति। न केवलमहमेव इति॥ १४७ ॥

अतः प्रमाणसिद्धत्वाद्ब्रह्मवत्परमार्थसत्।
जगदेतदभूच्छ्रौतयुक्त्या स्पष्टश्रुतेरपि ॥ १४८ ॥

सोपपत्तिकवाक्यत्वाद्विश्वसत्यत्ववागियम्।
स्वार्थे तात्पर्ययुक्तैव चाल्या नोक्तिशतैरपि ॥ १४९ ॥

'विश्वं सत्यं प्रमाणदृष्टत्वात् ब्रह्मवत्' इति प्रयोगः। न च साध्यानिरुक्तिः। अबाध्यतायाः साध्यत्वात्। ब्रह्मणश्च प्रामाणिकत्वाभ्युपगमात् न तत्र साधनावृत्तिः॥ न च साध्याविशिष्टता। स्वपरासंमतेः। ब्रह्मणश्च प्रामाणिकत्वाभावे शशविषाणवदसत्त्वप्रसङ्गः' । इत्यादिकं वादावल्युक्तमनुसन्धेयम्। **श्रौतेति**। हेतोः पक्षधर्मता प्रमिनन्तीति श्रुत्यैवोक्तेति भावः। 'चन' शब्देन प्रत्यक्षादि-

प्रमाणसिद्धत्वमपि सूचितम्। देवा अपि जानन्तीत्युक्त्या प्रत्यक्षादीनामतत्त्वावेदकता पराकृता। अन्यथा देवानां भ्रान्तत्वापत्तेः। बाध्यशुक्तिकारजतद्रष्टृवत्। श्रुत्यनुगृहीतत्वान्नाप्रयोजकता इत्याह **श्रुतेरिति।** तस्याश्च नार्थान्तरावकाश इत्याह **स्पष्टेति** ॥ १४८ ॥ १४९ ॥

व्यावहारिकतावाणीं वाणीयं धिक्करोति ते।
कपोलकल्पिता यत्सा स्वयं सर्वैरकल्पिता ॥ १५० ॥

'व्यावहारिकं सत्त्वमत्रोच्यते इति चेन्न। निर्बीजत्वात्कल्पनायाः' इति वादावल्यनुरोधेनाह **व्यावहारिकतेति।** व्यावहारिकपदस्य श्रुतावश्रवणात्। एवमेव कल्पनेऽतिप्रसङ्गात्॥ 'न हि अक्षरबाह्यो वाक्यार्थः' इति स्वेनैवान्यत्र प्रतिषेधात्। 'प्रमाणानि खलु स्वगोचरे प्रवर्तमानानि तत्त्वमित्येव प्रवर्तन्ते' इति भामत्यां बौद्धोक्तसांवृतसत्यत्वस्य खण्डनात् (भे.प.ब्र.सू. भाग २ प. १६)। एवं विद्यारण्येनापि एतद्वाक्यव्याख्यानावसरे सत्यं इत्यस्य अनारोपितमिति अर्थोक्तेश्च ॥ १५० ॥

द्विसंबन्धित्वकथनादेकाज्ञानेन कल्पनाम्।
निवारयति मिथ्यात्वमपि तेन न्यवारयत् ॥ १५१ ॥

भ्रान्तोऽर्थो न बहोरेको दृश्यो भवति तन्मते।
मुक्तेरमुक्तिताऽऽपत्त्या यद्बहोस्सत्तदात्मवत् ॥ १५२ ॥

मघवा इति युवोरिति वामिति च द्विसंबन्धित्वकथनेन सत्यत्वसिद्धिप्रकारमाह **यदिति।** विमतं सत्यं बहुभिर्दृश्यमानत्वात् आत्मवत्। न चासिद्धिः। द्विवचनेन द्विकर्तृकसृष्टित्वस्य प्रमिनन्ति इति बहुकर्तृकदर्शनविषयत्वस्य च श्रुतिसिद्धत्वात्। न च भ्रमाणामनेकत्वेऽपि विश्वस्यैकत्वमित्याह **भ्रान्त इति** भ्रमरूपोऽर्थ इत्यर्थः। अर्थज्ञानयोरभेदाभ्युपगमादिति भावः। तदुक्तं **तन्मत इति।** न चाप्रयोजकतेत्याह **मुक्तेरिति।** एकस्य अज्ञाननिवृत्तौ अपि बहूनां द्रष्टृणां अज्ञानानामनिवृत्तत्वेन बन्धस्य तदवस्थत्वात्। तदज्ञानपरिकल्पितस्य प्रपञ्चस्यानपायेन अनेकप्रपञ्चाङ्गीकारापत्तेः। प्रपञ्चस्य प्रविलय एव हि तन्मते मुक्तिः। न च दृष्टान्तः साधनविकलः। प्रमिनन्तीति

श्रुत्या पश्यन्ति ज्ञानचक्षुषः इत्यादिस्मृत्या च हेतुसिद्धेः। शुक्तिरूप्यं वा व्यतिरेकदृष्टान्तः ॥ १५१ ॥ १५२ ॥

यतश्च तन्मते सुप्तौ लीनं देहादिकं तदा।
द्रष्टुर्द्रष्टुर्दृष्टितोऽन्यः कल्प्यः कल्प्यः क्षणे क्षणे ॥ १५३ ॥

यतश्चेति। विवृतमेन्यायामृते दृष्टिसृष्टिभङ्गे 'चैत्रे सुप्ते तद्देहादिकं तं प्रति नास्त्येव। जाग्रतो मैत्रस्य तु तद्भ्रान्त्या भाति। प्रत्यभिज्ञा तु सोऽयं दीप इत्यादिवद्भ्रान्तिरि'ति ॥ १५३ ॥

सदा यद्यस्य तत्तस्य व्रतमित्युच्यते बुधैः।
एवञ्च सत्यजगतः कर्तृता नियताऽभवत् ॥ १५४ ॥

अतो यावद्ब्रह्मभावित्वाच्च तत्सुखवज्जगत्।
परमार्थसदेवासीत्सर्वं चानुमयाऽमुया ॥ १५५ ॥

नियमगर्भव्रतशब्दोक्त्या यावद्ब्रह्मभावित्वेन सत्यत्वसिद्धिरित्याह **सदेति** ॥ नियमवाचकत्वे प्रयोगबाहुल्यं ज्ञापकमाह **उच्यते इति**। पतिव्रता इत्यादौ प्रयोगे तथात्वदर्शनादिति भावः ॥ १५४ ॥ १५५ ॥

आप इत्युक्तितो लोकपावनीभूतदेवताः।
अदुष्टकरणोपेता न भ्राम्यन्तीत्यसूचयत् ॥ १५६ ॥

तस्माददुष्टकरणजन्यत्वात्तद्दृशिः प्रमा।
अन्त्यप्रमावदित्युक्तं साधकं चाप्यशोधयत् ॥ १५७ ॥

आसमन्तात् पुनन्तीत्यापः 'आपो वै सर्वाः देवता' इति श्रुतेः अप् शब्दः देवतावाची ॥ न च तासां करणेषु दोषशङ्काऽवकाशमासादयति। लोकपावनत्वात्तासाम्। **तस्मात्** प्रामाण्यापवादकसामग्रीसमवधानाभावात्। करणानामदुष्टत्वोक्तेरपि अपवादनिरसन एव तात्पर्यम्। ज्ञानानां प्रामाण्यस्योत्सर्गत एव स्थितेः। **तद्दृशिः तासां** देवतानां **तस्य** जगतो दृशिः। **अन्त्यप्रमावत्** तत्त्वमस्यादि-

वाक्योत्थपराभिमतचरमप्रमावत्। पररीत्या दृष्टान्तः। तस्याखण्डार्थनिष्ठत्वोपगमेन ज्ञानत्वमेव दुर्लभं दूरे प्रमात्वमित्यन्यदेतत् ॥ १५६ ॥ १५७ ॥

प्रमिनन्तीत्युक्तिरेव व्यावहारिकताप्रथाम्।
न्यवारयद्यतो बाधशून्यार्थानुभवः प्रमा ॥ १५८ ॥

अनुभवस्य याथार्थ्यं बाधेनैवापोद्यम्। न चात्र बाधः। देवतासाक्षिविषयत्वात्। व्यावहारिकत्वं च प्रमायाः अतत्वावेदकत्वं पराभिमतम्। अतत्वावेदकं प्रमाणं चेति व्याहतमित्याशयेनाह **न्यवारयदिति** ॥१५८ ॥

एवञ्च बाधशून्यत्वाज्जगच्च ब्रह्मवत्सदा।
अव्यावहारिकञ्चासीदार्थिक्याऽनुमयाऽमुया ॥ १५९ ॥

न च बाधशून्यत्वमेव अव्यावहारिकत्वमिति साध्याविशिष्टता। बाधः प्रातिभासिकसाधारणः। सामान्याभावेन विशेषाभावसाधनाददोषः। परमार्थतया व्यवहर्तव्यत्वं वा साध्यम् ॥ १५९ ॥

यथा घटपटद्वित्वं नैवं ब्रह्मस्वरूपयोः।
द्वितेत्यपि युवोरित्याद्युक्तिव्यत्यासतो जगौ ॥ १६० ॥

युवोरिति छान्दसप्रयोगेण 'द्वित्वं चैकस्य युज्यते' इत्यनुव्याख्यानोक्तविशेषलाभोऽपीत्याह **यथेति** ॥ १६० ॥

चनेति वैदिकपदान्नान्यथात्वं कथञ्चन।
इत्यवाधारयत्स्वार्थमनेकार्थं यदव्ययम् ॥ १६१ ॥

'यदा त्वर्थित्वेन निश्चिचीषति तदा सजातीयविजातीयसंवादविसंवादभावाभावलक्षणया परीक्षया तत्प्रामाण्यमवधारयती'ति वादावल्युक्तवर्त्मना प्रामाण्यावधारणप्रकारमाह **चनेति**। प्रमिनन्तीति अनेकसंवादः पूर्णैश्वर्यवाचिमघवपदप्रयोगेण ऐन्द्रजालादिकुहकनिराकरणेन, एवं नियमशंसिव्रतपदप्रयोगेण च विसंवादाभावो ज्ञापितो ध्येयः ॥ १६१ ॥

सार्वज्ञशस्तचित्तत्वपराभावनशक्तिभिः ।
स्वातन्त्र्येण च पूर्वा वाक्कर्त्रज्ञानं चकर्त हि ॥ १६२ ॥

'शाश्वतीभ्यः समाभ्यः' इत्युक्तनित्यत्वेन 'कविर्मनीषी'ति श्रुत्या सत्यत्वसिद्धिः पूर्वमुक्ता । न केवलमेवं किन्तु कवित्वादिविशेषणैः सौरभचतुष्टयार्थसिद्धिरपीत्याह **सार्वज्ञेति।** 'अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चने'ति वचनात् सार्वज्ञेनाज्ञानाभावसिद्धिः । मनीषी इत्यस्यार्थद्वयं मनसामीशितृत्वं, प्रशस्तचित्तत्वं च ॥ 'भूमनिन्दाप्रशंसासु भवन्ति मतुबादय' इत्युक्तेः । तेन नियामकस्य तस्य ज्ञानस्य अबाधिततत्वम् । 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति श्रुतेः । परिभूः इत्यस्य, स्वेन धाम्ना सदा अखिलदोषनिरसनशक्तिमान् इत्यर्थः । स्वतन्त्रार्थकस्वयंभूशब्देन 'सर्वधर्मोपपत्तेश्च' इति नयोक्तरीत्या गुणपूर्णत्व-दोषदूरत्वयोः सिद्धिः ॥ १६२ ॥

तेनाज्ञानामूलवस्तुत्वाच्चार्था ब्रह्मवत्सदा ।
परमार्था इति स्वोक्ते युक्तिं च प्रत्यपीपदत् ॥ १६३ ॥

अज्ञाननिरासेनाविद्याकार्यत्वरूपमिथ्यात्वनिरासः ॥ १६३ ॥

किञ्चाधिष्ठानयाथात्म्यद्रष्टृदृश्यत्वतश्च सत् ।
जगद्ब्रह्मवदेवेति युक्तिं वक्ति कवेर्गुणः ॥ १६४ ॥

'अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत् । सर्वापरोक्षविद्विष्णुर्विश्वदृक् तत्र तन्मृषा' इति आगमिकयुक्तिः कविशब्देन ज्ञाप्यते इत्याह **किञ्चेति** ॥ १६४ ॥

अनीदृग्जगतो ब्रह्मभेदं सर्वेशतां गुणान् ।
दोषोद्धूननशक्तिं च वक्ति सर्वपदावली ॥ १६५ ॥

तदेवं 'सर्वत्राखिलसच्छक्तिः स्वतन्त्रोऽशेषदर्शनः' इति तत्त्वोद्योतपद्यगतविशेषणविवृतिः श्रुतिद्वयेन लब्धा । 'नित्यातादृशचिच्चेत्ययन्तेष्टो नो रमापतिः' इत्युत्तरार्धस्य विवरणप्रकारं विशदयति **अनीदृगिति।** तेन मुक्तामुक्तनियामकत्वसिद्ध्या भेदसौरभार्थसिद्धिरिति ॥ १६५ ॥

अल्पज्ञत्वविहीनत्वात्सावद्यधिषणोज्झितेः ।
अपूर्णयत्नशून्यत्वादन्याधीनेच्छताच्युतेः ॥ १६६ ॥

नित्यातादृशत्वलाभप्रकारमाह **अल्पज्ञत्वेति**। तदेतेन 'चिच्चैत्ये केनचिन्नियते अपर्याप्तशक्त्यादिमत्त्वात्' इति प्रयोग उक्तो ज्ञेयः ॥ १६६ ॥

जीवाभिन्नो निर्गुणश्च भावाज्ञानसमावृतः ।
अल्पेश्वरश्च घटवद्यस्मान्नासीन्महाप्रभुः ॥ १६७ ॥

तस्माच्छ्रुतिद्वयं युक्तिव्रातमण्डनमण्डितम् ।
अलङ्करोति वाङ्नारीवदनं बुधसंसदि ॥ १६८ ॥

निर्गुणः निर्धर्मकः । तेन न साध्यवैकल्यम् ॥ १६७ ॥ १६८ ॥

यच्चिकेतेति वाक्चाह सत्यमेतज्जगत्त्रयम् ॥ १६९ ॥

अमोघत्वोक्तितश्चार्थक्रियाकारित्वयुक्तितः ।
ब्रह्मवत्सत्यता सर्वस्यापि साध्येत्यसूचयत् ॥ १७० ॥

'यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोतदाता' इति श्रुत्यन्तरेण विश्वसत्यत्वसिद्धिं सुबहुधा समर्थयते **यदित्यादिभिः** ॥ अस्यार्थो विष्णुतत्त्वनिर्णयटीकायामुक्तः । **'स्पार्हं** स्पृहणीयं हविरादिकं **वसु** भक्तेभ्यो **जेतोत** प्राप्ताऽपि तथा तेभ्यो स्पार्हं वसुफलं **दातोत** दाताऽपि परमेश्वरो यद्विश्वं **चिकेत** चकार तत्सत्यमित् सत्यमेव । कुतः । अर्थक्रियास्वनुपयुक्तं न भवति' इति । पद्मनाभतीर्थीये तु बल्यादिदैत्यराज्याख्यं स्पार्हं वसु जेता इन्द्रादिभ्यो दाता च इत्यर्थान्तरमुक्तम् । 'अर्थक्रियाकारित्वाच्च सत्यत्वसाधनं संभवति' इति वादावल्युक्तं प्रयोगमाह **अमोघत्वेति**। विमतं सत्यं अर्थक्रियाकारित्वात् ब्रह्मवत् इति ॥ 'न चात्मन्यर्थक्रियाकारित्वं नास्तीति वाच्यम्। तस्य निखिलप्रपञ्चकारणत्वेन श्रुतिशतसमधिगतत्वात् । सोऽपि पक्षनिक्षिप्तश्चेन्महायानिकपक्षपातः' इति वादावल्यां उक्तरीत्या साधनवैकल्यं न शङ्कनीयम् । अत्रैव वाक्ये चिकेत, दाता, जेता इति तदर्थक्रियाया वर्णनादिति भावः ॥ १७० ॥

स्पृहाविशेष्यतोक्त्या च सत्यत्वं प्रत्यबोधयत् ।
स्पृहणीयं यतो मोक्षसुखं सत्यं परस्य च ॥ १७१ ॥

तत्रैव प्रतिज्ञायां स्पृहाविशेष्यत्वरूपं स्पार्हपदोक्तं हेत्वन्तरमाह **स्पृहेति।** स्पृहाविषयत्वादित्युक्तौ भ्रान्तिकाले स्पृहाप्रकारे शुक्तिरूप्ये व्यभिचारः। अतः विशेष्यतापर्यन्तं धावनम्। पराभ्युपगममात्रेण मोक्षसुखं दृष्टान्त उक्तः इत्याह **परस्येति।** वस्तुतः अहमर्थस्य परमते मोक्षेऽभावेन 'अहं मोक्षसुखी स्याम्' इति स्पृहाप्रकारत्वमपि मोक्षसुखे न संभवतीत्याशयः॥ स्वमतेन तु पूर्वप्रयोग इव आत्मैव दृष्टान्तः। तस्यैव इष्टत्वेन इष्टसाधनत्वेन वा सर्वाधिकारि-स्पृहाविशेष्यत्वात्॥ १७१ ॥

विशिष्टकर्तृतायां च कर्तृत्वं चित एव हि।
किं कुंभकारो मृद्दण्डौ यद्विशिष्टः करोत्यसौ।
अतो निरुपमा ब्रह्मोपमा सत्यत्ववादिनाम् ॥ १७२ ॥

जेता दाता चिकेतेति ब्रह्मणोऽर्थक्रियाकृतिः।
त्रिधाऽपि बोधिता यस्मात्तस्माद्ब्रह्मोपमा मम॥ १७३ ॥

ननु अत्र मायाविशिष्टं ब्रह्म वा दृष्टान्तः शुद्धचिन्मात्रं वा। नाद्यः तस्य मिथ्यात्वेन साध्यवैकल्यात्। न द्वितीयः। उदासीनस्वभावस्य तस्य कर्तृत्वायोगेन साधनवैकल्यादिति। मैवम्। पक्षद्वयेऽपि न दोषः। आद्ये मायाशब्देन ब्रह्माधीनप्रकृतिरेव मायाशब्दार्थः। तद्विशिष्टब्रह्मणि कर्तृत्वविधिः, विशेषणे जडप्रकृतौ इच्छाघटितकर्तृत्वस्य बाधेन, 'विशिष्टविधिः सति विशेषणे बाधे विशेष्यमुपसंक्रामती'ति न्यायेन, प्राप्ताप्राप्तविवेकेन विशेष्यं ब्रह्मैवोपसंक्रामति। अतो ब्रह्मोपमा ब्रह्मदृष्टान्तः निरुपमा निर्दोषेत्याह **अत इति** पूर्वोक्तन्यायस्योपपादनं **किमिति।** द्वितीयेऽपि 'साधकत्वं सतस्तेन साक्षिणा सिद्धिमिच्छता स्वीकृतं' इत्युक्तदिशा चिन्मात्रेऽप्यर्थक्रियायास्तेनाङ्गीकर्तव्यत्वादिति दूषणं बहिरेवोह्यम्॥ ॥१७२ ॥ १७३ ॥

मोघत्वोक्तेरयुक्तेश्च जगत्यर्थक्रियाकृति ।
अनुक्तेश्चाखिलैर्मोघपदमेव नञः पदम् ॥ १७४ ॥

न सत्यं इति योजना तु सर्वथा न शङ्काऽर्हेत्याह **नञः पदमिति**। नञा योजनाऽर्हमित्यर्थः ॥ आकांक्षासन्निधियोग्यतानां अभावान्नञः न सत्यपदेनान्वय किं तु मोघपदेनैवेति भावः ॥ १७४ ॥

सुशोभिपदविन्यासव्यत्यासं श्रुतिसुन्दरी ।
कदध्वनिसहेतापि न सहेत सदध्वनि ॥ १७५ ॥

'यदद्वैतं न पश्यति न तु तद्द्वितीयमस्ति' इत्यादौ यत्र क्वचिद्विप्रकृष्टे-नान्वयस्तु योग्यताविरहादिति साहित्यमुद्रयाऽऽह **सुशोभीति। कदध्वनि** योग्यतारहिते ॥ १७५ ॥

न चेत्स्पार्हत्ववाक्कुप्येदप्येति च मतं तव ।
स्तुतिश्रुतिरियं कुप्येत्तृप्येद्धुक्त्या कथं भवान् ॥ १७६ ॥

एवमपि न सत्यमित्यन्वयदुराग्रहे बहुविप्लवापत्तिमाह **न चेदिति। अप्येति** हीयते। व्यावहारिकस्य अर्थक्रियायाः स्वमतत्वात्। सत्यधर्मपराक्रमः इत्यस्य व्याख्यानं, परेणापि विष्णुसहस्रनामभाष्ये सत्या अवितथा धर्माः ज्ञानादयो गुणाः, पराक्रमश्च यस्य सः इत्येवं कृतमिति तद्विरोधश्च। **स्तुतिश्रुतिरिति** तदभिमानिनी दुर्गा इत्यर्थः। **कुप्येत्** स्तुतिपरां श्रुतिं भगवन्महिमापलापेन निन्दापरतया योजयितारं तमसि क्षिपेदित्यर्थः। **कथमिति**। भोजनस्य तृप्तिरूपार्थक्रियाऽनङ्गीकारादिति भावः ॥ १७६ ॥

प्रागुक्तश्रुतियुग्मार्थतिग्मभानू च कुप्यतः ।
अतो नञोऽपकर्षे स्यादपकर्षो महांस्तव ॥ १७७ ॥

एकस्यामुपपत्तौ च वाक्यं तात्पर्यवत्किल ।
बहूपपत्तियुक्तेषु महातात्पर्यमेषु तत् ॥ १७८ ॥

श्रुतियुग्मम् । 'कविर्मनीषी' 'विश्वं सत्यं' इति श्रुतिद्वयम् । **तिग्मभानू** सूर्यौ । **कुप्यतः** मिथ्यासिद्धान्तदुर्ध्वान्तं निकृन्ततः । **अपकर्षः** नीचत्वम् ॥ १७७ ॥ १७८ ॥

अतः श्रुतिमहातात्पर्यस्य गोचरभावतः ।
ब्रह्मवज्जगदेतच्च परमार्थसदेव हि ॥ १७९ ॥

गोचरभावतः विषयत्वात् ॥ १७९ ॥

युक्तीः पश्य श्रुतीः पश्य मिथ्यादृष्टिं परित्यज ।
सत्यं वद जगत्सर्वं भुक्तिं मुक्तिं यदीच्छसि ॥ १८० ॥

युक्तीः स्रष्टृसृज्यभावः जेतृजेतव्यभावः, दातृदेयभावः इत्यादिभेदसत्यत्वसाधिकाः । **सर्वं** पञ्चभेदात्मकम् ॥ १८० ॥

सद्युक्तिहस्तिरथ्यश्वपत्त्युत्पत्त्योत्तरोत्तरा ।
इयं वाणी मृडानी क्व क्वाऽऽनीतानीकिनी तव ॥ १८१ ॥

'सूत्रस्यन्दनवृन्दाढ्या दुर्वारश्रुतिवारणा । सूपपत्तिमहापत्तिर्विचित्रस्मृतिसप्तिका' इति अभियुक्तोक्तिदिशाऽऽह **सद्युक्तीति** । **मृडानी** दुर्गा । **आनीता** बाधिता । दुर्गाया हठादाकर्षणपरा कंसव्यापृतिरिवेति ध्वनिः ॥ १८१ ॥

आदिसृष्टौ ततः कुर्यात्कल्पे कल्पे महाप्रभुः ।
सत्यं प्रकृत्युपादानं सर्वं जगदिति स्थितम् ॥ १८२ ॥

सर्वं 'स इदं सर्वमसृजदि'ति श्रुतेः ॥ १८२ ॥

एवं मृदाद्युपादानैर्निमित्तैर्दण्डपूर्वकैः ।
कुम्भकारकुविन्दाद्याः कुर्युर्घटपटादिकम् ॥ १८३ ॥

शून्यवादे संवृत्येव अद्वैतब्रह्मवादे अज्ञानेनैव सर्वकार्योत्पत्त्यङ्गीकारे घटादितत्तत्कार्यार्थिभिः कुलालादिभिः नियतदण्डमृदादितत्तत्करणानुसरणं विरुध्यते । तदुक्तं अनुव्याख्याने 'कार्यार्थी कारणं सच्च नोपादद्यात्कथंचन । न

प्रवर्तेत चेष्टाय शून्यादेवेष्टसंभवात्' इति । कार्यकारणात्मकविश्वस्य सत्यत्वाङ्गीकारे तु नैष दोषः इत्याह **एवमिति** ॥ १८३ ॥

यद्यज्ञानमुपादानं मृदानयनयत्नवत् ।
तदर्थमपि किं कोऽपि यत्नं कुर्यान्न कुत्रचित् ॥ १८४ ॥

यत्नवत् यत्नमिव 'तत्र तस्येवे'त्यस्य प्रायिकत्वात् ॥ १८४ ॥

अन्वयव्यतिरेकाभ्यां कार्यकारणतेयते ।
अन्यथा रासभस्यापि कारणत्वं कथं न ते ॥ १८५ ॥

मृदादेः घटादिकारणतायामिव अज्ञानस्य प्रपञ्चकारणतायां अन्वयव्यतिरेकौ न स्तः । एवमपि कारणत्वाभ्युपगमेऽतिप्रसङ्गमाह **अन्यथेति** ॥ १८५ ॥

अज्ञानोपादानकत्वं तदसिद्धं घटादिषु ।
कथं मिथ्यात्वसिद्ध्यै स्यान्न ह्यसिद्धस्य हेतुता ॥ १८६ ॥

तथा च प्रयुज्यते प्रपञ्चः न अविद्याकार्यः तदन्वयव्यतिरेकाननुविधायित्वात् । यथा घटः न तन्तुकार्यः । सामान्यव्याप्तिः ॥ १८६ ॥

अधिकार्याद्यभावस्य परिहाराय सूत्रितम् ।
यत्सूत्रं तत्र सर्वस्याभावे भावः कथं वद ॥ १८७ ॥

प्रथमं खलु सूत्रं अधिकार्यादिसद्भावं समर्थ्य तत एव जिज्ञासायाः कर्तव्यतां संसाध्य शास्त्रारम्भं प्रयोजयति । अधिकार्यादिकस्य मिथ्यात्वे सूत्रस्यैवानारंभणीयत्वापत्त्या तद्भाष्यकरणोद्यमः स्वव्याहत इत्याह **अधिकारीति** ॥ १८७ ॥

अथ बन्धनिवृत्तिर्हि प्रयोजनमिहोदितम् ।
बन्धस्य ज्ञानतो नाशः श्रुत्या सूत्रेण चोच्यते ॥ १८८ ॥

सौत्रप्रयोजनाक्षिप्तं बन्धमिथ्यात्वमिति परमतमनुवदति **अथेति**। **श्रुत्या** 'तमेवं विद्वानमृत इह भवति' इत्यादिकया । **सूत्रेण** ज्ञानेन बन्धनिवृत्तिं प्रतिपादयता प्रथमसूत्रेण ॥ १८८ ॥

तच्चासंभवि यज्ज्ञानमज्ञानस्यैव नाशकम् ।
इति व्याप्तिस्तदज्ञानोपादानत्वमपीष्यते ॥ १८९ ॥

तच्च ज्ञाननिवर्त्यत्वं च । **असंभवि** बन्धस्य वस्तुकृतत्वे इति शेषः । **तत्** तस्मात् बन्धस्येति पूर्वश्लोकादनुकर्षः । **इष्यते** आक्षिप्यते ॥ १८९ ॥

इदमेव च मिथ्यात्वमतस्तच्छ्रुतिसूत्रयोः ।
यद्यार्थिकमिति ब्रूषे तर्हि दोषेषु मज्जसि ॥ १९० ॥

आर्थिकं अर्थाक्षिप्तम् ॥ **दोषेषु** आक्षेपकस्य अप्रमितत्वं, अन्यथैवोपपत्तिः अन्यथाऽप्युपपत्तिः आक्षेप्यस्य अनुपपादकत्वं प्रमाणविरुद्धत्वं च इत्येवंरूपेषु अर्थापत्तिदोषेषु ॥ १९० ॥

अनादिः किल संसारस्तवापि च ममापि च ।
यदनादि न तत्कार्यमिति व्याप्तिर्बलीयसी ॥ १९१ ॥

तवार्थिकार्थमत्यर्थमनर्थीकुरुते न किम् ।
इदं तु भाष्यकारस्य महदासीदकौशलम् ॥ १९२ ॥

बन्धस्य अज्ञानोपादानकत्वलक्षणं मिथ्यात्वं हि आक्षेप्यम्। तच्च प्रमाणविरुद्धमित्याह **अनादिरिति**। अनादि च कार्यं चेति विरुद्धम् । **इदं** अनादेः कार्यताकल्पनम् ॥ १९२ ॥

अनादृत्य श्रुतिं व्याप्तिमसतीमनुसृत्य च ।
मनोरथसुतस्स्वस्य यतो गर्भस्रुतोऽपतत् ॥ १९३ ॥

श्रुतिं ज्ञानस्य साक्षात् बन्धनिवृत्तिप्रतिपादनपराम् । **अनादृत्य** अपलप्य । **असतीं व्याप्तिम्**। ज्ञानमज्ञानस्यैव निवर्तकं इत्येवं असाधुभूताम् । **मनोरथसुतः**

अज्ञानोपादानकत्वरूपमिथ्यात्वं साधयामीत्येवं सङ्कल्पः । **गर्भस्रुतः** प्रतिज्ञाया एवासंभावितत्वेन साधनानर्हः । यदुक्तं 'संभावितः प्रतिज्ञाया अर्थः साध्येत हेतुना । न तस्य हेतुभिस्त्राणं उत्पतन्नेव यो मृत' इति ॥ १९३ ॥

अज्ञानोपादानकत्वं मिथ्यात्वं भवबन्धने ।
आनेतुं किल तद्यत्नस्स्रोऽनादिस्सहते न तत् ।
तद्रीत्यैव न मद्रीत्या चित्रा भाष्यस्य सङ्गतिः ॥ १९४ ॥

असंभावितत्वमेव विवृणोति **अज्ञानेति** ॥ १९४ ॥

युक्तिः श्रुतिं जयति चेद्विरुद्धैक्यमतं गतम् ।
युक्तिं श्रुतिर्जयति चेद्बन्धं छिन्द्याद्दृशिस्स्वयम् ॥ १९५ ॥

युक्तिः ज्ञानमज्ञानस्यैव निवर्तकं इत्येवंरूपा । **श्रुतिं** दृष्ट्वैव तं मुच्यते इति ज्ञानेन साक्षादेव बन्धनिवृत्तिं अभिदधतीम् । **जयति चेत्** बाधते चेत् । **ऐक्यमतं** तत्त्वमसिश्रुतिसिद्धत्वेनाभिमतम् । **गतं** बाधितम् । तत्र हेतु**र्विरुद्धेति** । विरुद्धधर्माधिकरणत्वरूपयुक्तिविरुद्धम् । त्वयैव युक्तेः प्राबल्योक्तेः । पक्षान्तरं शङ्कते **युक्तिं** इति । दूषयति **दृशिरिति** । 'दृष्ट्वैव तं मुच्यते' इत्युक्तः साक्षात्कारः **छिन्द्यात्** साक्षादेव नाशयेत् । अतो न मिथ्यात्वप्रत्याशा इति उभयतः पाशारज्जुः । ऐक्यं सन्धित्सतो मिथ्यात्वस्य च्यवनात् ॥ १९५ ॥

यदि श्रुतिरपेक्ष्या ते भावोऽनादिर्विनश्यतु ।
यदि श्रुतिरुपेक्ष्या ते भावोऽनादिर्न नंक्ष्यति ॥ १९६ ॥

किं च तिष्ठतु तत्त्वमसि श्रुतिः । **श्रुतिः** दृष्ट्वैवेति श्रुतिः । भावोऽनादिरिति अविनाशकयुक्तिमाभासीकृत्य बन्धः विनश्यतु साक्षादेव ज्ञानेनेति पूरणीयम् । **न नंक्ष्यति** । त्वयैव श्रुतेराभासीकरणेन नाशे प्रमाणाभावादेवेति भावः ॥ १९६ ॥

उपादानमुपादेयसमानाश्रयमेव यत् ।
अनादिबन्धस्याधारो जीव एव ततस्तव ।
अज्ञानाधारतां प्राप्त इत्यप्यासीद्धि सङ्कटम् ॥ १९७ ॥

कुम्भकारस्य शालैव कपालस्य घटस्य च ।
आधारो दृश्यते स्थानभेदो न ह्यनयोः क्वचित् ॥ १९८ ॥

भ्रमोपादानत्वमज्ञानस्य लक्षणं इति हि त्वन्मतम् । उपादानोपादेययोः समानदेशता स्थिता । कपालघटादिषु तथाभावदर्शनात् । भ्रमश्च जीवाश्रितः । तथा चाज्ञानस्यापि जीवाश्रितत्वं आस्थेयम् । तच्च 'पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवती'ति त्वत्प्रक्रियाविरुद्धमित्याह **उपादानेति** ॥ १९७ ॥ १९८ ॥

यस्मादनादि तेऽज्ञानं स्वोपादाने न तिष्ठति ।
तस्माच्छालावदुभयोरप्याधारस्स एव हि ॥ १९९ ॥

स्वोपादानस्यैवाभावेन तत्र स्थितिरसंभाविनीत्याह **नेति** । अतो भ्रान्त्या सहैव स्थातव्यम् । **स एव** जीव एव । तच्च त्वत्प्रक्रियाविरुद्धमित्युक्तम् ॥ १९९ ॥

अनादिभावरूपं ते यदज्ञानमभीप्सितम् ।
अनादिभावरूपं च वस्तु नैव निवर्तते ॥ २०० ॥

'अनादिभावरूपस्य विज्ञानविलापनाऽसंभवाच्च ब्रह्मवत्' इति वादावल्युक्तमाह **अनादीति** ॥ २०० ॥

इति व्याप्तिश्च तज्ज्ञानमज्ञानं नाशयेत्कथम् ।
उपसर्पसि सर्पस्य बिलं वृश्चिकभीतितः ॥ २०१ ॥

वृश्चिकः ज्ञानेन साक्षादेव बन्धनाशः । **सर्पः** अज्ञानस्य सर्वथा नाशाभावः ॥ ॥२०१ ॥

अनादेरपि बन्धस्य नाशः स्याद्धि श्रुतेर्बलात् ॥ २०२ ॥

स्वमते श्रुतेः शरणीकरणान्न कोऽपि दोष इत्याह **अनादेरिति** ॥ २०२ ॥

अयं तु यौक्तिको नाशः प्रतियुक्तिहतो यतः ।
अतो व्याप्तिद्वयबलादभावाज्ञानमस्तु तत् ॥ २०३ ॥

ज्ञानमनादेरपि ज्ञानप्रागभावस्य नाशकमित्यत्रानुपपत्त्यभावाद्व्याप्तिद्वयमपि रक्षितं भवतीति भावः ॥ २०३ ॥

अनादिभावो ब्रह्मैव नैव नाश्यो यतो ध्रुवम् ।
अतो विनश्यदज्ञानमभावाज्ञानमेव हि ॥ २०४ ॥

भावरूपत्वे तु अविनाशो दोषो वज्रलेप इत्याह **अनादीति** ॥ २०४ ॥

उपादानं तु नाभावस्ततस्तन्नाशनेऽपि ते ।
संसारनाशो नैवेति व्यर्थाऽर्थापत्तिरापतेत् ॥ २०५ ॥

अस्त्वज्ञानं ज्ञानाभावः, कीदृशो दोष इत्यत आह **उपादानं त्विति** । एवं च बन्धस्य ज्ञाननिवर्त्यत्वं न सिद्ध्यतीति आक्षेपकस्य अप्रमितत्वं अर्थापत्तिदोष इत्याह **व्यर्थेति** ॥ २०५ ॥

यद्याग्रहस्ते भावत्वे नाशस्याशां तदा त्यज ।
अनष्टाज्ञानतोऽपि स्यान्मोक्षः पाशात्पशोरिव ॥ २०६ ॥

अज्ञाननाशाभावे कथं मोक्ष इत्यतः अज्ञानापसरणत एवेत्यवेहि । तत्र दृष्टान्तः **पाशादिति** ॥ २०६ ॥

एवं च ज्ञाननाश्यत्वं गतं त्रिजगतो मम ।
यतो जगदुपादानमज्ञानं च न नश्यति ॥ २०७ ॥

तथा च जगतो रक्षणं निष्प्रत्यूहमिति मदिष्टसिद्धिरित्याह **एवं चेति** ॥ २०७ ॥

बन्धनाशस्तु विज्ञानादज्ञानापसृतेः परम् ।
वाच्यस्त्वया यतोऽनादिर्भावार्थो न निवर्तते ॥ २०८ ॥

नाशस्यासंभवादपसृतिरेव गतिरज्ञानस्येत्याह **बन्धेति** ॥ २०८ ॥

**किञ्चाज्ञानापसरणं तत्संयोगविनाशनम् ।
बन्धश्चाज्ञानसंयोग इति वाच्यं खलु त्वया ।
स चानादिस्ततोऽप्यासीत्प्रक्रिया विक्रियैव ते ॥ २०९ ॥**

**पक्षद्वयेऽप्यनिष्टं ते रूक्षमासीद्विचारय ।
विचार्यमाणेऽनादित्वं भावत्वं च द्वयोश्च यत्॥ २१० ॥**

उपेत्यैवापसृतिरुक्ता । वस्तुतः साऽपि त्वत्प्रक्रियायां न संभवत्येव । अपसृतिः बन्धसंयोगनाश एवैष्टव्यः । संयोगोऽपि अज्ञानवदनादिरिति तव प्रक्रिया । 'अविद्यातच्चितोर्योगः षडस्माकमनादयः' इति त्वद्वचनात् । तथा च भावरूपत्वादज्ञानस्येव संयोगस्यापि नाशोऽप्ययुक्त एवेत्याह **किं चेति** ॥ २०९ ॥ ॥२१० ॥

**व्याप्त्येकशरणोऽसि त्वं व्याप्तिश्चात्र बलीयसी ।
श्रुतेः पादानुसरणे हता ते व्याप्तिसुन्दरी ॥ २११ ॥**

हता श्रुतिविरोधरूपहृदयाघातेन । **व्याप्तिसुन्दरी** ज्ञानमज्ञानस्यैव निवर्तकमित्येवंरूपा । सुन्दरीति विपरीतलक्षणया । दृष्टान्ताभावाद्रूपविकलेति हृदयम् ॥ २११ ॥

**ममत्वनादेर्बन्धस्यापि स्यान्नाशः श्रुतेर्बलात् ।
ततो नात्रैव सा व्याप्तिरिति सिद्ध्येन्मनोरथः ॥ २१२ ॥**

अत्रैव न । श्रुत्या नाशस्य प्रमितेस्तत्रानुमानस्याप्रसरात् । अन्यत्र श्रुतिविरोधाभावे वर्णाकाशादिस्थले नाशाभावोऽङ्गीक्रियत एवेति भावः ॥ २१२ ॥

**ये तु श्रुतिमनादृत्य व्याप्तेः पृष्ठमुपासते ।
तेभ्यो मदुक्तयुक्तीनां पृष्ठं कस्मान्न रोचते ॥ २१३ ॥**

सत्यत्वप्रतिपादके श्रुतिसूत्रे अनादृत्य स्वच्छन्दं प्रवर्तमानस्य तव तु अन्यत्रादृष्टस्यानादेर्बन्धस्य नाशो नाङ्गीकारार्हः । अदृष्टकल्पनाऽऽपत्तेरित्याह **ये त्विति । मदुक्तेति** अनादिभावो न निवर्तते इत्युक्तेरित्यर्थः ॥ २१३ ॥

अनादिभावनाशोऽयं यद्यदृष्टस्त्वयेष्यते ।
ज्ञानाद्बन्धस्यैव नाशस्तर्ह्यदृष्टः कुतो न ते ॥ २१४ ॥

तर्हीति अदृष्ट इत्यापाततः । श्रुतिसूत्रदृष्टत्वादित्यनुपदं उक्तेः ॥ २१४ ॥

तपोऽतप्यत किं किञ्चिद्भवतोऽदृष्टकल्पना ।
सौमङ्गल्यमियं धत्ते श्रुतिसूत्रार्थपोषणात् ॥ २१५ ॥

तप इति । व्याप्तेस्त्वदुक्तो विशेषभावस्तु अव्यभिचारादिसंपत्त्यभावेऽकिञ्चित्करोऽतिप्रसङ्गावहश्चेति सुधोक्तमत्रानुसन्धेयम् । अतः तव कल्पना दृष्टान्तरूपभर्तुरभावात्, श्रुत्या बन्ध एव व्यभिचरितत्वात् विधवा व्यभिचारिणी च । मम व्याप्तिस्तु श्रुतिसूत्रार्थानुसारिणी, कर्णभूषण-सौमङ्गल्यसूत्रालंकृता सुवासिनीत्याह **इयमिति** ॥ २१५ ॥

तत्रैव चेयं दृष्टार्था नाभूच्चादृष्टकल्पना ।
भवतः कल्पनामूलं न चाक्षं नागमोऽनुमा ॥ २१६ ॥

कल्पनाया अदृष्टत्वं नाम प्रमाणामूलत्वम् । तच्च सकलप्रमाणविरुद्धत्वात् तव कल्पनाया एव । नत्वेत्र श्रुतिसूत्रमूलाया मम व्याप्तेरित्याह **तत्रेति ।** श्रुतिसूत्रयोरित्यर्थः ॥ २१६ ॥

ज्ञानाभावस्य तु ज्ञानं नाशकं नाश एव वा ।
भावरूपं तवाज्ञानं ज्ञानान्नश्यत्क्व दृश्यते ॥ २१७ ॥

ज्ञानं ज्ञानोत्पत्तिक्षण इत्यर्थः । न हि भाव स्वप्रागभावनिवर्तकः । अपि तु भावोत्पत्तिरेव तत्प्रागभावनिवर्तिका। इति वादावल्युक्तेः । **नाश इति ।**

अभावविपत्तिरेव प्रतियोग्यापत्तिरिति स्थितेः। पक्षद्वयेऽपि ज्ञानाभावपक्षे तन्नाशः सूपपादः। भावपक्षे तु सर्वथा नाशो दुर्घट इत्याह **भावरूपमिति** ॥ २१७ ॥

शब्दसाम्येन तु व्याप्तिस्स्वर्गशृङ्गित्वसाधिका।
शब्दसाम्यं च नास्त्यत्र यत्तेऽज्ञानं परस्य न ॥ २१८ ॥

यतस्साधकमानाख्यपतिर्व्याप्तेर्मृतोऽभवत्।
अतस्ते विधवासङ्गान्महान्दोषो भविष्यति ॥ २१९ ॥

अज्ञानं निवर्तते अज्ञानत्वात् ज्ञानाभाववदिति शब्दसाम्यमाश्रित्य प्रयुज्यते इति चेदतिप्रसङ्गमाह **स्वर्ग इति**। तत्रापि स्वर्गस्य गृष्टेश्च गोशब्दसाम्यसद्भावादिति भावः। नास्त्यपि च प्रकृते शब्दसाम्यं अभिधानाभावेन प्रतिवाद्यसंमतेरित्याह **ते अज्ञानमिति** ॥ २१८ ॥ २१९ ॥

व्याप्तिभङ्गाज्जगद्भङ्गं दोषं मन्ये महत्तरम् ॥ २२० ॥

महत्तरमिति 'त्यजेदेकं कुलस्यार्थे' इति न्यायादिति भावः ॥ २२० ॥

नित्यं स्वरूपविज्ञानं स्वकार्यैस्सह वर्तते।
इति तेऽभिमतं तस्मात्तत्रावरणवाग्वृथा ॥ २२१ ॥

आवृणीते मनोवृत्तिज्ञानमित्येव तत्त्वया।
वाच्यमावरणं तस्मात्कथं नान्योन्यसंश्रयः ॥ २२२ ॥

किं च तवाज्ञानं न तावत्स्वरूपज्ञानं आवृणोति। तस्य नित्यं स्वप्रकाशत्वात्। नापि मनोवृत्तिज्ञानम्। आवरणनिवृत्त्युत्तरकालीनाया वृत्तेरावरणनाशकत्वायोगात्। तदङ्गीकारे चान्योन्याश्रय इत्याह **नित्यमिति** ॥ २२१ ॥ २२२ ॥

यदावरणनाशे स्यादपरोक्षप्रमा तव।
तयैव तस्य नाशे च कथं नान्योन्यसंश्रयः ॥ २२३ ॥

उपपादयति **यदिति** ॥ २२३ ॥

सत्येवावरणे दृष्टिरपूर्वेति मतिर्मम ।
यतः कुड्यावृतघटे न कस्याप्यपरोक्षधीः ।
अन्येनावरणच्छेदे पश्चादेव हि तस्य दृक् ॥ २२४ ॥

तदावरणे सत्येव तदपरोक्षप्रकाशो न दृष्टचर इत्याह **सतीति**। आव्रियमाणेनैवावरणनाशोऽपि दुर्घट इत्याह **अन्येनेति** ॥ २२४ ॥

अदृष्टकल्पना चेत्स्यात्कृता व्याप्तिर्दिगन्तरम् ।
अकल्पितं जगदभूत्सूत्रमासीन्निराकुलम् ॥ २२५ ॥

निराकुलं ज्ञानेन साक्षादेव बन्धनिवृत्तिसिद्धेः ॥ २२५ ॥

ब्रह्मण्यखण्डे तच्छब्दैस्तेऽस्त्यथाप्यपरोक्षधीः ।
अज्ञानस्य निवृत्तिर्न कथं तत्तस्य नाशकम् ॥ २२६ ॥

'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः । अविद्या सहकार्येण नासीदस्ति भविष्यति' इति मायिप्रक्रिया । जातायामपीदानीं तादृशधियां अज्ञाननाशो नानुभूयते इत्यतोऽपि तव व्याप्तिरनानुभाविकीत्याह **ब्रह्मणीति** ॥ ॥२२६ ॥

गुरूपसत्तिवेदान्तश्रवणाद्यैरुपस्कृतम् ।
नाशकं चेत्तर्हि घटे कथं वृत्त्यैव तत्क्षयः ॥ २२७ ॥

ननु सम्यग्धीरेवाज्ञाननाशिका । सम्यक्त्वं च गुरूपसत्त्यादिसहकृतत्वमिति चेत् एवं तर्हि अतादृश्या घटवृत्त्याऽज्ञाननाशो न स्यादित्याह **गुर्विति** ॥ २२७ ॥

श्रुतेर्बलादिहैवं चेत्तर्ह्यध्वनिसमागतम् ॥ २२८ ॥

इह चरमवृत्तौ । एवं गुरूपसत्त्यादिसहकारः ॥ २२८ ॥

दृष्ट्वैव मुच्यत इति श्रुतिर्बलवती हि नः ।
अतो ज्ञानादेव बन्धनाशोऽप्यस्तु श्रुतेर्बलात् ॥ २२९ ॥

एवं श्रुतौ श्रद्धालुना 'दृष्ट्वैव' इति श्रुतावपि दीयतां दृष्टिरित्याह **दृष्ट्वेति** ॥ ॥२२९ ॥

विलक्षणा हि सामग्री कार्यं कुर्याद्विलक्षणम् ।
तस्माद्विलक्षणार्थत्वाद्बन्धो ज्ञानेन नश्यतु ॥ २३० ॥

विलक्षणा श्रवणाद्युपस्कृतचरमवृत्तिलक्षणा । **विलक्षणं** आवरणनिवृत्तिलक्षणम् । **तस्मात्** ब्रह्मज्ञानस्यैव बन्धविनाशकसामग्रीत्वेन प्रमितत्वात् । तथा च विनाशरूपकार्यस्य प्रमाणेन क्लृप्ता या विनाशकसामग्री तस्याः समवधानमेव प्रयोजकम् । अन्यत्र क्वचिददर्शनमात्रं न नियामकमिति भावः ॥ २३० ॥

दृष्टानुसरणत्यागो यथा तत्र तथाऽत्र च ।
गुण एवास्तु दोषस्ते मिथ्यात्वस्यैव कल्पनम् ॥ २३१ ॥

दृष्टस्य श्रवणादिनिरपेक्षज्ञाननिवर्त्यत्वस्य घटाद्यज्ञाने दृष्टस्य **अनुसरणत्यागो यथा तत्र** चरमवृत्तिनिवर्त्यप्रपञ्चोपादानाज्ञाने तथा **अत्र** ज्ञानस्य साक्षाद्बन्धनिवर्तकत्वं इत्यत्र त्यागः **गुण एव** 'दृष्ट्वैव तं मुच्यते' इति श्रुतेरादरणात् । अस्तु इति पराभ्युपगमस्य तत्राप्यप्रामाण्यसूचकः । श्रवणादिना अखण्डार्थ परचरमवृत्त्यजननात् तादृशवृत्त्याऽज्ञाननाशासंभवात् समानप्रकारकयोरेव ज्ञानाज्ञानयोर्निवर्त्यनिवर्तकभावक्लृप्तेरिति हृदयम् ॥ २३१ ॥

यस्मादसङ्गतं ह्येतदयुक्तं चोक्तवर्त्मना ।
अनादिभेदमिथ्यात्वाप्राप्त्या व्यर्थं च तेऽन्ततः ॥ २३२ ॥

असङ्गतं अनादेर्बन्धस्य निरुपादानकत्वात् । **अयुक्तं** ज्ञानस्य स्वावरणनिवर्तकत्वायोगात् । **व्यर्थं** त्वदभिमतैक्यस्य कथमप्यसिद्धेः ॥ २३२ ॥

ऐक्यस्य सिद्धये भेदमिथ्यात्वे ते महान्भरः ।
तस्यैतेनाप्यसिद्धिश्चेज्जगन्मिथ्यात्वतोऽपि किम् ॥ २३३ ॥

किमिति सार्वज्ञादिमिथ्यात्वेऽपि भेदबाधासिद्धेः इति भावः। तथा च भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्यायपतितोऽसीत्याशयः ॥ २३३ ॥

अतस्सूत्रार्थकथनान्निवर्तस्व सुखी भव।
यद्वा सूत्रार्थकुशलानुपास्स्व नृहरेर्भटान् ॥ २३४ ॥

निवर्तस्व अहं अवैदिक इत्येव छद्मना विना ख्यापय। **सुखी भव।** वाक्यलिङ्गकानुमा। प्रतारणेन सात्त्विकान् दुःखिनो मा कृथा इति भावः ॥ २३४ ॥

किञ्च ज्ञानेन दुष्कर्मनाशस्साक्षाच्छ्रुतौ श्रुतः।
तदा विद्वान्पुण्यपापे विधूयेति न किं श्रुतिः ॥ २३५ ॥

सत्यस्यैव साक्षाज्ज्ञाननाशे सोपपत्तिकं श्रुत्यन्तरमाह **तदेति** "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इति श्रुतिमनेनोपादत्ते ॥ २३५ ॥

इयं विधूयेति पूर्वं कर्मनाशमुदीर्य हि।
पश्चान्निरञ्जन इति वक्त्यज्ञानस्य नाशनम् ॥ २३६ ॥

इयं च श्रुतिरुपलक्षणम्। 'क्षीयन्ते चास्य कर्माणि' 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इत्यादिश्रुतिस्मृतयोऽपि ग्राह्याः ॥ २३६ ॥

अतस्साक्षाज्ज्ञाननाश्यं कर्म नासीत्कथं वद।
सूत्रकृच्चोत्तराघस्य ज्ञानेनाश्लेषमञ्जसा ॥ २३७ ॥

पूर्वाघस्य विनाशञ्च स्वयमेव वदिष्यति।
अतोऽर्थोऽयमनर्थस्ते श्रुतिसूत्रविरोधतः ॥ २३८ ॥

सूत्रेति 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ' इतिसूत्रेत्यर्थः। त्रैकालिकनिषेधप्रतियोगित्वे अश्लेषविनाशौ कथं ब्रूयादिति भावः ॥ २३८ ॥

व्याप्तिः कन्यैव यज्जाता कर्मणा खण्डितव्रता।
तदुद्वाहप्रयत्नस्ते कथं दोषाय नेष्यते ॥ २३९ ॥

कन्या दृष्टान्तरूपपत्यभावात्। **कर्मणेति** ज्ञानेन साक्षान्नाश्यत्वेन श्रुते सत्ये पुण्यपापकर्मणि व्यभिचरिता। **तदुद्वाहप्रयत्नः** तदुपष्टम्भेन ब्रह्मणः सार्वज्ञाद्यपलाप-दुःसाहसम्। **दोषाय** तमःपाताय ॥ २३९ ॥

यज्ज्ञानं तदनित्यं च यत्सुखं तद्विनाशवत्।
न चेदेतादृशव्याप्त्या नित्ये ज्ञानसुखे त्यज ॥ २४० ॥

'सहदर्शनमात्रेण न व्याप्तिरवसीयते' इत्यनुव्याख्यानं हृदि निधायाह **यदिति** ॥ २४० ॥

यदि व्याप्तिविरोधेऽपि श्रुतत्वात्तदपेक्षितम्।
तदा ज्ञानाद्बन्धनाशः श्रुतः कस्मादुपेक्ष्यते ॥ २४१ ॥

श्रुत्या यत्रापवादस्तत्र, अन्यत्र सहदर्शनमात्रमनादरणीयमेवेत्याह **यदीति** ॥ ॥ २४१ ॥

त्रिक्षणस्थायि यत्कर्म तस्य कालान्तरे भवन्।
स्वर्गस्तदैव साध्यस्स्यान्मध्येऽन्यद्यदि न विद्यते ॥ २४२ ॥

असतः कारणत्वं तु श्रुतेस्सूत्रकृतोऽपि न।
असतस्सत्कथं जायेतेति वेदोदितं स्मर।
अन्तराऽनुपपत्त्यैव ततस्तत्रान्यकल्पना ॥ २४३ ॥

'यथा वा श्रुतस्यैव यागस्य स्वर्गसाधनत्वस्योपपत्तयेऽपूर्वं कल्प्यते। तथा श्रुतोपपत्त्यर्थमेव बन्धमिथ्यात्वकल्पनमिति मैवम्। वैषम्यात्। युक्तं हि तत्रापूर्वकल्पनम्। यत्कालान्तरभावि न तत्कारणं इति नियमात्। न चेह तथाऽस्ति।' इति सुधामनुरुध्याह **त्रिक्षणेति** ॥ २४२ ॥ २४३ ॥

अतस्तवैष दृष्टान्तो दृष्टान्तस्त्वदकौशले ।
यद्बाह्यव्याप्तिवैरेण श्रुत्युक्तं त्वं जिहाससि ॥ २४४ ॥

जिहाससि इत्यनेन नास्माकं परस्येव श्रुत्युक्तत्यागः इति ज्ञापितम् । यागरूपकरणस्य व्यापारतयैवापूर्वकल्पनात् । विस्तरः तर्कताण्डवे 'स्वमतेऽपूर्वस्य कल्प्यत्वसमर्थनभङ्गे' ॥ २४४ ॥

येयं बाह्या च सन्दिग्धा स्खलद्व्याप्तिसहोदरी ।
श्रुतिसूत्रामतां तां तु जरद्वाराङ्गनां त्यज ॥ २४५ ॥

इयं अर्थापत्तिः । **बाह्या** अन्यथैव सत्यत्वेनैवोपपन्ना । **सन्दिग्धा** आक्षेपकस्य प्रमितत्वनिश्चयशून्या । **स्खलदिति** आभाससमानयोगक्षेमा । **श्रुतिसूत्रामता** प्रमाणविरुद्धमाक्षिपन्ती । व्यभिचारशीलत्वात् वाराङ्गना । अङ्गविकलत्वात् मिथ्यात्वप्रसूतियोग्यताविकलत्वात् जरती ॥ २४५ ॥

ज्ञानादद्वयोश्च नाशोऽस्तु व्याघ्राद्गोमृगयोरिव ॥ २४६ ॥

अज्ञानस्यैव नाशकमित्यत्र कर्मादिषु व्यभिचारापादकैवकारपरित्यागे नास्माकमनिष्टम् । बन्धमिथ्यात्वासिद्धेरित्याह **ज्ञानादिति** ॥ २४६ ॥

अभावाज्ञाननाशात्म न ज्ञानं तस्य नाशकम् ।
किं घटप्रागभावस्य घट एव विनाशकः ॥ २४७ ॥

परित्यागेऽपि परेण तु व्याप्तिर्दुरुपपादैवेत्याह **अभावेत्यादिभिः । नाशात्म** नाशस्वरूपम् । नाश्यनाशकभावे खलु सहावस्थानमपेक्षितम् । 'नाजात एकोन्यं हन्ति नाप्यन्यमन्याधार' इति वचनात् । न हि प्रागभावप्रतियोगिनोः सहावस्थानमस्ति । येन नाश्यनाशकभावः । तदुक्तं वादावल्यां 'भावाभावयोः सहावस्थानविरोधादि'ति ॥ २४७ ॥

मन्यते नान्यदज्ञानं प्रतिवादी ततस्तव ।
अज्ञाननाशकत्वं च ज्ञाने क्वापि न दृश्यते ॥ २४८ ॥

प्रतिवादी तार्किकः ॥ २४८ ॥

तस्यैव नाशकत्वं तु कुत्र वा दृश्यते वद ।
अस्याः प्रसाधनं तस्मादयश्चणकचर्वणम् ॥ २४९ ॥

अभावस्य विनाशस्तु प्रतियोगीति यन्मतम् ।
तत्तवापि मतं सर्ववादिनामपि संमतम् ॥ २५० ॥

तन्निदर्शनशून्यत्वादन्योन्याश्रयतश्च ते ।
व्याप्तिः प्रसाध्याङ्गिकापि नाभूद्गर्भस्त्रुताऽभवत् ॥ २५१ ॥

तस्य नाशकत्वं एव नास्ति । तस्यैव नाशकत्वं तु सुदूरे । साधनमशक्यमिति सदृष्टान्तमाह **अस्या इति** ॥ २४९ ॥ २५० ॥ २५१ ॥

किञ्च सर्वस्य कार्यस्य जन्मस्थितिविनष्टिषु ।
निमित्तमीश्वरज्ञानमस्तीत्यखिलसंमतम् ॥ २५२ ॥

"नन्वीश्वरज्ञानेन प्रपञ्चस्य निवृत्तिस्त्वयाऽपीष्यत एव। अन्यथा तस्य संहारकर्तृत्वानुपपत्तेः ज्ञानादिमत एव कर्तृत्वात्। सत्यम्। नैवं ज्ञाननिवर्त्यत्वं परस्याभिप्रेतम्। अपि तर्हि अज्ञानोपादानकस्य समाने विषये विरोधिना ज्ञानेनोपादाने निवृत्ते स्वयमेव विलपनम्" इति सुधोक्तवर्त्मना दूषयति **किञ्चेति** ॥ ॥२५२ ॥

दैनन्दिने च प्रलये नाज्ञानस्य विनाशनम् ।
तस्मात्साक्षादेव जगन्नाशकं जगदीशितुः ॥ २५३ ॥

ज्ञानमासीदतो ज्ञानमज्ञानस्यैव नाशकम् ।
इति व्याप्तिर्महालोकमध्येऽभूद्व्यभिचारिणी ॥ २५४ ॥

नेति । अज्ञानिनां संसारिणामनुवृत्तेः ॥ २५३ ॥ २५४ ॥

किञ्च साक्षाज्ज्ञाननाश्यं भवत्वज्ञानमेव ते ।
पारंपर्येण तन्नाश्यं ततोऽन्यच्च भवेत्किल ॥ २५५ ॥

किलेति परंपरया बन्धनाशकत्वं परेणापि स्वीकृतमिति प्रसिद्धिमाह ॥ ॥२५५ ॥

न चेज्ज्ञानविनाश्यत्वं कथ्यते जगतः कथम् ।
परंपरानाशकं च द्विविधं भुवि दृश्यते ॥ २५६ ॥

किञ्चिद्विनाश्यैव किञ्चित्ततोऽन्यस्य विनाशकम् ।
किञ्चिच्च किञ्चित्कृत्वैव पश्चादन्यस्य नाशकम् ॥ २५७ ॥

न चेत् परंपरा नाङ्गीक्रियते चेत् ॥ २५६ ॥ २५७ ॥

योऽयं तन्तुविभागेन तत्संयोगस्य नाशने ।
पटस्य नाशो भवति तदाद्यस्य निदर्शनम् ॥ २५८ ॥

आद्यं अभिनीय दर्शयति **योऽयमिति** । तथा च तन्तुविभागः पटस्य परम्परया नाशकः ॥ २५८ ॥

यत्तु पर्णतृणारण्याद्युत्पाद्याग्निशिखां पुरा ।
तया तमो नाशयति तद्द्वितीयनिदर्शनम् ॥ २५९ ॥

द्वितीयं निदर्शयति **यत्त्विति** अरण्यादि कर्तृ । आदिपदेन मणिग्रहणम् । तृणफूत्कारसंयोगः, अरणिमथनसंयोगः, मणिकिरणसंयोगः इति त्रिभिर्विजातीयाग्नीनामुत्पत्तेस्तार्किकैरङ्गीकारः ॥ २५९ ॥

एवं च ब्रह्मणो ज्ञानं विनाश्यैव विनाशकम् ।
यदि स्यात्तर्हि ते व्याप्तिः प्रतिरोधं करोतु वा ॥ २६० ॥

तर्हि बन्धस्याज्ञानोपादानकत्वप्राप्त्या । **प्रतिरोधं** बन्धसत्यत्वस्य । वेत्यनास्थां सूचयति । तथात्वेऽपि सत्यत्वस्य समर्थितत्वात् ॥ २६० ॥

यदि तद्भगवद्भक्तिमुत्पाद्य दृढया तया ।
बन्धं विनाशयेत्तर्हि व्याप्तेः क्वावसरो वद ॥ २६१ ॥

क्वावसर इति अज्ञानातिरिक्तप्रसादादेरुत्पादस्यैव प्राप्तेर्नाशस्याप्राप्तेरेवेति भावः ॥ २६१ ॥

ज्ञानान्नाश्ये तु नियमस्तज्जन्ये तु तवापि न ।
यत्प्रवृत्तिनिवृत्त्यर्थालापार्तिप्रीतिकृद्धि तत् ॥ २६२ ॥

नियमः अज्ञानस्यैवेति नियमः । उत्पादकत्वं तु अनेकेषामपि अनुभवसिद्धमिति निदर्शयति **प्रवृत्तीति** ॥ २६२ ॥

भक्तिश्च भगवत्स्नेहस्सा च तद्दर्शनाद्भवेत् ।
यतो रागस्य जनकं प्राहुर्विषयदर्शनम् ॥ २६३ ॥

ज्ञानस्य प्रसादसाधनभक्तिजनकत्वमपि सार्वजनीनानुभवसिद्धम् । स्मृतिसिद्धं चेत्याह **प्राहुरिति** । 'ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते' इति स्मृतेः ॥ २६३ ॥

भक्त्या च बन्धविच्छेदः श्रूयते यौक्तिकश्च सः ।
यतः प्रियस्य निगडबन्धं भिन्दन्ति मानवाः ॥ २६४ ॥

श्रूयते 'भक्तिरेवैनं नयति' इति भाष्योदाहृतश्रुतौ । **मानवाः** प्रभवः राजादयः ॥ ॥ २६४ ॥

न सा ज्ञानं सैव बन्धं छिन्द्याच्चेत्किं गतं तव ।
तत्सर्वविप्लवायोक्ता प्रक्रिया विक्रियैव ते ।
अतोऽप्यसङ्गतैवाभून्मिथ्यात्वप्रस्तुतिस्तव ॥ २६५ ॥

किं गतं तव त्वदभिमतव्याप्तेरहानेः । **असङ्गतैव** अन्यथैवोपपन्ना । प्रसादनिवर्त्यनिगडबन्धे सत्यत्वस्यैव दर्शनात् ॥ २६५ ॥

अथ ज्ञानेन सत्यस्य नाशे ब्रह्मापि नंक्ष्यति ।
तेन नाश्यत्वघटकं मिथ्यात्वं यदि कथ्यते ॥ २६६ ॥

तर्हि मिथ्यार्थनाशे स्याच्छशशृङ्गस्य नाशनम् ।
तेन नाश्यत्वघटिकां ब्रूमो बन्धस्य सत्यताम् ॥ २६७ ॥

त्रैकालिकनिषेधाख्यबाधायोग्यस्य सत्यता ।
तद्योग्यस्य च मिथ्यात्वमिति सर्वस्य संमतम् ॥ २६८ ॥

पारिभाषिकमिथ्यात्वं शशशृङ्गे न चेत्तव ।
जडत्वे सत्यबाध्यत्वं सत्यत्वं ब्रह्मणो न मे ॥ २६९ ॥

ननु सत्यस्यापि बन्धस्य नाशे आत्मनोऽपि नाशः प्रसज्यते । अतो नाशे मिथ्यात्वमेव प्रयोजकीभूतमेष्टव्यम् । मैवम् । तथा सति ज्ञानस्य येन केनापि निवृत्तिः कस्मान्नेष्यते । किं ज्ञाननियमेन । किं चैवं मिथ्याभूतस्य शशविषाणस्य निवृत्तिरङ्गीकार्या । तथा सति 'सतो हि घटादेरुत्पत्तिर्विनाशो वा दृष्टः । नायतेः शशविषाणादेरि'ति त्वदुक्तिर्व्याहन्यते । न च बन्धो न असन् किन्तु मिथ्यैवेति वाच्यम् । व्याहतेः । "नासीदस्ति भविष्यच्च तदिति ज्ञानमेयता । यदि बाधस्तदाऽसत्त्वं तेनैवाङ्गीकृतं पुनः" इत्युक्तेः । सत्येऽपि बन्धे मिथ्याशब्दस्य परिभाषामात्रत्वापातः । परिभाषाऽऽश्रयणेन विरोधपरिहारे ब्रह्मण्यपि परिहारसौलभ्यात् । निवृत्तौ प्रयोजकं सत्यत्वं नाम अबाध्यत्वे सति जडत्वम् । तच्चास्ति बन्धे, नास्ति च ब्रह्मणि, इति परिहारसंभवात् इति सोपपत्तिकमाह **अथेत्यादिभिः** चतुर्भिः ॥ २६६ ॥ २६७ ॥ २६८ ॥ २६९ ॥

अतो नातिप्रसङ्गोऽस्ति तवापि च ममापि च ।
तस्मादनाशे नाशे च सत्यत्वादेर्न सङ्गतिः ॥ २७० ॥

अतः दर्शनादर्शनमात्रस्य व्याप्त्यनियामकत्वात् । **तव** शशविषाणमपि निवर्तेत इति अतिप्रसङ्गः मम ब्रह्मापि निवर्तेत इत्येवंरूपः । **सत्यत्वादेरिति** । आदिपदेन जडत्वग्रहणम् ॥ २७० ॥

कार्यताऽकार्यते एव नाशानाशप्रयोजिके।
क्वचिन्नाशकसामग्री नाश्यतायाः प्रयोजिका ॥ २७१ ॥

कार्यता घटादौ। अकार्यता आकाशादौ। 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्' इत्युक्तेः। ध्वंसे अपवादादाह **क्वचिदिति** 'न हि सहस्राक्षोऽपि क्षयं क्षेपुं क्षमः' इति वचनात् ॥ २७१ ॥

इति वाच्यं यतोऽनादिर्बन्धो ज्ञानाद्विनाशवान्।
तत्सत्यबन्धनाशेऽपि ब्रह्मनाशः कुतो वद ॥ २७२ ॥

नाशवान् प्रमित इति शेषः। **तत्** नाशके प्रमाणाभावात् ॥ २७२ ॥

यच्च दृष्टबलाज्ज्ञानं सत्यबन्धनिवर्तकम्।
इत्युक्ते नीलविज्ञानान्नैल्यादेर्न निवर्तनम् ॥ २७३ ॥

दृष्टं ततो दृष्टबलं कथं स्यादिति चोदितम्।
तच्च जात्युत्तरं मन्ये नैव जातिमदुत्तरम् ॥ २७४ ॥

विवरणकारोक्तमनूद्य सुधाऽनुरोधेन दूषयति **यच्चेति**। निवर्तनं न दृष्टमित्युत्तरेणान्वयः। **जात्युत्तरं** युक्ताङ्गहीनेन प्रत्यवस्थानात् स्वव्याघातकरम् ॥ ॥ २७४ ॥

यतो दृष्टबलादेकभावे भावान्तरानुमा।
न स्यात्स्वाभिमता रासभादौ वह्न्याद्यदर्शनात् ॥ २७५ ॥

व्याप्तिविकलं परस्य प्रत्यवस्थानमिति निदर्शनेन दर्शयति **रासभेति** ॥ ॥ २७५ ॥

अथ व्याप्यस्य सद्भावे व्यापकान्तरसङ्गतेः।
दृष्टिर्दृष्टबलं नैव यस्य कस्यापि दर्शनम्।
इति तत्र समाधाने समाधानं समं मम ॥ २७६ ॥

व्याप्यस्य अनुपपद्यमानस्य सद्भावे समुचितदेशो इति शेषः। **दृष्टिः** अविनाभावदर्शनम् ॥ २७६ ॥

भूयो भूयस्साहचर्याद्यद्धि यस्य विनाशकम्।
दृष्टं तादृक्पदार्थो यस्स सत्यस्यापि नाशकः।
इति सर्वैश्च वक्तव्यं शैत्ये सत्यनलार्थिभिः ॥ २७७ ॥

भूय इति। भूयोदर्शनं व्यभिचारादर्शनं उपाध्यभावनिश्चयः इत्येते व्याप्तिनिश्चये सहकारिण इति भावः। सत्यस्यापि शैत्यस्य विरोधिना अनलेन निवृत्तिर्व्याप्तिबलेनैव सिद्धेत्याह **शैत्य इति** ॥ २७७ ॥

ज्ञानं चेदृग्दृश्यते चेत्तच्च सत्यं विनाशयेत्।
यतस्स्वसुहृदां दृष्ट्या मनोदुःखं निवर्तते।
महच्चरणदृष्ट्या च पापं सर्वं निवर्तते ॥ २७८ ॥

ईदृक् विरोधि। **महच्चरणेति**। 'दृष्टमात्राः पुनन्त्ये'ते इत्युक्तेः ॥ २७८ ॥

यथैव नृपतेर्दृष्ट्या भूयो भूयो निवृत्तिमान्।
बन्धो दृष्टो भटाद्येषु तथा भगवदीक्षणम्।
बन्धस्य शिक्षकं दृष्टं भूयोभूयश्शुकादिषु ॥ २७९ ॥

'यथा दृष्ट्या प्रसन्नः सन् राजा बन्धापनोदकृत्। एवं दृष्टः स भगवान् कुर्याद्बन्धविभेदनमि'त्यनुव्याख्यानमनुरुध्याह **यथैवेति**। **शुकादिषु** 'बहवो ज्ञानतपसा पूता मद्भावमागता' इत्युक्तमुक्तेषु ॥ २७९ ॥

अतो व्याप्तिमतो ब्रह्मज्ञानात्सत्यभवच्युतौ।
साधितायां व्याप्तिशून्यनीलनीलधियोरपि ॥ २८० ॥

नाश्यनाशकताचोद्यं कथं हृद्यं भवेत्सताम्।
तस्मान्मिथ्यात्वकथनं न कथञ्चन सङ्गतम् ॥ २८१ ॥

नीलनीलधियोरपीति। ज्ञानेन सत्यभूतः तद्विषयो निवर्तते इति व्याप्त्यभावात्। सूत्रे तदनुक्तेश्चेति भावः। **न सङ्गतमिति**। प्रयोजनाक्षिप्तं न भवतीति भावः ॥ २८१ ॥

किञ्च दृष्टबलात्स्वार्थं यः सिषाधयिषत्यसौ।
ज्ञानात्सत्यस्यापि नाशं यत्र यत्राभिपश्यति ॥ २८२ ॥

तदेव दृष्टं दृष्टं च स्वबलं वष्ट्यभीष्टदम्।
पूर्वोक्तवर्त्मना तच्च स्थानस्थानेषु वर्तते ॥ २८३ ॥

प्रतिबन्द्याऽऽह **किं चेति**। अन्वयव्यतिरेकावनादृत्य दर्शनमात्राभिमाने, परेण पराक्रान्तम्। तदाह **दृष्टबलादिति**। अन्वयव्यतिरेकशून्यदर्शनमात्रबलादित्यर्थः। **यत्र यत्रेति** सुहृद्दर्शनादिना दुःखनिवृत्त्यादौ। **तदेव स्वबलं वष्टि**। एवकारेण व्याप्तिसापेक्षतां वारयति ॥ २८३ ॥

एवं दृष्टबलस्यास्य का नष्टिः क्वाप्यदृष्टितः।
तेनासङ्गतसंबन्धि सर्वमासीदसङ्गतम् ॥ २८४ ॥

का नष्टिः क्वचिद्व्यभिचारदर्शनेऽपीति भावः। **क्वापि** चित्रावयविनि नैल्यादौ। **सर्वं** परस्य पर्यनुयोगेन प्रत्यवस्थानादिकम्। **असङ्गतं** 'यत्रोभयोः समो दोषः' इति न्यायादिति भावः ॥ २८४ ॥

श्रेष्ठेष्टदृष्ट्याऽनिष्टस्य नष्टेर्दृष्टबलं च मे।
अस्ति त्वदुक्तदुर्व्याप्त्युच्छित्त्या मानबलं च मे ॥ २८५ ॥

श्रेष्ठेष्टः प्रसन्नः प्रभुः। **दुर्व्याप्तीति**। ज्ञानमज्ञानस्यैव निवर्तकमिति विशेषव्याप्तिरिति बलीयस्त्वेनाभिमतेत्यर्थः। **उच्छित्त्या** सुबहुत्र व्यभिचारप्रदर्शनेन दूषणेनेन। **मानबलं** व्याप्तिविरोधशून्यानां 'दृष्ट्वैव तं मुच्यते' इत्यादिनिरवकाशागमानां बलम् ॥ २८५ ॥

तत्ते विकल्पोऽप्याकल्पकल्पः पश्यममाभवत्।
मनस्सङ्कल्पमाकल्पमप्यल्पीकुरुते तव ॥ २८६ ॥

विकल्पः ज्ञानेन सत्यस्य नाशः किं दृष्टबलेन उत आगमबलेन इत्येवंरूपः। **आकल्पकल्पः** आभरणसदृशो मदनुकूल एवेति यावत्। पक्षद्वयेनापि मत्सिद्धान्तस्यैव सिद्धेः। **आकल्पं** सर्वकल्पेषु। आङ् अभिविधौ। **अल्पीकुरुते** व्यर्थीकरोति ॥ २८६ ॥

अज्ञानोपादानकस्य मिथ्यार्थस्य विनाशनम्।
ज्ञानेन जायमानं यत्र दृष्टं नापि च श्रुतम् ॥ २८७ ॥

कुत इत्यत आह **अज्ञानेति**। विकल्पद्वयस्यापि त्वत्प्रतिकूलत्वादित्याह **नेति**। **नापीति च** ॥ २८७ ॥

सत्यं सर्वं स्वस्वदृष्ट्या नश्यत्येवेति वक्तरि।
चित्रावयविनो वार्ताप्रस्तावस्तु प्रशास्तिकृत्॥ २८८ ॥

अनुक्तानुपालम्भोऽपि दोषः परस्येत्याह **सत्यमिति**। **सर्वं इति**। विरोधि वा भवतु मा वा इत्यसङ्कोचेनेति भावः। **इति वक्तरीति**। ज्ञानं, स्वविषयं सर्वं सत्यं निवर्तयतीत्येवं यदि नाम यः कोऽपि ब्रूयात् तं प्रतीत्यर्थः। **वार्ताप्रस्ताव इति**। वार्तामात्रमेव। वस्तुतस्तं प्रत्यपि त्वदुक्तदूषणस्यानवकाश एवेति भावः। ज्ञानेनाज्ञानस्य आरोपितस्य वा निवृत्तिरिति त्वत्पक्षेऽपि उक्तविकल्पदोषप्रसरात्। विस्तरोऽत्र न्यायामृते ज्ञाननिवर्त्यत्वभङ्गे [१-४०-२९०] 'एकमेवहि चित्रं नाम रूपमाश्रयव्याप्यवृत्तीति पदार्थविदः' इति सुधोक्तदोषाच्च ॥ २८८ ॥

दृष्ट्या सत्यस्यापि नाशो दृष्टोऽस्तीति तु वक्ति यः।
नैल्यानाशकथा स्वस्य नैल्यानाशाय तं प्रति ॥ २८९ ॥

सत्यस्यापि विरोधिन इत्युपस्कारः। **नैल्यानाशायेति**। पराभवप्राप्त-मुखगतनैल्यस्य अनपगमायेत्यर्थः ॥ २८९ ॥

ज्ञानात्स्वविषयस्तस्य धर्मो वा तद्विरोधि वा ।
निवर्तते स्वाश्रयस्थमुभयस्थमथापि वा ॥ २९० ॥

परोक्तान्सर्वविकल्पाननुवदति ज्ञानादिति ॥ २९० ॥

इति पृष्ट्वा परो यत्तु दूषयामास दूषणैः ।
अनुक्तोपालंभनेन तत्स्वात्मानं हि दूषयेत् ॥ २९१ ॥

सर्वेऽपि परानुक्ता एवेत्याह तदिति ॥ २९१ ॥

किं ब्रह्मज्ञानतो ब्रह्म तद्धर्मस्तद्द्विषोऽसुराः ।
जीवत्वं वा ब्रह्मजीवभेदो वा द्वित्वमेतयोः ।
निवर्त्यत इति ब्रूते त्वदग्रे कोऽपि मानुषः ॥ २९२ ॥

उपपादयति किमिति । असुरा इति पर्यन्तं विषयगतपक्षस्य अनुक्तत्वम् । जीवत्वं ब्रह्मप्रतियोगिकजीवधर्मिको भेद इति आश्रयगतपक्षस्य, द्वित्वमित्यनेनोभयगतपक्षस्य च अनुक्तत्वमुपपादितम् ॥ २९२ ॥

किन्तु ज्ञानविनाश्यत्वं यस्य मानेन मीयते ।
तदज्ञानातिरिक्तं च नश्यज्ज्ञानेन दृश्यते ॥ २९३ ॥

यथाप्रमाणं सत्यस्यापि विरोधिनो ज्ञानेन नाश इति पक्षे न कोऽपि दोष इत्याह किं त्विति । दृश्यते इत्यस्य इतीत्युत्तरेणान्वयः ॥ २९३ ॥

उत्तरज्ञानतः पूर्वज्ञानस्य विनिवर्तनात् ।
प्रमया भ्रमनाशाच्च सूर्यादीनां च दर्शनात् ॥ २९४ ॥

दुरितध्वंसदृष्टेश्च सुहृद्दर्शनतो नृणाम् ।
चिन्ताज्वरादिनाशस्य दृष्टत्वात्तत्र तत्र च ।
इति ब्रूते परस्तत्र कुचोद्यावसरः क्व ते ॥ २९५ ॥

भ्रमेति। तस्य सत्यत्वं च एता ान्तं कालं मम भ्रम आसीदित्यनुभवेन सिद्धमिति भावः ॥ २९४ ॥ २९५ ॥

त्वदुक्तदूषणानां च व्रणं विवरणव्रणे ।
द्रष्टव्यं विस्तरभयान्नेह तच्च वितन्यते ॥ २९६ ॥

व्रणं दूषणम् ॥ २९६ ॥

किञ्चैवमपि ते बन्धमात्रस्याज्ञानकार्यता ।
अस्तु सर्वस्य जगतो मिथ्यात्वं तु कुतो वद ।
न हि सर्वस्य च ज्ञानान्नाशः सूत्रेण सूत्रितः ॥ २९७ ॥

एवं सौत्रप्रयोजनाक्षिप्ततया। **अस्त्विति** अभ्युपगमः। **सर्वस्य** बन्धातिरिक्तस्य ॥ २९७ ॥

अधिकार्यादिसद्भावाद्गुरुशिष्यादिसंभवात् ।
वक्तृश्रोतृमनोदेहगेहादेरनुपद्रवात् ॥ २९८ ॥

स्वयोग्यदेशकालान्नसद्भावात्फलसंभवात् ।
मीमांस्यवेदसद्भावान्मीमांसाशास्त्रसंभवात् ॥ २९९ ॥

कार्यैव ब्रह्ममीमांसा सदेत्यादावसूत्रयत् ।
यस्सूत्रकारस्स जगन्मिथ्यात्वं नैव मन्यते ॥ ३०० ॥

जिज्ञासाकर्तव्यत्वे हेतुत्वेन सूत्रितानां अधिकार्यादीनां सत्यत्वमेव सूत्रकृदभिप्रेतं अन्यथाऽसिद्ध्यापत्तेरित्याह **अधिकार्यादीति** ॥ २९८ ॥ २९९ ॥ ॥३०० ॥

जगज्जन्मादिहेतुत्वं यः प्रदीपमदीपयत् ।
स्वदत्तदीपतैलस्याभावं स मनुते कथम् ॥ ३०१ ॥

प्रदीपं लक्षणम् । वस्तुस्वरूपप्रकाशकत्वात् । तैलस्य तत्सत्यत्वस्य । तैलेन विना दीपस्येव, सत्यत्वेन विना जन्माद्यष्टकानुपपत्तेः ॥ ३०१ ॥

अन्त्यावयविनो नाशः पूर्वं घटविनाशने ।
कपालं तदुपादानं किं नश्यति तदा वद ॥ ३०२ ॥

उपाद्यज्ञाननाशो उपादेयबन्धो विनश्यतीति त्वत्प्रक्रिया लोकदृष्टिविरुद्धा । वैपरीत्यस्यैव दर्शनादित्याह **अन्यावयविन इति** ॥ ३०२ ॥

कार्यात्मना विनष्टोऽसौ घटः कारणरूपतः ।
अस्त्येवेति मतं सर्वे पूर्वेऽङ्गीकुर्वते तव ॥ ३०३ ॥

त्वत्सिद्धान्तविरुद्धा चेत्याह **तव पूर्वे अङ्गीकुर्वते** इति । अन्यथा स्वाप्रपदार्थनाशेऽपि तदुपादानाद्युपलब्धिः स्यादिति तदापादनविरोधः ॥ ३०३ ॥

कपालस्य तु नाशे तु घटस्यात्यन्तनाशनम् ।
रूपद्वयेनापि नाशात्पुनः कारणरूपतः ।
कपालानामेव सत्ता घटवार्ता गता तदा ॥ ३०४ ॥

तुशब्देन पश्चान्नाशपक्षं व्यवच्छिनत्ति । पूर्वमेव नाश इत्यर्थः । अत्यन्तेत्यस्यैव व्याख्यानं रूपद्वयेनापीति । तदा कारणरूपतः सत्ता इति घटवार्ता गता इत्यन्वयः । किन्तु कारणरूपतः कपालानामेव सत्ता इति वार्ता अवशिष्यते इति आवृत्त्या योज्यम् ॥ ३०४ ॥

एवं प्रकृतिपर्यन्तं नाशोधोऽधः क्रमात्किल ।
भूभूधरादेरप्येवमेवनाशं विदुर्बुधाः ॥ ३०५ ॥

इमां प्रलयमर्यादां वदन्त्यखिलवादिनः ।
एवञ्चोपादाननाशात्कार्यनाशः कदा वद ॥ ३०६ ॥

अधोऽध इति । 'नदीमुभयतोवाहामि'ति भागवते 'विपर्येण तु क्रमो लयेऽत उपपद्यते च' इति सूत्रे च तथोक्तेरिति भावः ॥ ३०५ ॥ ३०६ ॥

तस्मादनादितोऽनन्तब्रह्माण्डानां लये लये।
अज्ञानच्छेदतश्छेदो न द्वेधाऽपीति धीर्मम।
अद्याप्यज्ञानावशिष्टेर्नष्टेश्चोक्तविधत्वतः ॥ ३०७ ॥

न द्वेधाऽपीति। अज्ञानस्योपादानत्वाभावात् उपादानस्य पूर्वमनाशाच्चेति भावः। अभिप्रायान्तरमाह **अद्यापीति** पूर्वकल्पीयजगन्नाशेऽपि। **अज्ञानावशिष्टेः** अन्यथेदानीं तदुपादानकसंसारानुलम्भः स्यादिति भावः। **उक्तविधत्वतः** अधोऽधः इति पूर्वोक्तविधत्वतः ॥ ३०७ ॥

यस्ते सर्वलयो मुक्त्यै तत्राप्येष लयक्रमः।
पृथिव्यप्सु विलीना स्यात्तास्तेजस्यनिले च तत् ॥ ३०८ ॥

ते मुक्त्यै निष्प्रपञ्चताऽऽपत्त्यै। मम तु परान्तकाले। **एषः** क्ष्मांभोनलानिलेत्यादिस्मृत्युक्तः ॥ ३०८ ॥

स व्योम्नि तदहङ्कारे महत्तत्त्वे स लीयते।
तन्मायायां सा च मायाऽज्ञाने लीना भवेत्तव ॥ ३०९ ॥

मायायां प्रकृतौ। **अज्ञाने इति**। प्रकृतेरपि अज्ञानकार्यत्वोपगमादिति भावः ॥ ॥३०९ ॥

मम तु प्रलये सर्वा विकृतिः प्रकृतिं विशेत्।
सा च प्रकृतिरेवास्या लयो नेति परं मतम्।
एवञ्चाज्ञाननाशेन नाशो देशान्तरं गतः ॥ ३१० ॥

विकृतिः कार्यजातम्। **विशेत्** तदात्मना अवतिष्ठते। अस्याः प्रकृतेर्लयो न। 'नासतो विद्यतेऽभावः' इति **परं मतं** गीतासंमतम्। असतः कारणस्य प्रकृतेः अभावः प्रागभावः प्रध्वंसश्च न विद्यते इति तद्व्याख्यानात् ॥ ३१० ॥

भूयश्चान्ते विश्वमायानिवृत्तिरिति हि श्रुतिः।
अतो न लौकिकी नापि वैदिकीऽयं स्थितिस्तव ॥ ३११ ॥

श्रुतिरपि अन्ते एवाज्ञाननाशं श्रावयतीत्याह **भूय इति** ॥ ३११ ॥

त्वत्प्रक्रियालयव्याप्ता यस्मात्सर्वे महालयाः ।
तत्सूत्रितार्थाख्यरत्नमालापकर्षणम् ।
यः करोति नराकारो वानरस्स न संशयः ॥ ३१२ ॥

विपर्ययेण तु लयं यस्सूत्रे सूत्रयिष्यति ।
सोऽधुनोपादाननाशात्कार्यनाशं न बोधयेत् ॥ ३१३ ॥

तव प्रक्रियाया लयेन वैपरीत्येनैव व्याप्ताः सर्वे महालयाः । यथा महालयश्राद्धं लयव्याप्तं तथेति ध्वनिः । **वानर इति** अव्यवस्थितचित्तः इत्यर्थः । तदुक्तमभियुक्तैः 'मणिस्रजं वा प्लवगोऽव्यवस्थः' इत्यादि ॥ ३१२ ॥ ३१३ ॥

अर्थस्यास्यानर्थदस्य तस्मात्सूत्रं न सूचकम् ।
त्रिलोकीसूचको यस्ते गुरुरास्ते स सूचकः ॥ ३१४ ॥

तस्मात् तदुक्तार्थापत्तेः सर्वदोषावकुण्ठितत्वात् । **अस्य** जगन्मिथ्यात्वरूपस्य । **अनर्थदस्य** परतत्वप्रद्वेषपर्यवसायित्वेन तमःफलकस्य । **सूचकं** आक्षेपकम् । **सूचकः** पिशुनः । **सूचकः** साधनदुरुपक्रमवान् ॥ ३१४ ॥

अज्ञानकार्यता चास्य समस्तस्य न युज्यते ।
यद्यज्ञानमुपादानं वृत्त्याऽज्ञाननिवर्तने ।
तदुपादेयकार्यस्य ह्यनिवृत्तिः कथं वद ॥ ३१५ ॥

वृत्त्या चरमवृत्त्या । त्वद्रीत्या 'तत्त्वमसि'वाक्यश्रवणोत्थया । **अनिवृत्तिः** इदानीमपि संसारोपलम्भादिति भावः ॥ ३१५ ॥

घटवृत्त्या घटाज्ञाननाशे न हि घटक्षयः ।
तवाप्यस्ति मते तस्मात्तदुपादेयतापि न ॥ ३१६ ॥

व्यावहारिकं घटं प्रति ब्रह्मैवाधिष्ठानम्। ब्रह्माज्ञानमेव चोपादानमिति परस्याभ्युपगमः। घटवृत्त्या घटाज्ञाननाशेऽपि घटस्यानाशादित्याह **घटेति**। नाशे नेति पदच्छेदः॥ ३१६॥

उपादानस्य संबन्धनाशेनापि विनश्यतः।
उपादानस्यैव नाशे कथं नाशो न जायते।
अतोऽज्ञानमुपादानमिति रिक्तं वचस्तव ॥ ३१७॥

संबन्धः कपालद्वयसंयोगादिः असमवायिकारणम्। **विनश्यतः** घटादिप्रपञ्चस्य। **उपादानस्यैव** त्वद्रीत्या ब्रह्माज्ञानस्यैव। अतः अन्वयव्यतिरेकाभ्यां मृदादिकमेव घटाद्युपादानं नाज्ञानमिति निष्टङ्कितम्॥ ३१७॥

तदज्ञानानुपादानवस्तुत्वाद्ब्रह्मवज्जगत्।
सदा सत्स्यान्न चेन्न स्यात्प्रतिकर्मव्यवस्थितिः॥ ३१८॥

सदा मुक्तावपि। तेन पारमार्थिकत्वलाभः। **प्रतिकर्मव्यवस्थितिः** सर्वस्यापि दृश्यस्य ब्रह्मात्मैकदृगध्यस्तत्वेऽपि कस्यचित् कदाचित् कंचित् प्रति प्रकाश इति व्यवस्था॥ ३१८॥

शुक्तेरावरणेऽज्ञाने नष्टे बाधप्रमा पुनः।
इयं शुक्तिर्न रजतमित्याकारा हि जायते ॥ ३१९॥

आवृतेऽर्थे कथं साक्षात्काररूपा प्रमा वद।
तस्माज्ज्ञानविनाश्यत्वं शुक्त्यज्ञाने न युज्यते॥ ३२०॥

विषयावच्छिन्नचैतन्यावरकमज्ञानं न पुरुषगतमिति मते ज्ञानेनाज्ञाननिवृत्तिर्न संभवति अन्योन्याश्रयादित्याह **युक्तेरिति**। आवरणनिवृत्तौ प्रमा, प्रमयैव चाज्ञाननिवृत्तिरिति॥ ३१९॥ ३२०॥

ज्ञानाभावस्य तु ज्ञानं निवृत्तिर्न निवर्तकम्।
अतो ज्ञानेनैव नाशो नाज्ञाने दृश्यते क्वचित्॥ ३२१॥

तुशब्देन प्रागभावविपत्तिरेव प्रतियोग्यापत्तिरित्यस्योभयसिद्धतां द्योतयति। **क्वचित्** भावाज्ञानमभावाज्ञानमिति पक्षद्वयेऽपि ॥ ३२१ ॥

अपसार्यैव हृन्मायां दर्शनं दिशति प्रभुः।
न चेत्तयाऽऽवृतं चित्तं कथं द्रष्टुं क्षमं भवेत् ॥ ३२२ ॥

'स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्धवेदि'त्यनुव्याख्यानोक्तरीत्या स्वमते नायं दोषः। प्रभोः स्वतन्त्रभावस्य परमात्मन एवाज्ञाननिवर्तकत्वोररीकारादित्याह **अपसार्यैवेति**। 'अथान्ये प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते' इत्यादि भागवततात्पर्योक्तमत्रानुसन्धेयम्। हृन्मायां परमाच्छादिकाम् ॥ ३२२ ॥

दृष्ट्वा प्रसन्नः पश्चात्तां मुक्तावेव निवर्तयेत्।
तदैव सर्वथा नाशे जीवन्मुक्तिदशा कथम् ॥ ३२३ ॥

तां ईश्वरेच्छारूपमावरणम्। **जीवन्मुक्तिदशा** अपरोक्षज्ञानानन्तरं संसारः। तदुक्तं सुधायां 'तद्वतामपि संसारानुवृत्तिदर्शनात्' इति ॥ ३२३ ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे।
इति श्रुत्युक्तहृद्ग्रन्थिविनाशोऽप्ययमेव हि ॥ ३२४ ॥

अयमेवेति। 'स एव मोचकोऽङ्गीकार्यः अपरस्य स्वातन्त्र्याभावात्। प्रसन्न एवासौ स्वकीयां व्यावर्तयती'ति सुधोक्तः ॥ ३२४ ॥

अज्ञानहृद्विभागो यस्स चेश्वरपराक्रमात् ॥ ३२५ ॥

ईश्वरपराक्रमादिति तथा हि सूत्रं 'ततो ह्यस्य बन्धविपर्ययावि'ति ॥ ३२५ ॥

तदेको दृष्टतो नष्टो दृष्ट्वा नष्टास्ततोऽपरे।
न चेद्यत्नशतेनापि कथमावृतदर्शनम् ॥ ३२६ ॥

संशयभ्रमयोरप्रारब्धयोः पुण्यपापयोः ।
तदैव नाशः श्रुत्युक्तरीत्या ज्ञानेन संभवेत् ॥ ३२७ ॥

सुहृद्दर्शनतस्सद्यः क्लेशनाशो हि जायते ।
सूर्यावलोकनात्पापनाशस्सर्वस्य संमतः ।
दोषस्य दर्शनाद्रागनाशो दुर्विषये सताम् ॥ ३२८ ॥

एकः हृदयग्रन्थिः दृष्टतो दृष्टिविशेष्यतः परमात्मनः । दृष्ट्या विशेषणीभूतदर्शनतः । अपरे संशयविपर्ययाः, कर्माणि च । कर्मनाशे विशेषः 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ' इति सूत्रभाष्यादितोऽवगन्तव्यः ॥ ॥३२६ ॥ ३२७ ॥ ३२८ ॥

एवं चाज्ञानतोऽन्यस्य ज्ञानान्नाशः प्रदृश्यते ।
अज्ञानस्य तु न ज्ञाननाश्यता दृश्यते क्वचित् ॥ ३२९ ॥

अज्ञानस्य पराभिमतस्य विषयावरणरूपस्य ॥ ३२९ ॥

व्याप्त्यैव दृष्टबाधस्ते व्याप्तेर्मूलं न दृश्यते ।
गव्याप्तिरथवाऽव्याप्तिर्व्याप्तेर्मूलं हि केवलम् ॥ ३३० ॥

ते इति । त्वत्कल्पनामात्रमूलया इत्यर्थः । मूलं दृष्टान्तः । अपहसति गवीति लक्षणया गोपाले । आप्तिः भाषणेन प्राप्तिः । अविपाले दर्शनं अव्याप्तिः । मूलमिति । गोपाला वा अविपाला वा केवलं तव व्याप्तिं प्रजल्पेयुरिति अपहासः ॥ ॥३३० ॥

प्रबलत्वाद्विपक्षस्य सपक्षस्य त्वदर्शनात् ।
व्याप्तिश्च पक्षयुगलच्छेदे पक्षीव ते मृता ॥ ३३१ ॥

अज्ञानं ज्ञानेन निवर्तते इति व्याप्तेः अन्वयाभावात् अज्ञानत्वरूपहेतोः न सपक्षवृत्तित्वं, विपक्ष एव भावात् न विपक्षव्यावृत्तत्वं इति पक्षयुगलविकलत्वं इत्याह प्रबलत्वादिति ॥ ३३१ ॥

तस्माज्ज्ञानेन बन्धस्य नाशे नानुपपन्नता ।
भवद्ग्रन्थस्य निर्बन्धनाशे त्वनुपपन्नता ॥ ३३२ ॥

नाशे साक्षादिति शेषः । निर्बन्धेन दुराग्रहेण सूत्रार्थस्य नाशे अपलापे तु **अनुपपन्नता** सूत्रकारद्रोहः ॥ ३३२ ॥

अतो ज्ञानविनाश्यत्वस्यान्यथाऽनुपपत्तितः ।
अज्ञानोपादानकत्वं केनोपायेन साध्यते ॥ ३३३ ॥

केनेति अर्थापत्तेः बन्धसत्यत्वेनैवोपपत्तेः उपायान्तरस्य चाभावादेवेति भावः ॥ ३३३ ॥

साक्षाज्ज्ञानविनाश्यत्वात्प्रभुनाश्यत्वतोऽपि वा ।
अनाद्यज्ञानवत्सोऽयं बन्धो नाज्ञानकल्पितः ॥ ३३४ ॥

परन्यायेन दृष्टान्तः पूर्वहेतौ भवेद्धि तत् ।
प्रामाणिकत्वादन्यस्मिन्हेतौ च स्यान्निदर्शनम् ॥ ३३५ ॥

साक्षादिति विशेषणं रूप्ये व्यभिचारवारणाय । न च दृष्टान्तः साधनविकलः परेणैवाभ्युपगमादित्याह **परेति** । द्वितीयानुमाने पक्षे हेतोः 'भवपाशाच्च मोचक' इति प्रमाणसिद्धत्वान्नासिद्धिः । एवं दृष्टान्तस्य न साधनविकलता । भिद्यते हृदयग्रन्थिरित्यादिप्रमाणसिद्धत्वादेवेत्याह **प्रामाणिकत्वादिति** । न चोभयत्रापि दृष्टान्तस्य साध्यविकलता । अनादिः कल्पित इत्यस्य व्याघातात् । 'अज्ञानस्य च मिथ्यात्वमज्ञानादिति कल्पने अनवस्थितिस्तथा च स्यादन्योन्याश्रयता-ऽथवे'त्यनुव्याख्यानोक्तदोषापातात् । अनादित्वादिति प्रत्येकं हेतुरपि अनुसन्धेयः ॥ ॥३३४ ॥ ३३५ ॥

विवादपदमज्ञानं बन्धोपादानमेव न ।
साक्षाज्ज्ञानानिवर्त्यत्वाद्यथा घटपटादिकम् ॥ ३३६ ॥

बन्धे ज्ञानविनाश्यत्वस्यान्यथानुपपत्तितः ।
अज्ञानोपादनकत्वं सिषाधयिषितं तव ॥ ३३७ ॥

नैवेति संबन्धः । किन्तु निमित्तमिति पर्यवसितोऽर्थः । नासिद्धिः आवरणस्य ज्ञानेनानिवृत्तेः साधितत्वात् । सिद्धान्ते तु प्रसादस्यैव निवर्तकत्वाङ्गीकारान्नासिद्धिशङ्का । साक्षादिति पदं पुनरसिद्धिवारणाय । प्रसादद्वारा निवर्त्यत्वात् । दृष्टान्तस्य घटादेर्न्यावयवित्वेन उपादानत्वमेव नेति न साध्यवैकल्यम् ॥ ३३६ ॥ ॥३३७ ॥

अनादिरेव बन्धोयं तवापि च ममापि च ।
अतो बाधित एवायमर्थस्साध्यः कथं वद ।
अर्थापत्तिस्ततस्तेऽभूदनर्थापत्तिरेव हि ॥ ३३८ ॥

अनादित्वाच्च बन्धोऽयं न स्यादज्ञानकल्पितः ।
आत्मवत्तेन शास्त्रस्य प्रक्रिया विक्रियैव ते ॥ ३३९ ॥

तवापीति 'अनादिमायया सुप्त' इत्यनादित्वाङ्गीकारात् ॥ ३३८ ॥ ३३९ ॥

किञ्च बाधप्रमानाश्यं नैव किञ्चित्प्रदृश्यते ।
प्राङ्नष्टरजतज्ञाने भ्रमत्वं बोधयेद्धि सा ॥ ३४० ॥

जगत् परमार्थसत् ज्ञानाविनाश्यवस्तुत्वात् ब्रह्मवत् इति वक्ष्यमाणानुमाने (श्लो. ३४४) असिद्धिं परिहर्तुं लोके बाधप्रमां विवेचयति **किञ्चेति।** 'विज्ञातस्यान्यथासम्यग्विज्ञानं ह्येव तन्मतम्' इत्यनुव्याख्यानमनुरुध्याह **बाधेति** तदुक्तं सुधायां 'बाधतिः खलु लोडने पठ्यते । तच्चार्थस्य ज्ञानस्य वाऽस्तु । न तावज्ज्ञानस्य । तस्य क्षणिकत्वेन स्वत एव लोडितत्वात् । — । नाप्यर्थस्य । शुक्तिशकलादेस्तादवस्थ्यात् । रजतादेर्नित्यलोडितत्वात् । तथा च पूर्वज्ञानप्रसञ्जितस्यान्यथाकारस्य लोडनमिवेति वक्तव्यमि'ति ॥ ३४० ॥

पुनर्भ्रमस्यानुत्पादमथवा तत्र साधयेत् ।
रजतस्य तु नाशो न प्राक्सतो हि विनाशनम्॥ ३४१ ॥

अनुत्पादमिति । विशेषदर्शनस्य भ्रमोत्पादप्रतिबन्धकत्वात् ॥ ३४१ ॥

नाशश्चेत्तर्ह्युपादाननाशान्नष्टं पुरैव हि ।
अतो बाधप्रमानाश्यं जगत्यपि न किञ्चन ॥ ३४२ ॥

पुरैव हीति। शुक्त्यज्ञानमेवावरणम्। तन्नाशं विना बाधप्रमाया उत्पादासंभवस्योक्तत्वात् ॥ ३४२ ॥

भवेद्दृष्टानुसारश्चेदन्यथाऽदृष्टकल्पना ।
अर्थापत्तेस्ततो मूलमर्थस्यापत्तिरेव ते ॥ ३४३ ॥

अर्थस्यापत्तिः पदार्थभ्रमः ॥ ३४३ ॥

तस्माज्ज्ञानेनाविनाश्यवस्तुत्वाद्ब्रह्मवज्जगत् ।
परमार्थसदेवाभून्नाभूत्तव समीहितम् ॥ ३४४ ॥

तस्मात् असिद्धिशङ्काऽभावात् ॥ ३४४ ॥

किञ्च बाधप्रमा येयं साऽपि बाध्या भवन्मते ।
ममापि बाध्या तेनास्या बाधस्तूभयसंमतः ॥ ३४५ ॥

इयं चरमप्रमा। भवन्मते इति। वेणुसंघर्षजवह्निवत्तस्याः स्वबाध्यत्वोपगमात् ॥ ३४५ ॥

तस्मादुभयसंमत्या बाध्यबाधत्वतस्सदा ।
परमार्थसदेवाभूज्जगद्ब्रह्मवदेव मे ॥ ३४६ ॥

बाध्यबाधत्वतः मिथ्याभूतमिथ्यात्वकत्वात् ॥ ३४६ ॥

अस्तु वा तदुपादानं मिथ्यात्वाशा तदापि न।
अनादेर्जीवभेदस्य कालस्य गगनस्य च ॥ ३४७ ॥

अज्ञानस्य च मिथ्यात्वं केनोपायेन ते वद।
अतस्सर्वस्यमिथ्यात्वे नाभूदेतत्प्रयोजकम् ॥ ३४८ ॥

केनोपायेनेति। तेषां निरुपादानकत्वेन तत्र हेतोरसिद्ध्यापत्तेः ॥ ३४७ ॥ ॥३४८ ॥

अथ बाधेनैव तेषां मिथ्यात्वे न ह्यनश्यताम्।
मिथ्यात्वं ब्रह्मवत्तस्मात्तेषां नाशः कथं वद ॥ ३४९ ॥

तेषां मिथ्यात्वे इति। गगनादिकं मिथ्या बाध्यत्वादिति साधन इत्यर्थः। 'साध्याविशिष्टतयैव दुष्टताऽऽपत्तिः' इति वादावल्युक्तदोषे सत्येव पूर्वोक्तेनानाश्यत्वेन हेतुना सत्प्रतिपक्षतामाह **न हीति।** एवं अनादित्वेन बाधाभावसाधनादसिद्धिश्च। **तस्मात्** बाध्यत्वात्। तेषां गगनादीनां नाशः साध्यते इति तत्राह **कथमिति। तस्मादित्यस्यावृत्त्या योजना। बाध्यत्वस्योक्त**रीत्याऽसिद्धत्वात्। हेतोर्विरुद्धताऽऽपत्तेश्च। त्रैकालिकनिषेधप्रतियोगित्वरूपबाध्यत्वस्य ध्वंसाभावेनैव व्याप्तेः। न हि शशविषाणादेः ध्वंसः संभवीति भावः ॥ ॥३४९ ॥

अथ बाधेनैव साक्षात्तेषां नाशे गतं मतम्।
ब्रह्मप्रमा हि बाधस्ते तया साक्षाज्जगत्क्षये।
नाशकं ज्ञानमज्ञानस्यैवेति हि यतो गतम् ॥ ३५० ॥

बाधेनैव जगन्नाशे गतमासीन्मतं तव।
अन्यद्वारापि तन्नाशे गतमासीन्मतं तव।
अनादिगगनादीनामनाश्यत्वप्रसक्तितः ॥ ३५१ ॥

एवञ्चानाश्यवस्तुत्वाद्ब्रह्मवत्परमार्थसत् ।
अबाध्यं चाभवज्जीवभेदकालांबरादिकम् ।
अतो बाधो न वै तेषां मिथ्यात्वाऽऽशापि ते गता ॥ ३५२ ॥

किञ्च गगनादीनां ब्रह्मप्रमारूपबाधेन नाशः अन्येन वा । आद्येऽपि साक्षाद्वा अज्ञानद्वारा वा । नाद्य इत्याह **बाधेनैवेति** । न द्वितीय इत्याह **अन्यद्वारेति** । उपादानरूपाज्ञानद्वारेत्यर्थः । तृतीयेऽपि अन्येत्यादिकमेवाऽऽवृत्त्या योजनीयम् । अन्येत्यस्य ब्रह्मप्रमाऽन्येत्यर्थः । **मतमिति** । ब्रह्मप्रमयैव नाश इति मतम् । पक्षत्रयेऽपि साधारणो दोषः **अनादीति** । तथा च सर्वं ब्रह्मव्यतिरिक्तं मिथ्येति मतं गतमिति वर्णनीयम् ॥ ३५० ॥ ३५१ ॥ ३५२ ॥

न च बाधोऽपि तेषां स्यादनादित्वात्परात्मवत् ।
तस्माज्जीवविभेदादेर्मिथ्यात्वे कारणं न ते ॥ ३५३ ॥

कारणं साधकम् ॥ ३५३ ॥

सर्वं नेति च वाक्येन कथमर्धस्य बाधनम् ।
सर्वस्यापि च बाधे तु मिथ्यात्वमपि तद्बलात् ।
एवं सर्वस्य यत्स्यात्तद्व्यर्था तज्ज्ञानकार्यता ॥ ३५४ ॥

सर्वं नेतीति । 'नेह नानास्ति' इति वाक्येनेत्यर्थः । **अर्धस्य** अनादिगगनादेरेव । किञ्चनशब्दस्य सङ्कोचकाभावात् तस्मात्सर्वस्यापि मिथ्यात्वं तद्वाक्येनेति वाच्यम् । न च तद्युक्तम् । तथा सति तव सौत्रार्थापत्तिव्युत्पादनप्रयासो व्यर्थ एव स्यादित्याह **व्यर्थेति** ॥ ३५४ ॥

अथ तेनैव सर्वस्य मिथ्यात्वाऽऽशापि माऽस्तु ते ।
अनादित्वादनाशित्वाज्ज्ञानानाश्यत्वतस्तथा ॥ ३५५ ॥

अज्ञानाकार्यवस्तुत्वाद्ब्रह्मवत्सकलं जगत् ।
अंबराद्यं घटाद्यं च यदबाध्यमसाध्यत ॥ ३५६ ॥

तेनैव वाक्येनैव। न च घटाद्ये भागासिद्धिः। प्रवाहतः अनादित्वस्य अनाशित्वस्य च तत्रापि सत्त्वात्। अत एव सामान्यत एव हेतूकृतम्॥ ३५५॥ ॥३५६॥

न चेद्ब्रह्मापि बाध्यं स्यादकस्मादिति वाक्यतः।
तस्य चान्यार्थतायां स्यादस्याप्यन्यार्थतैव हि॥ ३५७॥

न चेत् तात्पर्यावधारणे उपपत्त्यनुसरणं न चेत्॥ ३५७॥

जगच्च जगतीनाथो द्वावेतौ नियतौ सदा।
अभटो यन्नृपो नष्टो नष्टं राष्ट्रमराजकम्॥ ३५८॥

'एष सर्वेश्वरः एष लोकपालः' 'तत्सत्यं' 'विश्वं सत्यं' इत्यादि श्रुतिभिरुभयोरपि सत्यत्वस्य श्रुतत्वात् उभयोरपि सत्यत्वं समनियतमित्याह **जगदिति**। लोकानुसारित्वाच्चैवमित्याह **अभट इति**। भटोपलक्षितस्य पालनीयस्य राज्यस्यैवाभावे नृप इति व्यपदेशमात्रं स्यात्। एवं समर्थस्य पालकस्य राज्ञोऽभावे राष्ट्रं दुःखनिमग्नं भवति। यथोक्तं भागवते 'अरक्षमाणे नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः। तदा हि चोरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणो विवरूथवत्क्षणादि'ति। दार्ष्टान्तिके तु 'यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया' इति श्रुत्यनुसारेण, भगवदनुग्रहाभावे जगतः सत्तैव न स्यात् जगत एवाभावे जगज्जन्मादिहेतुत्वरूपस्य भगवतः स्वरूपलक्षणस्याभावेन भगवत्स्वरूपस्यैवा- पलापापत्तिरिति अतिप्रसङ्गौ ज्ञेयौ॥ ३५८॥

किञ्चाज्ञानं ज्ञाननाश्यं विरोधादेव केवलम्।
न हि दीपस्तमोनाशे तन्मिथ्यात्वमपेक्षते॥ ३५९॥

तन्नाश्यत्वे तद्विरोधित्वमेव प्रयोजकं दृष्टं न मिथ्यात्वमित्याह **न हीति**॥ ॥ ३५९॥

अतोऽज्ञानमिदं ज्ञाननाश्यं सत्यं च संभवेत्।
सत्याज्ञानभवं विश्वं सत्यमेव भविष्यति॥ ३६०॥

सत्यं च सत्यमेव। ध्वंसे प्रतियोगिसत्त्वनियमस्य स्थितेः। **सत्यमेवेति** उपादानोपादेययोः समसत्ताकत्वनियमात् ॥ ३६० ॥

तस्मादज्ञानकार्यत्वमस्तु वा जगतस्तव।
मिथ्यात्वाशा तु तस्मिन्या सा कपोणिगुडायते ॥ ३६१ ॥

कपोणीति। कपोणिगुडलेहनतुल्ययोगक्षेमा। अशक्येति यावत् ॥ ॥ ३६१ ॥

अस्त्वज्ञानभवं विश्वमज्ञाने ज्ञाननाश्यता।
न दोग्धि ते प्रियं दुग्धं शिलाधेनुस्तनो ह्ययम् ॥ ३६२ ॥

अस्त्विति। अज्ञानं धेनुः। तत्कार्यत्वं स्तनः। मिथ्यात्वं दुग्धं इति विवेकः। शिलात्वं च अभिलषितार्थासाधकत्वम् ॥ ३६२ ॥

विरोधेनैव विज्ञानं स्यादज्ञानस्य नाशकम्।
तन्मिथ्यात्वकथा व्यर्था मृतमारणयन्नवत् ॥ ३६३ ॥

सत्याच्चिदात्मनः असतः शशविषाणादेश्च व्यावृत्तो ध्वंसोऽनिर्वचनीये पर्यवस्यतीति चेन्नानिर्वचनीयस्याप्रामाणिकत्वात्। त्वन्मते शुक्तिरूप्यस्यापि वह्निना नाशप्रसङ्गात्। अतो विरोध एव नाशप्रयोजको वाच्य इत्याह **विरोधेनेति। व्यर्था** नाशं प्रत्यप्रयोजकत्वात् ॥ ३६३ ॥

दृश्यत्वादेव मिथ्यात्वं नानित्यत्वाच्च ते मते।
न चेत्तेनैव बन्धस्य साक्षान्मिथ्यात्वसिद्धितः।
बकबन्धप्रकारोऽयं विकाराय भवेत्तव ॥ ३६४ ॥

अथ मिथ्यात्वं नानित्यत्वे प्रयोजकमुच्यते येनोक्तदोषः किन्तु अनित्यत्वेन मिथ्यात्वं साध्यते इति चेदज्ञाने निवृत्ते, तदुपादानको बन्धो निवर्तते इति त्वन्मतप्रणाडी परित्यक्ता रूपत्। अनित्यत्वेनैन मिथ्यात्वे साक्षात् शक्यसाधने तदुपजीविनो गुरुभूतोपायस्यानुसरणे बकबन्धनप्रयासापत्तिरित्याह **दृश्यत्वादेवेति।** अज्ञानद्वारा चरमवृत्तिनिवर्त्यत्वान्यथाऽनुपपत्त्यैवेत्यर्थः ॥ ३६४ ॥

अथ तेनैव तत्सिद्धावाशा क्लेशाय केवलम् ।
दृष्टान्ते शुक्तिरजते मम हेतोरसंमते: ॥ ३६५ ॥

किञ्च अनित्यत्वं न मिथ्यात्वे हेतुः संभवति शुक्तिरूप्ये दृष्टान्तेऽनित्यत्वस्य मयाऽनङ्गीकारादित्याह **अथेति** ॥ ३६५ ॥

कृतकत्वं च तद्बीजं न दुर्बीजमिदं तव ॥ ३६६ ॥

अतोऽन्धकारमालोक इव विज्ञानमेव ते ।
परस्परविरोधेन तदज्ञानं हि नाशयेत् ।
मिथ्यात्वकारणाभावात्तत्सत्यमभवद्ध्रुवम् ॥ ३६७ ॥

लोकेऽनित्यत्वहेतोः कृतकत्वस्यात्यन्तासति शुक्तिरूप्येऽभावादित्याह **कृतकत्वमिति** । **दुर्बीजं** मिथ्यात्वम् ॥ ३६६ ॥ ३६७ ॥

या दुर्घटं च घटयेत्सा किमन्यदपेक्षते ।
वाक्यादीनामनुसृतौ युक्तिरेषा वृथा गता ॥ ३६८ ॥

या अविद्या **दुर्घटमिति** । 'अविद्याया अविद्यात्वे इदमेव हि लक्षणम् । मानापातासहिष्णुत्वमि'ति तल्लक्षणात् । **अन्यत्** स्वमिथ्यात्वं, निवर्तकं ज्ञानं, बन्धोपादानतां इत्यादिकम् । श्रुत्यादिना मिथ्यात्वसाधनेऽर्थापत्तिर्व्यर्थाऽऽपद्यते इत्याह **वाक्यादीनामिति** । आदिपदेनांशित्वादिहेतुग्रहणम् ॥ ३६८ ॥

जगत्सत्यत्वमपि किं वाक्येनैव न साध्यते ।
अतो युक्तेः पुरस्कर्तुर्नैव मिथ्यात्वसाधकम् ॥ ३६९ ॥

नैवेति । सर्वासां युक्तीनां सत्यत्वसाधकसकलप्रमाणबाधादित्याशयः ॥ ॥ ३६९ ॥

कारणस्य हि सत्यत्वे कार्यं मिथ्या कथं भवेत् ।
अतोऽज्ञानस्यानुसृतिरज्ञानादेव केवलम् ॥ ३७० ॥

कारणस्य उपादानस्याज्ञानस्य। **अनुसृतिः** उपादानत्वोक्तिः। **अज्ञानात्** तत्सत्यत्वस्येति शेषः ॥ ३७० ॥

यद्यज्ञानक्षयादन्यज्ज्ञानकार्यं न ते मते।
व्यर्था बाधप्रमा तर्हि सा ह्यज्ञानक्षयोत्तरा।
नह्यज्ञाने सति ज्ञानमविरोधप्रसङ्गतः ॥ ३७१ ॥

अन्यत् उत्तरपूर्वाघयोरश्लेषविनाशरूपम्। प्रभुप्रसादरूपं वा। **सा** चरमवृत्तिः। **हि**र्हेतौ। आवरणनिवृत्तिमन्तरा तदुत्पत्त्ययोगादित्यर्थः। **अविरोधेति**। स्वरूपज्ञानस्येव वृत्तेरप्यज्ञानाविरोधाङ्गीकारप्रसङ्गत इत्यर्थः ॥ ३७१ ॥

अतोऽज्ञानं विलोप्यैव बाधज्ञानोदयो भवेत्।
तस्य ज्ञानस्य किं साध्यं न हि दग्धं पुनर्दहेत्॥ ३७२ ॥

अतः विरोधघटनाय। **विलोप्य** अन्येन नाशानन्तरमेव। **न हीति**। 'निष्पादितक्रिये कर्मणि साधनन्यायातिपातः' इत्युक्तेः ॥ ३७२ ॥

यदि नश्येत्ततो विश्वं शास्त्रं व्यर्थीकरोति ते।
अज्ञानस्यैव यज्ज्ञानं नाशकं न परस्य हि ॥ ३७३ ॥

ततो नश्येदिति ज्ञानादेव साक्षान्नाश्यं चेदित्यर्थः। उत्तरार्धस्य इति शास्त्रमिति पूर्वेणान्वयः ॥ ३७३ ॥

न चेन्नश्येत्ततो विश्वं स्वयं व्यर्थीभविष्यति।
नाश्यत्वबोधिका सा चेन्नास्तित्वं का प्रबोधयेत्॥ ३७४ ॥

ततः चरमवृत्तेः। **बोधिका** न तु प्रयोजिकेत्यर्थः। **केति** उपायान्तराभावादित्यर्थः ॥ ३७४ ॥

नाश्यत्वादेव नास्तित्वे हेतुस्स्यादप्रयोजकः।
भावत्वे सति नाश्यं यत्प्रायः कृतकमेव तत्॥ ३७५ ॥

उपायान्तरं शङ्कते **नाश्यत्वादिति**। परिहरति **अप्रयोजक इति**। तदेवोपपादयति **भावत्व इति**। शशविषाणे, मम शुक्तिरूप्यादौ च कृतकत्वाभावेन तत्प्रयोज्यनाश्यत्वासिद्ध्या नास्तित्वस्याप्यसिद्धिरेव स्यादिति भावः ॥ ३७५ ॥

अथ नास्तित्ववक्त्री सा नास्तित्वेनैव नाश्यता।
इति पक्षो यदि भवेद्गताऽज्ञानप्रनाडिका ॥ ३७६ ॥

वक्त्री तद्विषयिणी। **गतेति** परमप्रमेयस्य नास्तित्वस्य सिद्धौ पुनः तदर्थं अर्थापत्त्यनुसरणप्रणाडिका व्यर्थेति भावः ॥ ३७६ ॥

निर्विकल्पकरूपा सा नोभयं च प्रबोधयेत् ॥ ३७७ ॥

निर्विकल्पस्याप्रामाणिकत्वेन बोधकत्वमेव न। दूरे मिथ्यात्वस्य अनित्यत्वस्य वा बोधकत्वमिति भावः ॥ ३७७ ॥

दीपेनेव तया नाशे साक्षान्नाशे गतं मतम्।
अज्ञानद्वारतो नाशे स्यादन्योन्याश्रयादिकम् ॥ ३७८ ॥

नाशे। नाश इति पक्षेऽङ्गीक्रियमाणे। विकल्पयामः साक्षादुत परम्परयेति। आद्ये आह **गतमिति**। द्वितीये आह **स्यादिति** ॥ ३७८ ॥

न ह्यज्ञाने सति ज्ञानं मनोवृत्त्यात्मकं तव।
साक्षिज्ञानवदेवास्याप्यविरोधप्रसङ्गतः ॥ ३७९ ॥

ज्ञानेनैव च तन्नाशे स्यादन्योन्याश्रयो ध्रुवम्।
परस्परालिङ्गिताभ्यां क्लीबाभ्यां
किं फलं भवेत् ॥ ३८० ॥

अन्योन्याश्रयमेवोपपादयति द्वाभ्यां **न हीति**। अतः ज्ञानेनैव तन्नाशो वक्तव्यः। तथा चान्योन्याश्रय इति। अन्योन्याश्रयदुष्टयोरुभयोरप्रामाणिकत्वेनासाधकत्वादिति भावः। साहित्यमुद्रया रञ्जयति **क्लीबाभ्यामिति**। क्लीबः पुमांश्च क्लीबा वन्ध्या च क्लीबौ। पुमांस्त्रियेत्येकशेषः। ताभ्याम् ॥ ३८० ॥

अर्थानपेक्षजन्मा हि दीपोऽन्यत्रापि जायते।
सकर्मकक्रिया ज्ञानं नार्थस्पर्शं विना भवेत् ॥ ३८१ ॥

ननु दीपः अन्धकारं विनाश्य घटं प्रकाशयति। तथा अत्रापि स्यात्। न स्यात्। वैषम्यादित्याह **अर्थेति**। अन्धकारावृतघटेत्यर्थः। तदनपेक्षमेव अन्यत्र अनलवर्तिकाऽऽदिस्वसामग्र्या जायते। स्वोत्पत्तावन्धकाराभावं नापेक्षत इति यावत्। ज्ञानं तु नैवमित्याह **सकर्मकक्रियेति**। हेतुगर्भं विशेषणम्। तथा च आवरणरूपाज्ञाननिवृत्तिमन्तरा ज्ञानोत्पत्तिरेव तव न संभवतीति भावः ॥ ३८१ ॥

आवृतेऽर्थेऽपि चेज्ज्ञानं नावित्तिस्तद्विरोधिनी।
अविरोधि न तन्नाश्यं न चेद्बन्धोऽपि नश्यतु ॥ ३८२ ॥

अन्यथा स्वरूपज्ञानमिव वृत्तिरप्यज्ञानाविरोधिन्येव स्यात्। तथा चाज्ञाननाशकत्वं तस्या न स्यात्। विरोधाभावेऽपि नाशकत्वे बन्धस्यैव ज्ञानेन साक्षान्नाशोऽस्त्वित्याह **आवृते इति** ॥ ३८२ ॥

त्रिक्षणस्थायिविज्ञाने विरम्य व्यापृतिश्च न ॥ ३८३ ॥

ननु ज्ञानं आदौ अज्ञानं विनाश्यानन्तरं स्वयमेव बन्धं नाशयतीति संभावितपक्षं उत्थाप्य दूषयति **त्रिक्षणेति**। अज्ञानं विनाश्य चतुर्थक्षणे स्वयं विनष्टस्य न बन्धनाशकत्वं संभवति। दोषान्तरमाह **विरम्येति** ॥ ३८३ ॥

यद्युत्पत्तौ विरोधो न नाश्यत्वेनैव केवलम्।
विरोध्यज्ञानमुच्येत बन्ध एवास्तु तादृशः ॥ ३८४ ॥

बन्धेऽपि ज्ञाननाश्यत्वरूपा स्याद्धि विरुद्धता।
ज्ञाननाश्यत्वमात्रेणाज्ञानत्वं चास्य संभवेत् ॥ ३८५ ॥

एवं च भवतो व्याप्तिरप्यासीत्किंकरी मम।
अतो नाश्यत्वतोऽवश्यं वाच्याऽन्यैव विरुद्धता ॥ ३८६ ॥

किञ्चाज्ञानमित्यत्र नञर्थः विरुद्धत्वमितिवदविवादम्। स विरोधः ज्ञानोत्पत्तिप्रतिबन्धकत्वं वा ज्ञाननाश्यत्वं वा। द्वितीये बन्धेऽपि ज्ञाननाश्यत्वस्य श्रौतत्वेन अज्ञानत्वं स्यात्। तथा च ज्ञानमज्ञानस्यैव नाशकमिति मदनुकूलैव स्यादित्याह **एवं चेति**। ज्ञानं साक्षाद्बन्धविनाशकमिति मदभिमत एवार्थे पर्यवसानात् ॥ ३८४ ॥ ३८५ ॥ ३८६ ॥

न चेदर्थकृतो रोधश्शब्दरोधेन किं फलम्।
न ह्यश्वानश्वशब्दाभ्यां विरोधोऽस्ति गवाश्वयोः ॥ ३८७ ॥

अर्थयोर्विरोधाभावे नञ्प्रयोगमात्रस्य तन्निश्चायकत्वं न संभवति। भिन्नार्थत्वमात्रस्यापि संभवादित्याह **न चेदिति** ॥ ३८७ ॥

नञो विरोधार्थतैव निर्णेया भावयोः कथम्।
नाश्यत्वमुभयोः श्रौतं तद्ज्ञनाश्यत्वकर्षकः ॥ ३८८ ॥

अज्ञानस्य भावत्वेऽपि ज्ञाननाश्यत्वं श्रुत्या निर्णीयते इति तु बन्धेऽपि समानमित्याह **उभयोरिति**। **तद्ज्ञनाश्यत्वकर्षकः** बन्धवृत्तिज्ञाननाश्यत्वातिरिक्तः अज्ञाने एव विद्यमान एव विरोधः वाच्यः ॥ ३८८ ॥

अन्यः कोऽस्ति विरोधस्ते यद्युत्पत्तिं रुणद्धि न।
प्रमाणपक्षपातस्तु बन्ध एव प्रदृश्यते ॥ ३८९ ॥

स चोत्पत्तिप्रतिबन्धकत्वातिरिक्तो नास्तीत्याह **अन्य इति**। तथा चोक्तोऽन्योन्याश्रयः सुस्थ इति हृदयम्। **प्रमाणेति** नाशरूपविरोध-प्रतिपादकप्रमाणेत्यर्थः ॥ ३८९ ॥

तमसो दीपनाश्यत्वं दीपोत्पत्त्यविरोधिनः।
प्रमाणस्य बलेनैव निर्णेयं नान्यतः क्वचित् ॥ ३९० ॥

लोकेऽप्येवमित्याह **तमस इति**। **अन्यतः** तव परिभाषामात्रेण ॥ ३९० ॥

प्रमाणमन्यथाकर्तुं यत्नोऽयं हि महांस्तव।
श्रुत्युक्तबन्धगज्ञाननाश्यत्वस्यापकृष्टये।
नाश्यत्वादपरः कोऽपि विरोधो वाच्य एव ते ॥ ३९१ ॥

तस्मादन्योन्याश्रयाख्यदोषाभावाद्यथाश्रुतम्।
बन्धस्यैवोचितं ज्ञाननाश्यत्वमिति मे मतिः ॥ ३९२ ॥

अपकृष्टये परित्यागाय। प्रकारान्तरेण विरोधघटनाय ॥ ३९१ ॥ ३९२ ॥

न चेज्ज्ञानविनाश्यत्वघटकस्सोऽन्य एव यत्।
वाच्यो विरोधस्तेऽज्ञाने नोचेद्बन्धो न मुञ्चति॥ ३९३ ॥

ज्ञानोत्पत्तिविरोधित्वमेव स स्यान्न चापरः।
ज्ञानेनैव च तन्नाशे स्यादन्योन्याश्रयो ध्रुवम् ॥ ३९४ ॥

नो चेत् नाश्यत्वमेव विरोध उच्यते चेत् इत्यर्थः। न मुञ्चति। अज्ञानपदवाच्यो नेति निषेद्धुं न शक्यते इत्यर्थः ॥ ३९३ ॥ ३९४ ॥

वृत्त्युत्पत्तिविरोधित्वमज्ञानस्यास्ति तन्मते।
न चेद्विरोधवार्ताया दद्यात्सोऽपि जलाञ्जलिम्॥ ३९५ ॥

वृत्तेः उत्पत्तिप्रतिरोधकत्वमेव विरोध इत्येतदभ्युपगतं विवरणकारेणैवेत्याह तन्मत इति। विरोधः स्वरूपज्ञानेन नास्ति। तस्याज्ञानस्फोरकत्वोपगमात्। वृत्त्याऽपि चेत्स न स्यात्तर्हि अतिप्रसङ्गमाह न चेदिति ॥ ३९५ ॥

अविरोधि किलाज्ञानं स्वरूपज्ञानसंपदः।
अज्ञाने सत्यपि ज्ञानमतश्चिद्रूपमेव हि ॥ ३९६ ॥

मनोवृत्तिस्तु नाज्ञाने सति स्यात्तद्विरोधिनी।
तटस्थशङ्कोच्छेदाय चर्चा चेयं कृता मया ॥ ३९७ ॥

किलेति तत्प्रक्रियाया अपहसनीयतामाह । अज्ञानानाशकत्वे स्वरूपज्ञानस्य तदभिमतज्ञप्तिरूपत्वमेव न स्यात् । तदनाश्यस्याज्ञानस्य मुख्याज्ञानत्वमपि न स्यादिति न्यायामृतोक्तमत्रानुसन्धेयम् ॥ ३९६ ॥ ३९७ ॥

किञ्च ज्ञानेन नाश्यत्वमन्यत्राशास्यतां त्वया ।
यज्ज्ञानेन ज्ञाननाशमाशास्से हास्यमेव तत् ॥ ३९८ ॥

अन्यत्र बन्धोपादानाज्ञाने । **आशास्यतामिति** । तदपि तव दुराशामात्रम् । अन्योन्याश्रयेण दूषितत्वादिति भावः । **हास्यमेवेति** । विरोधस्य भेदसापेक्षत्वात्, तस्य स्वेनैव भेदायोगाच्चेति भावः ॥ ३९८ ॥

वेणुं दन्दहते वह्निर्न स्वयं तेन दह्यते ।
काष्ठाभावेन नष्टोऽसौ कां काष्ठां कष्ट
ते दिशेत् ॥ ३९९ ॥

'वेणुसङ्घर्षजो वह्निः दग्ध्वा शाम्यति तद्वनम् । एवं गुणव्यत्ययजो वेदः शाम्यति तद्यथा' इति वाक्यं तु तव प्रतिकूलमेवेत्याह **वेण्विति** । अग्निना काष्ठस्य नाशान्नष्टः, पुनः काष्ठान्तराभावादनुत्पन्न इत्येव न तु पुनः स्वेनैव स्वयं नाशित इति । एवं दार्ष्टान्तिकेऽपि ज्ञानेन मनोनाशे मनोन्तराभावादेव ज्ञानान्तरस्यानुत्पादः । न तु ज्ञानेन स्वस्यैव नाशः । **काष्ठां** अनुकूलावस्थाम् ॥ ३९९ ॥

रजोऽपि कातकं पङ्कमधःकुर्यान्न घातकम् ।
स्वयं चान्तेरजोरूपमधोगच्छेद्वधोऽस्य न ॥ ४०० ॥

कतकरजोदृष्टान्ते तु नाशवार्तैव नेत्याह **रज इति** ॥ ४०० ॥

अन्यद्धि नाशयेज्ज्ञानं त्रिक्षणं स्वस्थितिक्षणे ।
नाशक्षणे स्वयं नश्यत्स्वं वाऽन्यं वा न नाशयेत् ।
स्वेनैव स्वस्य नाशस्तु नास्ति लोकत्रयेऽपि ते ॥ ४०१ ॥

नाशक्षणे तृतीयक्षणे । कारणमेव न । दूरे स्वनाशकारणत्वम् इत्याह **अन्यदिति** ॥ ४०१ ॥

वष्ट्यदृष्टं यदि स्पष्टमोष्ठकुष्टं भवेत्तव।
साक्षादेव स्वयं ज्ञानं स्वात्मानं नाशयेत्किल॥ ४०२ ॥

वष्टि इच्छति। भवानिति शेषः। **अदृष्टं स्वेनैव** स्वस्य नाशम्। **कुष्ठं** अदृष्टमित्यस्यानुकर्षः। अदृष्टकल्पना दोष इति भयस्य त्वयैव त्याजितत्वादिति भावः॥ ४०२ ॥

ज्ञाननाश्ये तवाज्ञाने ज्ञानोपादानतैव न।
तमसो दीपनाश्यस्य दीपोपादानताऽस्ति किम्॥ ४०३ ॥

ज्ञानं प्रति नाज्ञानं उपादानं येनाज्ञाननाशे स्वयं विलीयेत। तत्र दृष्टान्तः **तमस इति**॥ ४०३ ॥

दशानिमित्तो दीपस्तु तान्दशां नाशयेदपि।
दशाखण्डात्मिका कंथा किं तां हन्ति विचारय॥ ४०४ ॥

कार्येण क्वचित् स्वनिमित्तकारणनाशः संभवति। तयोर्भेदात्। अभिन्नस्य स्वोपादानस्य नाशस्तु न सर्वथा संभवतीति दृष्टान्ताभ्यामुपपादयति **दशानिमित्त** इति **दशाखण्डात्मिकेति च**॥ ४०४ ॥

उपादानमुपादेयाभिन्नमित्यावयोर्मतम्।
कथं विरुद्धयोरैक्यमैक्ये च क्व विरुद्धता॥ ४०५ ॥

विरुद्धयोर्ज्ञानाज्ञानयोर्दीपतमसोरिव नैक्यं तत एव तत्सापेक्षोपादानोपादेयभावश्चेत्याह **उपादानेति**॥ ४०५ ॥

न चेद्विशिष्टयोरैक्यं स्यादत्यन्तविरुद्धयोः।
अतः केनाप्युपायेन न ज्ञानं ज्ञाननाशकम्॥ ४०६ ॥

केनापि साक्षाद्वा अज्ञाननाशद्वारा वा॥ ४०६ ॥

ज्ञानस्थितिक्षणोऽवश्यमज्ञानस्य स्थितिक्षणः ।
उपादेयस्थितिर्या सा सोपादानस्य च स्थितिः ॥ ४०७ ॥

न हि तन्तुस्थित्यभावदशायां च पटस्थितिः ।
ततस्तदैव न तयोर्वध्यघातकतोचिता ॥ ४०८ ॥

उपादानोपादेयभावे ज्ञानाज्ञानयोः सहस्थितिरेव स्यात् । न विरोधसापेक्षो वध्यघातुकभाव इत्याह **ज्ञानेत्यादिभिः** ॥ ४०७ ॥ ४०८ ॥

स्थितिर्भावो वधो ध्वंसस्तावुभावेकदा कथम् ।
क्षणान्तरे स्वयं नश्यत्कस्य वा स्याद्विनाशकम् ॥ ४०९ ॥

अन्योन्यमसहिष्णुत्वरूपवैराभिधे पुरा ।
विरोधे सति सिंहोऽपि गजं हन्ति न चान्यथा ।
न हि स स्वशिशून्हन्ति नापि हन्ति सहोदरान् ॥ ४१० ॥

वध्यघातुकभावे क्लृप्तानां प्रकाराणां मध्ये कतमोऽपि न ज्ञानाज्ञानयोस्त्वन्मते शक्यसंभावन इति निर्धारयितुं संभावितान् प्रकारान् विविनक्ति **अन्योन्यमिति-प्रभृतिभिश्चतुर्भिः** । समबलयोर्गजसिंहयोः अन्योन्यमसहिष्णुत्वं प्रयोजकम् ॥ ४०९ ॥ ४१० ॥

समयोस्तु विरोधोऽयं नीचस्योच्चैस्सहास्थितिः ।
हन्तुर्बलादेव परं नोचेन्नीचः पलायते ॥ ४११ ॥

नीचोच्चयोस्तु सहस्थितिरुच्चस्य बलादेव । तथा च तत्र स्वारसिकसहावस्थानमेव विरोध इत्याह **समयोरिति** ॥ ४११ ॥

जलाग्न्योर्दीपतमसोस्तद्वदागदयोरपि ।
मध्ये वध्यस्य न सहस्थानं तत्तत्स्वभावतः ॥ ४१२ ॥

विरुद्धगुणवत्त्वेन वध्यघातकता क्वचित् ॥ ४१३ ॥

अचेतनेषु पुनर्वैराभावेऽपि, स्वभावतो वा विरुद्धगुणवत्त्वेन वा नाश्यनाशकभाव इति निदर्शयति **जलेति**। **क्वचिदिति** वह्निकाष्ठयोरित्यर्थः ॥ ॥४१३ ॥

विचार्यमाणे सर्वत्राप्येकैकस्मात्प्रयोजकात्।
वध्यघातकता दृष्टा तव ज्ञाने न कश्चन ॥ ४१४ ॥

उपादानमुपादेयविरोधि स्यात्कथं वद।
अतो द्वेधापि न ज्ञानं स्वयमेव स्वघातकम्।
ज्ञानाविनाश्यं तज्ज्ञानं केनोपायेन ते मृषा ॥ ४१५ ॥

ज्ञानाज्ञानयोस्त्वन्मते उपादानोपादेयभावापन्नत्वात् उक्तेषु कतमोऽपि प्रकारो न संभवतीत्याह **विचार्यमाण इति**। **केनापि** साक्षाद्वा अज्ञाननाशद्वारा वा ॥ ॥४१५ ॥

किञ्च नश्यज्जनं पश्य बोधोच्छेदः पुरैव हि ॥ ४१६ ॥

लक्षणं ज्ञाननाश्यत्वं ज्ञानिदेह एवाव्याप्तमिति द्वेधाऽऽह। **किञ्चेत्यादिना**। 'मनः प्राणे प्राणस्तेजसि' इति प्राणलयात्प्रागेव ज्ञानकरणस्य मनसो लयश्रवणादिति भावः ॥ ४१६ ॥

शुना परशुना वन्यपशुना वा तनुक्षयः।
ज्ञानाविनाश्यो देहोऽयं केनोपायेन ते मृषा ॥ ४१७ ॥

ज्ञानेतरेणैव नाश्यत्वदर्शनाच्चैवमित्याह **शुनेति** ज्ञानेतरोपलक्षणम्। कलेवरो विट्कृमिभस्मसंज्ञितः' इत्युक्तेर्वह्न्यादेरपि संग्रहः। तनुक्षयः ज्ञानिनामपि इत्युपस्कर्तव्यम्। तेन ज्ञानाविनाश्य इत्युक्त्युपपत्तिः। **केनेति** ज्ञानेन अज्ञाननिवृत्त्यनन्तरमप्यनुवर्तमानस्य अज्ञानकार्यत्वासिद्धेः। अज्ञानकार्यत्वस्यैव च त्वन्मते मृषात्वात् ॥ ४१७ ॥

अथ स्वरूपज्ञानं च स्वकार्यैस्सह वर्तते ।
अखण्डार्थपदश्रुत्या मानसी चापरोक्षधीः ॥ ४१८ ॥

क्षणे क्षणे भवत्येव रंडागीतश्रुतावपि ।
अविद्यावरणं चास्ति दुर्घटं घटयन्त्यसौ ॥ ४१९ ॥

इत्यावृतिश्च स्यादेवेत्यौद्धत्याद्वक्ति कश्चन ।
तर्ह्यावरणतागोष्ठी वार्तामात्रमभूदियम् ॥ ४२० ॥

अखण्डार्थविषयकवाक्यस्य अबोधकत्वपर्यवसितत्वेन तादृशवाक्योच्चारयितरि नाप्तेः कोऽप्युपयोग इत्याशयेनाह **रण्डेति** । स्वरूपज्ञानं वृत्तिज्ञानं चेति प्रकाशद्वयस्याप्यप्रतिबन्धकत्वेऽपि अज्ञानस्यावरणतां ब्रुवाण उद्धत एवेति भावेनाह **औद्धत्यादिति** ॥ ४१८ ॥ ४१९ ॥ ४२० ॥

ज्ञानद्वयमरुन्धत्या स्थितया गतया च किम् ।
कुड्यावरणवद्द्रष्टुः किं व्योमावरणाद्भयम् ॥ ४२१ ॥

दुर्घटं घटयन्ती चेत्स्वस्थितौ मुक्ततामपि ।
घटयेदेव सा साध्वी किं तया हतया तव ॥ ४२२ ॥

अरुन्धत्या दृष्टिं अप्रतिबध्नन्त्या । **गतया** इत्यनास्थया । **व्योमावरणादिति** । व्योम्न इवाज्ञानस्यावरणत्वमेव नेति भावः ॥ ४२१ ॥ ४२२ ॥

यस्मिन्सत्येव यज्जन्म यस्मिन्सत्येव यत्स्थितिः ।
न मृतिर्नापसरणं नापकारोऽपि कश्चन ॥ ४२३ ॥

यस्मिन् अज्ञाने । **यदिति** वृत्तिज्ञानेत्यर्थः । **न मृतिः न** अपसरणम् । भीरुभटवदपसरणमिति परपक्षमनुरुध्यैतदुक्तम् । अज्ञानस्येति शेषः । **नापकारः** अज्ञानेन पूर्वोक्तज्ञानद्वयस्येति भावः ॥ ४२३ ॥

कार्यकारणभावेन ये चाभिन्ने परस्परम्।
अवध्यघातिनी साकं स्थिते कस्माद्विरोधिनी ॥ ४२४ ॥

अभिन्ने इति ज्ञानस्य मिथ्यात्वेन अज्ञानोपादानकत्वात् इति भावः। सहानवस्थानलक्षणविरोधोऽपि नेत्याह **साकमिति** ॥ ४२४ ॥

यां सपक्षप्रसूरेव सुखं न सुषुवे पुरा।
सा व्याप्तिकन्या त्वन्न्यायात्पक्षं पत्युर्गृहं जहौ ॥ ४२५ ॥

व्याप्तिग्रहणस्थलत्वात् सपक्षः प्रसूः सवित्री। तां व्याप्तिं पक्षेऽनुसन्धाय साध्यस्य सिषाधयिषिततया पक्षः पतिः। **सुखं न सुषुव इति।** अज्ञानं ज्ञाननिवर्त्यं ज्ञानविरोधित्वात् ज्ञानप्रागभाववत् इति प्रयोगे दृष्टान्तस्य साध्यविकलत्वेन सपक्षताया एवाभावात्। प्रतियोगिनः प्रागभावनिवृत्तिरूपत्वेन तन्निवर्तकत्वाभावादिति भावः। तदुक्तं वादावल्यां 'न हि भावः स्वप्रागभावनिवर्तकः। भावाभावयोः सहावस्थानविरोधादि'ति। **जहाविति।** स्वयमनवक्लृप्तायाः साध्यसाधनासामर्थ्यादिति भावः ॥ ४२५ ॥

अतः श्रुतिगृहावाप्तभिक्षान्नेन जिजीविषेत्।
वृथाऽद्य मा कृथा मातुश्शयनीये पदोद्यमम् ॥ ४२६ ॥

अतः लोके दृष्टान्ताभावेन। **श्रुतीति।** 'तमेवं विद्वानमृत इह भवती'त्यादिश्रुतीत्यर्थः। श्रुतेरुपजीव्यत्वात् मातुरित्युक्तम्। पदोद्यमं तदर्थापलापेन मातृगामित्वमिव तन्मानापहारलक्षणं पापमिति ध्वनिः। 'विद्वानमृत इह भवति' इत्याद्या श्रुतिः ज्ञानेनैव बन्धनिवृत्तिं वक्ति। न तु अज्ञाननिवृत्तिप्रणाड्या इति स्फुटः श्रुत्यर्थापलापः इति भावः ॥ ४२६ ॥

किञ्चाज्ञ भवदाचार्यचातुर्यं त्वं विचारय।
योऽविद्यास्तमयो मोक्षस्सासंसार उदाहृतः ॥ ४२७ ॥

इत्याह सोऽधुना श्रुत्या प्रोक्तार्थं चोत्सिसृक्षति।
स्वयं किं वक्ति, सा वाणी
किं वक्तीति विचार्यताम्॥ ४२८॥

चातुर्यं विपरीतलक्षणया श्रुतिविरुद्धार्थभाषित्वरूपं मूर्खत्वमित्यर्थः। विरोधमेवोपपादयति **य इति**। तथा च स्वोक्तस्यैवार्थस्य श्रुत्याऽपि वचनात् तन्निराकरणफलकः अध्यासवादः कथं न महोन्मत्तप्रलाप इति भावः॥ ४२८॥

सा चाज्ञानाख्यबन्धस्य च्छेत्तृज्ञानमचीकथत्।
एवं सति किमाक्षेप्यं किं वाऽऽक्षेपकमुच्यताम्॥ ४२९॥

एवं सति आक्षेपके अनुपपत्त्यभावे सति॥ ४२९॥

का वाऽत्रायुक्तता नाम कस्योपादानमज्ञता।
व्याप्तिः कस्यापकाराय चित्रं शास्त्रप्रवर्तनम्॥ ४३०॥

कस्येति अविद्यासंसारयोरैक्यस्योक्तत्वेन उपादानोपादेयभावासंभवादिति भावः॥ ४३०॥

पूर्वोत्तरापरिज्ञानोपादानं शास्त्रमेव तत्॥ ४३१॥

अपरिज्ञानोपादानं अज्ञाननिमित्तकम्। **शास्त्रं** अध्यासभाष्यम्॥ ४३१॥

अपि चान्यां कथां मोक्षपथारोहे श्रुतां श्रृणु॥ ४३२॥

यदा स्यात्परमो मोक्षो लिङ्गभङ्गस्तदा किल।
महाऽविद्यानिवृत्तिश्च तदैव स्यान्मुमुक्षताम्।
अनल्पकल्पपर्यन्तं संसारयति या बुधान्॥ ४३३॥

जीवन्मुक्तिदशाऽनुपपत्तिश्च परमते इत्याह **अपि चेत्यादिना**। तदुक्तं सुधायां 'अपि च यदि बन्धमिथ्यात्वं यदि च ज्ञानमात्राद्बन्धबाधः तदा ज्ञाने जाते किमपि मुक्तिर्नैवापेक्षत इति सद्य एव साक्षात्कृतब्रह्मणां शरीरादिनिवृत्तिः प्रसज्येत' इति।

लिङ्गदेहरूपबन्धनाशास्तु न ज्ञानमात्रेणेत्याह **यदेति** **तदैव** प्रारब्धकर्मनाशानन्तरमेव ॥ ४३३ ॥

नश्यन्नश्यन्नयं देहो न तथा बन्धनं नृणाम् ।
यथाऽनादिर्लिङ्गदेहो यो ज्ञानघनमग्रसीत् ॥ ४३४ ॥

सैवाविद्याऽतिमहती या न ज्ञानेऽप्यनश्यत ।
नानाभोगस्य देहस्य जीवन्मुक्तौ च साधिका ॥ ४३५ ॥

ज्ञानोदयादाविमोक्षं जीवन्मुक्तिदशा किल ॥ ४३६ ॥

एवञ्च लिङ्गदेहास्ते साऽविद्या तन्निमित्तकाः ।
पुत्रमित्रकलत्राद्या देहगेहधनादयः ॥ ४३७ ॥

अनन्ता मुक्तिपर्यन्ता हेतूपोद्बलितादपि ।
पूर्वज्ञानादप्रनष्टा न ज्ञानस्य विरोधिनः ॥ ४३८ ॥

पुनर्ज्ञानशतेनापि निवर्त्या नेति मे मतिः ।
दवाग्निना यो न दग्धः किन्तद्दाहो गृहाग्निना ॥ ४३९ ॥

बहुकालव्यवहितं स्वभावादनिवर्तकम् ।
श्रुत्युक्तं साधनं ज्ञानं द्वारमन्यदपेक्षते ॥ ४४० ॥

ज्ञानधनं स्वप्रकाशमपि जीवम् । न चैतदावरकत्वं केवलं जडस्य लिङ्गदेहस्य संभवति । अतः परमेश्वर एव अचिन्त्ययाऽद्भुतया स्वशक्त्या स्वप्रकाशमपि स्वरूपचैतन्यमाच्छादयतीति युक्तम् । अतः स एव लिङ्गदेहनाशकोऽङ्गीकार्य इत्याह **द्वारवतीनाथमिति** ॥ ४३४ ॥ ४३५ ॥ ४३६ ॥ ४३७ ॥ ४३८ ॥ ४३९ ॥ ॥४४० ॥

अनष्टाज्ञाननाशाख्यद्वारं पूरितमेव ते ।
अतो द्वारवतीनाथं द्वारसिद्ध्यै भज प्रभुम् ॥ ४४१ ॥

अज्ञानस्य द्वारत्वकल्पनं तदा स्यात् यदि ज्ञानमज्ञानस्य निवर्तकं, बन्धश्च अज्ञानोपादानक इति स्यात्। ज्ञानानन्तरमपि जीवन्मुक्तिदशायां बन्धस्यानुवृत्तिदर्शनात्तदुभयमपि नास्तीत्युपपादितम्। अतः अगत्या प्रमितो द्वारवतीनाथस्य कृष्णस्य प्रसाद एव बन्धनिवृत्तौ द्वारमङ्गीकरणार्हं इत्याह **अनष्टेति। पूरितं** पिहितम् ॥ ४४१ ॥

मयि भक्तिर्हि लोकानाममृतत्वाय कल्पते।
इति भागवते योऽसौ मुक्तेर्द्वारमबूबुधत् ॥ ४४२ ॥

कल्पते प्रसादद्वारेति शेषः ॥ ४४२ ॥

अज्ञानानुसृतिस्तस्मादज्ञानादेव केवलम्।
नोपादानमनादेर्यन्नापि ज्ञानान्यलीयत ॥ ४४३ ॥

अज्ञानानुसृतिः अज्ञाननिवृत्तेः द्वारत्वकल्पनम्। **अज्ञानात्** प्रसादस्यैव मोक्षहेतुत्वप्रतिपादकप्रमाणानामिति शेषः। उक्तार्थे प्रागुक्तहेतुद्वयं स्मारयति **नेति** ॥ ॥४४३ ॥

किञ्चाधिष्ठानचैतन्यस्याज्ञानावरणे सति।
अर्थानुल्लेखिताख्यं स्याद्वैकल्यं भवतो मते॥ ४४४ ॥

प्रपञ्चः सत्यः तत्त्वावेदकप्रमाणदृष्टत्वात्। ब्रह्मवत्। प्रपञ्चः तत्त्वावेदकप्रमाणदृष्टः संप्रतिपन्नभ्रान्तपदार्थेतरत्वात् ब्रह्मवत्। इति वादावल्युक्ते अनुमाने हृदि निधाय परप्रक्रिययैव परं दुदूषयिषुः तामनुवदति **किञ्चेति। अधिष्ठानचैतन्यमिति**। तन्मते जडावरकाज्ञानानुपगमात्। 'पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः' इति विवरणोक्तेः। **अर्थानुल्लेखि**। अर्थप्रकाशकं न। अनावृतस्यैव अधिष्ठानचैतन्यस्य प्रकाशकत्वात्। **वैकल्यं** प्रमाणवैकल्यम् ॥ ४४४ ॥

अनाद्येव तदज्ञानं नान्तरागन्तुकं किल।
न चेदज्ञातताऽर्थस्य कथं स्याज्जडवस्तुनः ॥ ४४५ ॥

किलेति। 'अविद्यातच्चितोर्योगः षडस्माकमनादयः' इति तन्मतप्रसिद्धिमाह। **न चेत्** आवृतचैतन्यरूपं प्रमाणवैकल्यं न चेत्। **कथमिति** अज्ञातताया अज्ञाननिमित्तकत्वादिति भावः ॥ ४४५ ॥

चिद्वैकल्यादेव तेषामज्ञातत्वं मते तव।
न हि प्रातीतिकस्सर्वो घटादिरपि ते मते ॥ ४४६ ॥

घटादीनां अज्ञानं प्रति घटाधिष्ठानचितः अज्ञानावृतत्वमेव हेतुः। आवरणनिवृत्तिश्च अपरोक्षवृत्तिप्रतिबिम्बितज्ञातृचैतन्येनैवेत्याह **चिदिति**। तत्र हेतुः **न हीति**। प्रातिभासिकानि खलु शुक्तिरूप्यादीनि न प्रतिभासार्थं वृत्तिमपेक्षन्ते। प्रतिभासमात्रशरीरत्वात्तेषाम्। घटादयस्तु त्वन्मते न तथा इति भावः। तथा च संप्रतिपन्नभ्रान्तपदार्थाः प्रातिभासिकाः तदितरत्वं घटादीनामिति साधयता संप्रतिपन्नभ्रान्तपदार्थेतरत्वात् इति वादावल्युक्तहेतोः असिद्धिः परिहृता ॥ ४४६ ॥

अतोऽप्रतीतता तेषामधिष्ठानावृतेः परम्।
भ्रमानुकूलं पूर्वं चेत्तं रुणद्धि पुनः कथम् ॥ ४४७ ॥

अतः आध्यासिकसंबन्धस्य सृष्टेः प्रागपि विद्यमानत्वात्। **आवृतेः** अज्ञानेन इति शेषः। **पूर्वं** सृष्टेः प्राग्विद्यमानं अज्ञानम्। **तं** भ्रमम्। न हि तदनुकूलं तन्निरोधकं चेति संभवति इत्याह **कथमिति** ॥ ४४७ ॥

पश्चात्तु तन्निरोधाय किमज्ञानं तपोऽतपत्।
मध्येऽज्ञानान्तरोत्पत्तावनादित्वकथागता ॥ ४४८ ॥

प्राक् सृष्टेः भ्रमानुकूलस्यैवाज्ञानस्य पश्चात् भ्रमनिरोधकत्वं जायते इति कल्प्यते इति चेत्, एवं तर्हि पश्चात्तस्यैव तन्निरोधकत्वाय योगिनस्तप इव किमप्यागन्तुकं कारणं कल्पनीयम्। तच्च नास्तीत्याह **किमिति**। मध्ये भ्रमनिरोधकं अज्ञानान्तरं उत्पद्यते इति कल्पनं च अज्ञानस्यानादित्वाभ्युपगमात् अपसिद्धान्तदोषपराहतमित्याह **अनादित्वेति** ॥ ४४८ ॥

मुक्तावपि तदुत्पत्त्या स्यान्मुक्तस्य पुनर्भवः ।
तस्मादावृतचैतन्यं नार्थज्ञानं भवेत्तव ॥ ४४९ ॥

उत्पत्तिपक्षे दोषान्तरं चाह **मुक्तावपीति**। फलितमाह **तस्मादिति**। **नेति** केवलमिति शेषः । किन्तु वृत्तिसहकृतमेवेति भावः ॥ ४४९ ॥

अतदाकारविकृतिरधिष्ठानावृतिस्तथा ।
द्वे शक्ती किल तेऽज्ञाने वैकल्यस्यैव कर्तृ तत् ॥ ४५० ॥

तत् अज्ञानम् । एवेति भ्रमं व्यवच्छिनत्ति ॥ ४५० ॥

अतोऽज्ञानोद्भवं विश्वं तदा ब्रह्म न वीक्षते ।
उत्पत्तिसमये सर्वमनारोपितमेव तत् ॥ ४५१ ॥

जगदारोपः किं सृष्टिकाले उत पश्चात् । नाद्यः उक्तदिशा दूषणादित्याह **अत इति** ॥ ४५१ ॥

वृत्त्याऽज्ञाननिवृत्तौ हि ब्रह्म तत्तद्भ्रमस्तव ।
अपरोक्षा तु या वृत्तिस्सैवाज्ञाननिवर्तिका ॥ ४५२ ॥

द्वितीयेऽपि वृत्त्यैव अज्ञाननिवृत्तौ सत्यां घटादिभ्रमसिद्धिरेष्टव्या । तदपि घटादेः सत्यत्वमेवाक्षिपति मिथ्यात्वं तु प्रतिक्षिपत्येवेत्याह **वृत्त्येत्यादिभिः**। **सैवेति**। न तु परोक्षवृत्तिः । तत्र चित्प्रतिफलनानङ्गीकारात् । अन्यथा धर्माद्यतीन्द्रियस्याप्यापरोक्ष्यापातादिति तदाशयः ॥ ४५२ ॥

सा चार्थेन्द्रियसंयोगे सत्येव स्यान्न चान्यथा ।
सन्निकर्षश्च संबन्धिद्वयसत्त्वे परं भवेत् ॥ ४५३ ॥

किं ततः इत्यतो जगतः सत्यत्वमेवायातमित्याह **सा चेति** ॥ ४५३ ॥

अतो भ्रमात्पूर्वमेव सर्वमेतच्चराचरम् ।
जगदस्तीति किं वा ते भवेदारोपितं वद ॥ ४५४ ॥

अतो व्यावहारिकत्वेन त्वदभिमतवियदादिसर्वजगतः भ्रमात्पूर्वमेव सत्त्वसिद्ध्या ब्रह्मवत् तस्य तत्त्वावेदकप्रमाणदृष्टत्वं तेन च पारमार्थिकत्वं बलादेव सिध्यत इत्याह **अत इति** ॥ ४५४ ॥

तस्मादभ्रमसिद्धत्वाद्ब्रह्मवत्परमार्थसत् ।
परप्रक्रिययैवाभूच्चराचरमिदं जगत् ॥ ४५५ ॥

अभ्रमसिद्धत्वात् संप्रतिपन्नभ्रान्तपदार्थेतरत्वात् । प्रातिभासिकेतरत्वात् व्यावहारिकत्वादिति यावत् । असिद्धिस्तु भ्रमात्पूर्वमेव जगतः सद्भावसमर्थनेन परिहृता ॥ ४५५ ॥

ब्रह्मचिन्न घटारोपो यदज्ञाननिवर्तनम् ।
साऽपेक्षते तच्च साक्षात्कारिवृत्तिमसौ पुरा ॥ ४५६ ॥

अवश्यमर्थसंबन्धं स चार्थानामवस्थितिम् ।
एवं च प्राक्सतोऽर्थस्य कथं स्यादन्त्यजाज्जनिः ॥ ४५७ ॥

उक्तमेव स्मारयति द्वाभ्यां **ब्रह्मेत्यादिना** ॥ ४५६ ॥ ४५७ ॥

मर्त्यापरोक्षवृत्तिश्च तत्तेऽभून्न जगद्भ्रमः ।
यतोऽर्थसन्निकर्षोत्था सा सर्वत्र विचारणे ॥ ४५८ ॥

अनेनैव वृत्तिज्ञानस्यापि भ्रमरूपता परास्तेत्याह **मर्त्येति** अन्तःकरण-निर्गमनादेर्वृत्तिहेतोः मर्त्येष्वेव संभवादेवमुक्तम् ॥ ४५८ ॥

मायामयस्य चारोपो द्रष्टृणां दुष्टचक्षुषां ।
अमायिकेनैव भवेद्रजतस्येव स भ्रमः ।
दोषशक्त्यैव सर्वत्र नाक्षयोगमपेक्षते ॥ ४५९ ॥

जगतो मायामयत्वपक्षमपि 'न च मायाविना माया दृश्यते विश्वमीश्वरः । सदा पश्यति तेनेदं न मायेत्यवधार्यतामि'ति तत्त्वोद्योतोदाहृतप्रमाणानुसारेण निराह **मायामयस्येति** । एवं हि परप्रक्रिया । अज्ञानं द्विविधं माया अविद्या चेति ।

परव्यामोहकरी माया। तत्कल्पितं चाम्बरादिकम्। स्वाश्रयव्यामोहकरी अविद्या। तत्कल्पितं च दुःखादिकम्। मायिकानां असत्त्वेन सन्निकर्षासंभवात्, तत्स्थाने दोष एव दर्शनहेतुरभिषेक्तव्यः। स च न मायिकः किन्तु सत्य एव। लोके ऐन्द्रजालिकपदार्थद्रष्टृषु तथा दर्शनात्। अतो दोषस्य तावत् सत्यत्वं सेत्स्यतीत्याह **दोषेति** ॥ ४५९ ॥

सर्वं मायामयं यस्य तस्य देहेन्द्रियादिकम्।
कस्य वा मायया सृष्टं न हि मायाविनि भ्रमः ॥ ४६० ॥

एवं लोके ऐन्द्रजालिकस्येव जगत्स्रष्टुः मायाविनोऽपि देहेन्द्रियादिकस्य सत्यत्वसिद्धिर्निष्प्रत्यूहेत्याह **सर्वमिति**। मायाविना दृश्यमानत्वादिति भावः ॥ ॥४६० ॥

मायाविनो महेशस्य यदि भ्रान्तिर्निगद्यते।
तर्हि माया न सा तस्याप्यासीदज्ञानमेव तत् ॥ ४६१ ॥

एवमपि तस्य मायिकत्वाङ्गीकारे स्वाश्रयव्यामोहकरत्वापत्त्या मायालक्षणव्याघात इत्याह **तर्हीति** ॥ **अज्ञानमेव** = अविद्यैव ॥ ४६१ ॥

एवञ्चाज्ञानाप्तिवैकल्याख्यशल्योद्धृतेः पुरा।
नोल्लिखेदैश्वरी वा चिद् ब्राह्मी चिद्वा जगत्त्रयम्।
चिन्मात्रेऽप्यस्ति वैकल्यं न चेज्जीवचितोऽपि न ॥ ४६२ ॥

अविद्यापक्षे प्रागुक्तं दोषं स्मारयति **एवमिति**। चिन्मात्रे इत्यत्र मात्रशब्दः कार्त्स्न्यार्थः। दोषस्य सर्वत्र साम्यात् ॥ ४६२ ॥

दृग्दृश्ययोगायोगेन वृत्तिश्च न जगद्भ्रमः।
यत्साऽर्थयोगवत्साऽऽभा तस्माच्च न जगद्भ्रमः।
तस्मान्नारोपयेदैशी ब्राह्मी वा चिज्जगन्मम ॥ ४६३ ॥

वृत्तिज्ञानपक्षेऽपि प्रागुक्तं दोषं स्मारयति **दृगिति**। **योगवत्साभा** = सन्निकर्षजन्या ॥ ४६३ ॥

मायाविनो न चेद्भ्रान्तिर्विश्वमासीदनाकुलम्।
मायाविनो यदि भ्रान्तिर्विश्वं नारोपितं मम ॥ ४६४ ॥

किञ्च मायावी ईश्वर एव तवाभिमतः। तस्य **भ्रान्तिः** मायिकवस्तुदर्शनं अस्ति न वा। न चेत् तस्य ज्ञानस्य प्रमात्वापत्त्या तद्विषयस्य विश्वस्य सत्यत्वमेव स्यादित्याह **विश्वमिति**। अस्ति चेत् तथाऽपि विश्वसत्यत्वमेव सेत्स्यतीत्याह **नारोपितमिति**। भ्रान्तेः सत्याधिष्ठानप्रधानसादृश्यद्रष्टृतद्देहेन्द्रियदोषसंस्कार-बाधकाज्ञानादिपूर्वकत्वनियमात्। देहेन्द्रियादीनां च पृथिव्यादिकार्यत्वात् तेषामपि सत्यत्वमावश्यकम्। न चैतेषां अपि भ्रान्तिविषयता। अन्योन्याश्रयात्। भ्रान्तिसिद्धौ देहेन्द्रियादिसिद्धिः तत्सिद्धौ च भ्रान्तिसिद्धिरिति। अत्र विस्तरः न्यायामृते प्रतिकूलतर्कपराहतिप्रकरणे (प्र. २५) ॥ ४६४ ॥

किञ्च मायाविनस्स्थूलदेहेन्द्रियगुणादिकम्।
ब्रह्मगाज्ञानपरिणामात्मकं तेन चेष्यते ॥ ४६५ ॥

बकबन्धनन्यायपराहता चेयं परप्रक्रियेत्याह त्रिभिः **किञ्चेत्यादिना**। **ब्रह्मणोऽज्ञानपरिणामात्मकं** व्यावहारिकम्। न तु प्रातिभासिकम्। तथा च जगदपि तथैव आविद्यकं अस्तु किं मायिकत्वदुर्व्यसनेन। लाघवात् ऐकरूप्याच्चेति भावः ॥ ॥४६५ ॥

एवं चेज्जगदेतच्च ब्रह्म स्वाविद्यया सृजेत्।
अतदाकारपरिणामाख्यविक्षेपशक्तया ॥ ४६६ ॥

देहेन्द्रियादीनामिव विश्वस्यापि अतदाकारपरिणामरूपया अविद्याशक्त्यैव सृष्टिः तन्मते सुलभैवेत्याह **एवमिति** ॥ ४६६ ॥

अज्ञानापगमे चाधिष्ठानदृक्चास्तु तस्य दृक्।
बकबन्धाय निर्बन्धो निर्निबन्धन एव ते ॥ ४६७ ॥

कथं तर्हि विश्वस्य दर्शनमित्यतः मोक्तं विस्मार्षीरित्याह **अज्ञानापगम इति** ॥ ॥४६७ ॥

तस्मादज्ञानकलिलं ब्रह्म वा मायया वृतः ।
महेश्वरो वा सर्वार्थांस्तया पूर्वं द्विरूपया ॥ ४६८ ॥

अतदाकारपरिणामाख्यविक्षेपशक्तया ।
करोत्येव ततः पश्चात्सन्निकृष्टेन्द्रियैश्शुभैः ।
पश्यन्ति सर्वे सर्वत्रेत्येव वाच्यं त्वयाऽपि हि॥ ४६९ ॥

कलिलं आवृतम् । माययेत्यनास्थया । स्रष्टा यो वा को वाऽस्तु आविद्यकैव सृष्टिस्त्वयोच्यतां न मायिका इत्यत्र नैर्भर्यम् । अतदाकारपरिणामशक्तेः अविद्यायामेव संभवात् । **सन्निकृष्टेन्द्रियैरिति** । अन्यथा प्रतिकर्मव्यवस्थाऽयोगात् ॥ ४६८ ॥ ४६९ ॥

मायारूप्यं शुक्तिरूप्यं दोषशक्त्यैव केवलम् ।
दृष्टं स्यात्सन्निकृष्टत्वं तत्र नेष्टं द्वयोरपि ।
अतस्तदारोपितं स्याद्दोषयुक्तेन चक्षुषा ॥ ४७० ॥

प्रातिभासिकदर्शने सन्निकर्षासंभवात् दोष एव तत्कार्यकर इत्याह **मायेति** ॥ ॥४७० ॥

व्यावहारिकविश्वं तु सन्निकर्षेऽक्षगोचरः ।
नो चेन्नेति मतं यस्मात्तवापि च ममापि च ।
तस्मादनारोपितत्वं तत्त्वमासीज्जगत्रये ॥ ४७१ ॥

तस्मात् व्यावहारिकवस्तुदर्शनस्य अन्वयव्यतिरेकाभ्यां सन्निकर्षसापेक्षताऽध्यवसायात् सन्निकर्षस्य च पूर्वं वस्तुसद्भावनियतेः भ्रान्तेः पुरैव विद्यमानस्य भ्रान्तिकल्पितताऽसंभवाच्चेति भावः ॥ ४७१ ॥

अतस्त्वत्प्रक्रियाम्बैव सूते नारोपितं जगत्।
या जलाञ्जलिना स्वेनैवारोपाग्निमशीशमत् ॥ ४७२ ॥

अतः संप्रतिपन्नभ्रान्तपदार्थेतरत्वरूपस्य प्रातिभासिकेतरत्वस्य त्वयैव वियदादौ विश्वेऽभ्युपगमात्। स एव वादावल्युक्तो हेतुः। **अनारोपित्वं** तत्त्वावेदकप्रमाणदृष्टत्वं तत एव पारमार्थिकसत्यत्वं च **सूते** निराबाधतया साधयति। ब्रह्मणोऽन्वयदृष्टान्तस्य, शुक्तिरूप्यादेर्व्यतिरेकदृष्टान्तस्य च जागरूकत्वादिति भावः। **जलाञ्जलिना** व्यावहारिकत्वाभ्युपगमेन ॥ ४७२ ॥

अतो मूलस्य शोधे तु मिथ्यात्वे नास्ति कारणम्।
सत्यत्वसाधकान्येव सन्दृश्यन्ते सहस्रशः ॥ ४७३ ॥

मूलस्य। चिद्वेद्यत्वे वा वृत्तिवेद्यत्वे वा प्राक् सन्निकर्षसंपादकतया सत्वत्वापेक्षारूपस्य। तथा प्रातिभासिकत्वपक्षेऽपि द्रष्टृदेहेन्द्रियादिसत्यत्वरूपस्य। **कारणं** साधकम्। **संदृश्यन्ते।** उपजीव्यत्वनिरवकाशत्वादिसमस्तन्यायैः प्राबल्योपेतानि प्रत्यक्षादीनि उपलभ्यन्ते। **सहस्रशः** बहुत्वनिमित्तकबलवन्ति च ॥ ॥४७३ ॥

तदधिष्ठानचैतन्यं प्राग्विश्वाकारविक्रियम्।
तत्कल्पकभ्रमत्वं तु तस्य न स्यात्कदाचन ॥ ४७४ ॥

तदिति विश्वेत्यर्थः। **तदाकारविक्रियं** विश्वाकारेण विकारवत्। **तत्कल्पकं** = तद्विषयकभ्रमरूपम्। **कदाचन** प्राक् प्रतीतेः आवरणसद्भावेन उत्पादस्यैवाभावात्, पश्चादुत्पद्यमानायाश्च सन्निकर्षसंपादकतया स्वोपजीव्यपदार्थसत्यत्वं प्रति बाधकत्वासंभवात् ॥ ४७४ ॥

वृत्तिश्च सन्निकृष्टार्थभवा सिद्धस्य वेदनम्।
तत्कल्पकभ्रमत्वं च तस्या अपि न कर्हिचित् ॥ ४७५ ॥

तस्मादभ्रमसिद्धत्वं सत्यतासाधकं दृढम् ॥ ४७६ ॥

तस्मात् = तत्वावेदकप्रमाणदृष्टत्वात् ॥ ४७६ ॥

तत्र तत्र स्थितं ब्रह्म स्वाज्ञानकलिलं किल।
घटोऽहमित्यादिरूपैर्भ्रान्तं सर्वत्र सर्वदा।
इत्थं तद्भ्रान्तिमात्रस्य विवर्तोऽयं भवः किल ॥ ४७७ ॥

'ॐ उदासीनानामप्येवं सिद्धिः' इति सूत्रोक्तं अतिप्रसङ्गं विवक्षुः परप्रक्रियामनूद्य अपहसति **तत्र तत्रेति**। अधिष्ठानस्य चैतन्यस्य अहमिति धीविषयतया भ्रमाकारं 'अयं घट' इत्यनुक्त्वा 'अहं घट' इत्येवाह **अहमिति**। **विवर्तः** अतदाकारावभासः। **भवः** घटादिप्रपञ्चः ॥ ४७७ ॥

यदि स्वाज्ञानतो ब्रह्म घटं कल्पयति भ्रमात्।
कुलालमृत्तिकादण्डचक्राद्यैः किं प्रयोजनम् ॥ ४७८ ॥

किं कारुदार्वपेक्षास्ति गन्धर्वपुरसर्जने।
किं वा सर्पस्य मिथुनाद्रज्जुसर्पजनिस्तव ॥ ४७९ ॥

कुलालेति तदुक्तमनुव्याख्याने। 'कार्यार्थी कारणं सच्च नोपादद्यात् कथंचन' इति। रज्जुसर्पः गन्धर्वनगरं चेत्यादिकं असदेव। न तयोः सर्जनम्। नतरां तदर्थं उपादाननिमित्तादिकारणापेक्षा इत्याह **किमिति**। तदुक्तं वादावल्यां 'पदार्थस्य असत्त्वेन तदुत्पाद्यताया असंभवित्वादि'ति ॥ ४७९ ॥

मुद्गरस्य प्रहारेण भ्रमं मुञ्चति नान्यथा।
अहो दुर्जनसङ्गत्या दौर्जन्यं ब्रह्मणोऽप्यभूत् ॥ ४८० ॥

किञ्च मुद्गरप्रहारादिना जायमानो नाशः किं घटस्य उत तदधिष्ठानभूतब्रह्मचैतन्यसमवेतभ्रमस्य। नाद्यः तथा सति ध्वंसप्रतियोगिनो घटस्य सत्यत्वापत्तेः। न हि शशविषाणादेः असतो ध्वंसः संभवति। न द्वितीयः। प्रहारेण भ्रमं मुञ्चतस्तव ब्रह्मणः राजदण्डेन भ्रमं त्यजतः तस्करस्येव दौर्जन्यापत्तेः इत्यपहसति **अहो इति** ॥ ४८० ॥

विपरीतप्रमाबाध्यो भ्रमस्सर्वत्र दृश्यते ।
मुद्गरेण भ्रमोच्छेदस्त्वद्भ्रमस्यानुमापकः ॥ ४८१ ॥

विपरीतप्रमेति । अधिष्ठानयाथात्म्यज्ञानेत्यर्थः । **अनुमापक इति ।** मायावादी भ्रान्तः, प्रमाणविरुद्धार्थभाषित्वादित्यनुमानसौलभ्यादिति भावः ॥ ॥ ४८१ ॥

अज्ञाने ज्ञाननाश्यत्वभ्रमं च तव मुद्गरः ।
मोचयामास तद्वादी मुद्गरस्तत्त्ववादिनाम् ॥ ४८२ ॥

अज्ञानस्य स्वकार्येण सह ज्ञानेन निवृत्तिर्बाध इति परप्रक्रियाऽपि तद्भ्रममूलैव इत्येतदप्यनेनैव सिद्धमित्याह **अज्ञानेति ।** मुद्गरः तव भ्रमं मोचयामास इत्यन्वयः । भ्रमस्य विषयप्रदर्शनं **अज्ञाने ज्ञाननाश्यत्वमिति ।** चशब्देन कार्यस्य घटादेः ज्ञानेन विनाश्यत्वभ्रमं पूर्वोक्तं समुच्चिनोति । **तत्** तस्मात् । यस्मादिति अध्याहारः । **मुद्गरः** तव भ्रमं तथा तव ब्रह्मणश्च भ्रमं इत्युभयं भ्रमं मोचयन् सन् तव प्रक्रियाद्वयमपि दूषयति तस्मादिति संबन्धः । **तत्त्ववादिनां वादी** परपक्षदूषणेन तदभिमतसाधकः । अयं भावः । मुद्गरप्रहारेण 'अहं घटः' इति तव ब्रह्मणो भ्रमस्य नाश इत्युपपादितम् । तेनैव घटोपादानस्य अज्ञानस्यापि विनाशः मुद्गरेणैवेत्येतदपि सिध्यति । यद्यपि लोके उपादाननाशेन विनाऽपि कार्यनाशो दृष्टः तथाऽपि नैषा तव प्रक्रिया । अन्यतरावशेषे तस्य सत्यत्वापत्तेः । तथा च कार्यस्य उपादानेन सह ज्ञानेन निवृत्तिर्भवतीति त्वत्प्रक्रिया भ्रममूलैवेति सिध्यतीति ॥ ४८२ ॥

नष्टस्यापि पुनर्ज्ञानेनापि नाशो यदीष्यते ।
तदा नाशस्य नाशेन जगदुन्मज्जनं भवेत् ॥ ४८३ ॥

'अज्ञानस्य स्वकार्येण प्रविलीनेन वा सह ज्ञानेन निवृत्तिः बाध' इति परप्रक्रियायां, प्रविलीनेन सह इत्येतदंशं दूषयति **नष्टस्येति ।** ध्वंसप्रतियोगिनो घटस्य पुनर्नाशः न तावद् घटस्य प्रतियोगिनो पुनर्नाशेन निर्वाह्यः । घटस्य मुद्गरप्रहारेण पूर्वमेव नाशात् । अतः प्राप्ताप्राप्तविवेकेन नाशस्य नाशेनैव निर्वाह्यः । अस्तु इति चेत्तत्रातिप्रसङ्गमाह **तदेति ।** मोक्षो हि बन्धध्वंसः । तदुक्तं मायिना

'अविद्याऽस्तमयो मोक्षः' इति। ध्वंसस्यापि ध्वंसाङ्गीकारे अविद्यारूपसंसारस्य पुनरुन्मज्जनप्रसङ्गः। तदुक्तं वादावल्यां 'न हि सहस्राक्षोऽपि क्षयं क्षेप्तुं क्षम इति उन्मत्तवादश्च स्यादि'ति ॥ ४८३ ॥

दग्धे पटे कारणेन सह कार्यं विनश्यति।
एवं निश्शेषनष्टस्य पुनर्नाशोऽष्टमो रसः ॥ ४८४ ॥

असमवायिकारणस्य तन्तुसंयोगस्य नाशेन नष्टस्य घटस्य पुनर्नाशः सप्तमो रसः। समवायिकारणानां तन्तूनामेव नाशेन अत एव निश्शेषनष्टस्य पुनर्नाशस्तु अष्टमो रस इत्याह **दग्ध इति** ॥ ४८४ ॥

अतो ज्ञानाविनाश्यत्वात्सत्या घटपटादयः।
सत्यत्वादेव नारोप्यास्सर्वे ब्रह्मवदेव हि ॥ ४८५ ॥

अत इति। तथा च प्रयोगः। वियदादिकं न आरोपितं सत्यत्वात् ब्रह्मवत्। न चासिद्धिः। वियदादिकं सत्यं ज्ञानानाश्यत्वात् तद्वदेव। असिद्धिस्तु परिहृतेति भावः ॥ ४८५ ॥

या चक्षुःप्रभवा वृत्ती रूपवद्घटगोचरा।
नीरूपब्रह्मगाज्ञानं सा निवर्तयते कथम् ॥ ४८६ ॥

चक्षुःप्रभवा चक्षुरिन्द्रियमार्गोद्गता **वृत्तिः** तत्तद्वस्त्वात्मना परिणतान्तःकरण-परिणामात्मिका। रूपवदिति हेतुगर्भं विशेषणम्। महत्व-समानाधिकरणोद्भूत-रूपवत्त्वस्य चाक्षुषताप्रयोजकत्वात्। नीरूपेत्युपलक्षणम्। निराकारेत्यपि ग्राह्यम्। तेन तदाकारेणान्तःकरणपरिणामस्य अशक्यशङ्कत्वात्। ब्रह्मविषयकवृत्तेरेवैवं असंभवेन तत्र ज्ञातृचैतन्यस्य प्रतिफलनं इत्यादिकं गर्भस्रावेणैव निरस्तमिति भावः ॥ ४८६ ॥

तप्तवारिस्थितस्याग्नेरज्ञानं किं तया गतम्।
घटस्थरसगन्धादेरज्ञानं वा ततो गतम् ॥ ४८७ ॥

अथैवमपि चक्षुरिन्द्रियजन्यया वृत्त्या ब्रह्मणोऽज्ञाननिवृत्तिरङ्गीक्रियते तर्हि तयैव घटगतरसस्पर्शगुरुत्वादेरपि अज्ञाननिवृत्तिः आपद्यते । तच्च अनानुभविकम् । नीरूपत्वादेर्न तथेति चेत् ब्रह्मण्यपि समानः प्रसङ्गः इत्याशयः । तप्तवारिस्थाग्ने रूपस्य अनुद्भूतत्वेन तस्यापि न चाक्षुषवृत्तिविषयत्वम् ॥ ४८७ ॥

योग्यावच्छेदकबलादयोग्यस्यापि दर्शनम् ।
इति पक्षोऽपि नैव स्याद्रसादौ तददर्शनात् ॥ ४८८ ॥

एतेनैतदपि निरस्तम् । ब्रह्मणो नीरूपत्वादिना स्वरूपेण चाक्षुषत्वायोग्यत्वेऽपि रूपवद्घटाद्यवच्छेदेन तदुपपत्तिरिति । स्वरूपत एवायोग्यस्य उपाध्यवच्छेदेऽपि प्रत्यक्षत्वासंभवात् । न हि घटाद्यवच्छेदेनापि नीरूपस्य स्वरूपतोऽयोग्यस्य प्रत्यक्षत्वं संभवति । न च राहोः शुक्लभास्वरचन्द्रावच्छेदेनेव प्रत्यक्षतोपपत्तिः । विषमो हि दृष्टान्तः । राहोरपि नीलरूपवत्त्वेन स्वरूपतो योग्यत्वात् । एतदाशयेनैव रसगन्धादेरिति दृष्टान्तोक्तिः ॥ ४८८ ॥

चक्षुर्योग्यघटस्थोऽपि किं रसश्चक्षुषेक्ष्यते ।
अतस्स्वाविषयाज्ञानं कथं वृत्त्या निवर्त्यताम् ॥ ४८९ ॥

अतः स्वरूपत एवायोग्यस्य योग्योपाध्यवच्छेदेऽपि प्रत्यक्षताऽसंभवात् । **स्वाविषयाज्ञानं** वृत्त्यव्याप्यचैतन्यावरकम् ॥ ४८९ ॥

एकस्य भ्रमनाशस्स्यादेकाज्ञानविनाशने ।
तत्रैव पुनरन्येषां स्वम्त्राज्ञानैर्भ्रमः किल ॥ ४९० ॥

एवं च तत्तद्भ्रान्त्यर्थं बह्वज्ञानप्रकल्पने ।
अतिस्थिरतरे वस्तुन्यनन्ताज्ञानकल्पना ॥ ४९१ ॥

'विषयाश्रितं चेदज्ञानं निवर्तते तदैकेन ज्ञातस्य घटस्य अन्यैरज्ञातत्वं न स्यादि'ति तत्त्वोद्योतोक्तदोषपरिहाराय यद्यनेकाज्ञानानि अङ्गीक्रियन्ते तर्हि एकस्यैव स्थिरस्य वस्तुनः प्रतिपुरुषनियतानन्तभावरूपाज्ञानावृतत्वापत्त्या अणुरपि पदार्थः अद्रिसम आपद्यते इत्याह **एकस्येत्यादिभिः** । तदुक्तं न्यायामृते प्रतिकर्म-

व्यवस्थाभङ्गे। इष्टसिद्धिरीत्या अनेकाज्ञानाङ्गीकारपक्षे। 'एकया वृत्त्या किं सर्वतदज्ञानानां निवृत्तिः। उतैकैकतदज्ञानस्य। आद्ये शुक्तेः पुनः कदाऽप्यप्रकाशो न स्यात्। अन्त्ये तदापि प्रकाशो न स्यात्। एकावरणनिवृत्तावपि अन्यस्य सत्त्वादिति। अथैतद्दोषपरिहाराय प्रतिपुरुषनियताज्ञानाङ्गीकारे दोषमाह **एवं चेति**। अत्र इयं परप्रक्रियाऽनुसन्धेया। 'इदं रूप्यं' इति ज्ञानं प्रातिभासिकपदार्थविषयकं यथा भ्रमः तथैव अयं घटः इत्यादि व्यावहारिकपदार्थविषयकमपि ज्ञानं भ्रम एव। आद्यः अल्पकालीनः अपरस्तु दीर्घकालीन इति विवेकः। आद्ये शुक्त्यवच्छिन्नचैतन्यावरणनिवृत्तौ भ्रमनिवृत्तिः। द्वितीये घटावच्छिन्नचैतन्यावरण-निवृत्तौ अयं घटः इति भ्रान्त्युत्पादः। आद्यपक्षे तत्तद्भ्रान्त्यर्थं इत्यस्य एकस्य भ्रान्तिनिवृत्तावपि अपरेषां भ्रान्त्यनुवृत्त्यर्थं इत्यर्थः। द्वितीये तस्य तस्य भ्रान्त्युपादानार्थं इत्यर्थः। पक्षद्वयेऽपि प्रतिपुरुषनियतानेकाज्ञानकल्पनं दुष्परिहर-मिति हृदयम्॥ ४९० ॥ ४९१ ॥

भावरूपं च तेऽज्ञानं तेन स्यादणुरद्रिवत् ॥ ४९२ ॥

भावरूपं चेति। अभावरूपत्वे आवरणानुपपत्तेः अनेकत्वेऽपि परिमाण-महत्त्वानापत्तेश्च ॥ ४९२ ॥

बहिष्ठं तद्धि चैतन्यं जीवस्त्वन्तस्स्थितस्सदा।
ज्ञात्रन्यद्व्यवहर्ताऽन्यस्तस्मात्किं केन सङ्गतम्॥ ४९३ ॥

ऐक्यात्तेनैव दृष्टेऽर्थे यद्यस्य व्यवहर्तृता।
यज्ञदत्तेन दृष्टार्थव्यवहारं तथैव हि ॥ ४९४ ॥

देवदत्तोऽपि तद्गात्रमात्रदर्शी करोत्वयम्।
व्यावहारिकभेदादेरैक्यस्य च समत्वतः ॥ ४९५ ॥

ज्ञानव्यवहारयोः समानकर्तृकत्वनियमः सार्वजनीनः। सोऽपि परप्रक्रियायां विरुध्यते इत्याह। **बहिष्ठमिति**। **तत्** घटाद्यधिष्ठानचैतन्यम्। **बहिः** देहादिति शेषः। **जीवचैतन्यं** व्यवहर्तृ। **अन्तः** देहस्य। **सदा** मरणपर्यन्तम्। **अन्यत्**

अधिष्ठानचैतन्यम्। **ज्ञातृ**। अध्यासस‍ंबन्धस्य तत्रैव सद्भावात्। **व्यवहर्ता** अभिलपनादिव्यवहारकर्ता। तथा च ज्ञानव्यवहारयोः जन्यजनकभावघटकं सामानाधिकरण्यं भग्नमित्याह **किमिति**। ननु नैष दोषः। वृत्तौ ज्ञातृचैतन्यप्रतिफलनस्य, प्रतिबिंबितस्य च अनावृताधिष्ठानचैतन्येनैकीभावस्य चोपगमादिति चेन्न। वृत्तौ चैतन्यप्रतिबिंबनस्यैवाशक्यत्वात्। तदुक्तं न्यायामृते अनुद्भूतरूपान्तःकरणे शब्दान्यप्रतिबिंबनोपाधिताया अचाक्षुषे चैतन्ये प्रतिबिंबनस्य चायोगात् इति। [१/२४-प.२२५] दोषान्तरं चाह **ऐक्यादिति**। **तेन** अधिष्ठानचैतन्येन। **अन्यस्य** ज्ञातृचैतन्यस्य। सन्तमपि व्यावहारिकभेदमवधीर्य स्वरूपैक्यदर्शनमात्रेण व्यवहाराङ्गीकारेऽतिप्रसङ्गमाह **यज्ञदत्तेनेति**। **तद्भावः** ऐक्यम्। **मात्रेति** अवच्छेदकभेदस्य त्वयैवाप्रयोजकीकरणादिति भावः ॥ ४९३ ॥ ॥ ४९४ ॥ ४९५ ॥

अवच्छेदकभेदश्च तत्रात्रापि च यत्समः।
वृत्तिद्वारा बहिर्यात्रा तेनैक्यं चापि यत्समम् ॥ ४९६ ॥

बहिः यज्ञदत्तावच्छिन्नप्रदेशं प्रति ॥ ४९६ ॥

घटोपस्थापिका वृत्तिर्ब्रह्मोपस्थापिकैव न।
तदुल्लेखप्रकारस्य नतरां स्थापिका हि सा ॥ ४९७ ॥

अस्तु तर्हि वृत्तिरेव घटविषयिणी सती अधिष्ठानं ब्रह्म उल्लिखति तद्व्यवहारं च करोति इति तत्राह **घटेति**। **नेति**। रूपादिहीनस्य आसंसारमज्ञानावृतस्य ब्रह्मणः चाक्षुषवृत्तिविषयत्वासंभवादेवेति भावः। दूरे तद्व्यवहारनिष्पादकत्वमित्याह **नतरामिति** ॥ ४९७ ॥

यद्यधिष्ठानचैतन्यं तस्य तस्य भ्रमस्तव।
घटोऽहमिति वा तस्याकारोऽयं घट इत्युत ॥ ४९८ ॥

तवेति। मम तु अयं घट इति वृत्तिरूपं प्रमा च इति विशेषः। **घटोऽहमिति इति**। अध्यस्तस्य अधिष्ठानसंभिन्नतया भाननियतेः। घटोऽयमिति कल्पस्तु अनुभवानुसारी ॥ ४९८ ॥

आद्ये किं तेन देहस्थव्यवहर्तुः प्रयोजनम् ॥ ४९९ ॥

देहस्थव्यवहर्तुः अधिष्ठानचैतन्याद् व्यावहारिकभेदवतः ॥ ४९९ ॥

वृत्तिद्वारा बहिर्गत्वा तेनैकीभावमेत्ययम् ।
अतस्तज्ज्ञानमेवास्य ज्ञानं व्यवहृतिर्यदि ।
देहान्तस्तर्हि जीवस्याभावान्निर्जीवता तनोः ॥ ५०० ॥

बहिर्गच्छन्निति । अनेन प्रतिफलनपक्षाद्वैलक्षण्यं उक्तम् ॥ ५०० ॥

अणुर्निरंशो जीवोऽयं कथमन्तर्बहिश्चरेत् ।
दूरस्थसूर्यचन्द्राप्तिर्मरणादतिरिच्यते ॥ ५०१ ॥

ननु व्याप्तत्वाद्देहान्तरपि अवस्थितिः संभवतीति तत्राह **अणुरिति**। देहावच्छिन्नस्य व्याप्तत्वासंभवादिति भावः। व्याप्तस्य बहिर्निर्गमनाद्यनुपपत्तेश्च। अंशेनैव बहिर्निर्गमनात् न देहस्य निर्जीवत्वापत्तिरिति तत्राह **निरंश इति** ॥ ५०१ ॥

किञ्चैवं सति देहान्तः पुनरागत्य देहिनः ।
घटोऽहमित्येव तेन जन्या व्यवहृतिर्भवेत् ॥ ५०२ ॥

पुनर्देहप्रवेशेऽपि अधिष्ठानचैतन्येनैकीभूतस्य ज्ञातृचैतन्यस्य अहं घट इत्याकारिकैव धीः न त्वेव अयं घट इति ॥ ५०२ ॥

कुतो घटोऽयमित्येवमाकारा सा प्रजायते ।
जलस्यानयनार्थं च स्वोदरे पूरयेज्जलम् ॥ ५०३ ॥

सा तज्जन्या व्यवहृतिः। अपहसति **जलेति**। इदमुपलक्षणम्। गले दृढरज्जुबन्धनेन श्वासनिरोधेनानर्थोऽपि स्यादिति ध्येयम् ॥ ५०३ ॥

अनुभूत्यनुसारेण व्यवहारादि जायते ।
न चैवं व्यवहारोऽस्ति तस्मादनुभवोऽपि न ।
अतो नैतादृशारोप इत्यनारोपितं जगत् ॥ ५०४ ॥

एवमीदृशादनर्थाद्बिभ्यता आरोपपक्षपरित्याग एव श्रेयानिति हितोक्त्या उपसंहरति **अत इति** ॥ ५०४ ॥

द्वितीये त्विदमंशेऽस्मिन्नाधिष्ठानप्रतीतिता ।
स्वात्मानमहमित्येव ह्युल्लिखेत्साक्षिचित्सदा ।
अयमित्युल्लिखन्नंशं तं पृथक्कुरुते स्वतः ॥ ५०५ ॥

स्वयमेव ह्यधिष्ठानं नासावंशोऽपि यः पृथक् ।
अधिष्ठानोल्लेखशून्यं घटज्ञानं न तद्भ्रमः ।
निरधिष्ठानकभ्रान्तिर्बाह्यानामेव नावयोः ॥ ५०६ ॥

तस्मादनुभवानुसारी अयं घट इत्येव प्रतीतेराकार उररीकार्यः । तत्र च अधिष्ठानभूताहमर्थसंभेदाभावात् निरधिष्ठानकभ्रमस्यासंभवादनुपगमाच्च प्रतीतेः प्रमात्वं विषयस्य च सत्यत्वं निराबाधमित्याह **द्वितीय इति** ॥ ५०५ ॥ ५०६ ॥

अथ वृत्तिरियं तर्हि घटारोपकथा गता ।
घटापरोक्षवृत्तिस्स्याद्घटस्येन्द्रिययोगतः ।
घटस्येन्द्रिययोगश्च घटे सत्येव नान्यथा ॥ ५०७ ॥

'चैतन्याविषयत्वेऽपि बाधकाभावात् वृत्तिविषयत्वेनैव व्यवहारोपपत्तेः' इति वादावलीं हृदि कृत्वाऽऽह **अथेति**। इयं खलु अपरोक्षा वृत्तिः । सा चेन्द्रियसन्निकर्षजन्या । सन्निकर्षश्च न मिथ्याभूतेन । अतः सत्यत्वं विषयस्य सिद्धं एवेत्याह **घटस्येति** ॥ ५०७ ॥

अतो वृत्तेः पुरा सन्निकर्षस्य घटको घटः ।
अस्त्येवेति कथं तस्य वृत्त्या स्यात्कल्पना वद ॥ ५०८ ॥

स्वस्याः प्रागेव विद्यमानवस्तुविषयिणी वृत्तिः तदारोपरूपा न भवतीत्याह **अत इति** ॥ ५०८ ॥

वृत्तेर्भ्रमत्वे दृश्यस्य तत्रारोपो न ते मते।
यद्दृशोऽन्यत्र नारोप इत्यनारोपितं जगत् ॥ ५०९ ॥

किं च वृत्तिविषयत्वाङ्गीकारे वृत्तेर्मिथ्यात्वेनाधिष्ठानत्वासंभवात् आध्यासिकसंबन्धानुपपत्त्या सत्यत्वमेव जगतः सेत्स्यतीत्याह **वृत्तेरिति। अन्यत्रेति** चैतन्यारोपपक्षस्य प्रतीतिविरोधेन दूषितत्वादिति भावः ॥ ५०९ ॥

दृग्दृश्ययोगायोगेन मिथ्यात्वाऽऽशापि ते गता ५१० ॥

योगेति त्वदभिमताध्यासयोगेत्यर्थः ॥ ५१० ॥

न चेयं वृत्तिरेवास्मिन्घटे तद्ब्रह्मताभ्रमः।
चक्षुर्वृत्तावरूपस्य चैतन्यस्याप्रकाशनात् ॥ ५११ ॥

वृत्तिरेव घटस्य ब्रह्मण्यारोपरूपा इत्येतन्निराह **न चेति। अरूपस्येति** आसंसारमज्ञानावृतस्येत्यपि ध्येयम्। अन्यथा सद्योमोक्षापत्तेरिति भावः ॥ ५११ ॥

न हीदमिति वा गन्धरसाद्यं भासते दृशि।
अतोऽधिष्ठानविज्ञानशून्योऽयं स्याद्भ्रमः
कथम् ॥ ५१२ ॥

ब्रह्मणश्चाक्षुषत्वाभावे गन्धरसादिदृष्टान्ताः। **गन्धरसाद्येति। विज्ञानेति** सामान्यज्ञानेत्यर्थः। याथात्म्यज्ञाने भ्रमासंभवात्। तदुक्तं वादावल्यां 'किं चाध्यस्तत्वेन जीवेऽध्यासपक्षे सर्वदा प्रपञ्चः प्रकाशेत। ब्रह्मण्यध्यासे न कदाचिदि'ति ॥ ५१२ ॥

घटाक्षसन्निकर्षोत्था या वृत्तिस्तं घटं हि सा।
प्रागेव सन्तमन्यत्र स्व(स्यांवा) स्मिन्वा
कल्पयेत्कथम् ॥ ५१३ ॥

अन्यत्र स्वसंबन्धेन निवृत्तावरणेऽधिष्ठानचैतन्ये। **स्वस्यां** वृत्तौ। कथमित्याक्षेपे। अयं प्रयोगः। घटः सर्वथाऽकल्पितः सत्यत्वेन प्रमितत्वात्। ब्रह्मवदिति। नासिद्धिः। प्रातिभासिकेतरत्वात् तद्वदेव इति प्रयोगः ध्येयः ॥ ५१३ ॥

वृत्त्याऽज्ञाने विनष्टे हि स्यादधिष्ठानदृग्भ्रमः ।
वृत्तिश्चोक्तप्रकारेण घटे सत्येव नान्यथा ।
भ्रमात्पूर्वं च सन्नर्थो ब्रह्मवन्न भ्रमोद्भवः ॥ ५१४ ॥

भ्रमात् पूर्व इति । प्रातिभासिकेतर इत्याशयः ॥ ५१४ ॥

किञ्चाहं घट इत्येव चैतन्यं चेद्घटभ्रमः ।
गौरोऽहमितिवत्तर्हि भ्रान्तिस्सा प्रातिभासिकी॥ ५१५ ॥

यदि अनुभवविरुद्धं अतिप्रसङ्गपराहतमपि घटोऽहमिति भ्रमस्याकारं मन्वीत तर्हि गौरोऽहमिति प्रतीतिविषयगौरत्वमिव घटादिकमपि प्रातिभासिकमेव स्यात् न तु त्वद्रीत्या व्यावहारिकमित्याह **किं चेति** ॥ ५१५ ॥

न चेतनो घट इति बाधस्याद्यैव दर्शनात् ।
व्यावहारिकता तस्माद्घटादेर्जगतो गता ॥ ५१६ ॥

अद्यैव ब्रह्मज्ञानात् पूर्वमेव ॥ ५१६ ॥

इदमित्यन्यदुल्लिख्य तदभेदं घटे यदि ।
उल्लिखेद्ब्रह्मचैतन्यं सा भ्रान्तिरपि पूर्ववत् ।
नासावयमिति स्पष्टं बाधस्यैवाद्यदर्शनात् ॥ ५१७ ॥

ननु भ्रमस्याकारः अहं घटः इति नाङ्गीक्रियते । येनोक्तदोषः । किन्तु अयं घट इत्येव । न चाधिष्ठानाननुवेधो दोषः । इदंशब्देन ब्रह्मण एवोल्लेखाभ्युपगमादित्यतः चाक्षुषज्ञाने ब्रह्मणोऽप्रतिभासरूपप्रागुक्तदोषे सत्येव दोषान्तरमाह **इदमिति** । **अद्य** त्वदभिमतभ्रमकाल एव । तदुक्तं वादावल्यां 'यदि जगदात्मन्यारोपितं स्यात् तदाऽऽत्मनो भिन्नत्वेन न दृश्येत । — । दृश्यते च जगदिदानीं आत्मनो भिन्नत्वेन । तस्मान्न तत्रारोपितमि'ति इति ॥ ५१७ ॥

स्वस्मिन्वा देशकाले वा घटोऽस्तीत्युल्लिखेद्यदि ।
नायं तर्हि घटारोपः प्राक्सिद्धस्य विशिष्टधीः ॥ ५१८ ॥

यदि पुनः मयि घट इति वा अत्र घट इति वा भ्रमस्य आकारस्तर्हि इयं, घटस्य चैतन्येन वा देशकालाभ्यां वा संसर्गधीरेव स्यात् न तु त्वदभिमतः अधिष्ठानतादात्म्यावभासो भ्रम इत्याह **स्वस्मिन्निति** ॥ ५१८ ॥

अधिष्ठानोल्लेखशून्यत्वाच्च नायं भ्रमस्तव।
न हि देशाद्यधिष्ठानं नाप्यत्रायमिति भ्रमः ॥ ५१९ ॥

देशादीति। देशकालयोर्मिथ्यात्वेनाधिष्ठानत्वायोगात्। **नापीति** तादात्म्याध्यासत्वाभावात् ॥ ५१९ ॥

अतस्मिंस्तदिति ज्ञानं भ्रमः किल भवन्मते।
इदं रजतमित्येव भ्रमस्सर्वत्र दृश्यते ॥ ५२० ॥

सर्वत्र तादात्म्यारोपस्थले ॥ ५२० ॥

अथेयं मानसी वृत्तिरधिष्ठानचितं हि ताम्।
इदमित्युल्लिखन्त्यस्या घटाभेदं च पश्यति।
अयमेव घटारोप इति पक्षो न शोभते ॥ ५२१ ॥

अथ मतम्। नायं भ्रमश्चैतन्यरूपः। येन अहं घट इत्युल्लेखापत्तिः घटस्य प्रातिभासिकत्वापत्तिश्च। किं नाम वृत्तिरूप एव। न चाधिष्ठानानुल्लेखो दोषः। अयं घट इत्यत्र इदंशब्देन वृत्त्या चैतन्यं उल्लिख्य चैतन्यस्य घटाभेदो विषयीक्रियते इत्यङ्गीकारादित्यत आह **नेति** ॥ ५२१ ॥

अधिष्ठानदृगेवाध्यस्तस्यारोपो हि ते मते।
अतीन्द्रियं रूपशून्यं कथं चाक्षुषधीस्स्पृशेत्॥ ५२२ ॥

वृत्तेरनधिष्ठानत्वेनाध्यासिकसंबन्धानुपपत्तिस्तावदित्याह **अधिष्ठानेति।** इदंशब्देन चाक्षुषवृत्त्या चैतन्योल्लेखानुपपत्तिश्चेत्याह **अतीन्द्रियेति** ॥ ५२२ ॥

यदि स्पृशेत्तदाऽज्ञानं विनाश्य स्पष्टमेव तत्।
उल्लिखन्ती जडाभेदं चेतने कथमुल्लिखेत्॥ ५२३ ॥

इदानीमेव बाधेन स्यात्तदा प्रातिभासिकी ।
एवञ्च घटकुड्यादेर्व्यावहारिकता गता ।
भिक्षाजिघृक्षया यान्तं श्वा जग्राह पदे किल ॥ ५२४ ॥

तुष्यत्विति न्यायेन उल्लेखाङ्गीकारेऽपि वृत्तेरज्ञानविरोधित्वेन इदानीमेव भ्रमनिवृत्त्या घटस्य व्यावहारिकत्वहानिः । तथा चेदमाभाणकं तवापन्नमित्याह **भिक्षामिति ।** **भिक्षा** अध्यासः **जिघृक्षा** वृत्त्या उपपादनेच्छा । **श्वा** उक्तदोषकलापः । **पदे जग्राह** तव सिद्धान्तमूलमेव निकृन्तितमभूदिति भावः ॥ ५२३ ॥ ५२४ ॥

अतो देशे च काले च घटोऽस्तीत्येव सोल्लिखेत् ।
अयं च न घटारोपः प्राक्सिद्धस्य विशिष्टधीः ॥ ५२५ ॥

इत्येव अत्र घटोऽस्तीत्येव । **सा** वृत्तिः । **अयं** अत्र घट इति ज्ञानम् । **न घटारोपः इति ।** आरोप एव न भवति । तथात्वेऽपि घटसंसर्गारोप एव । उभयथाऽपि न घटस्य मिथ्यात्वसिद्धिः ॥ ५२५ ॥

यद्यज्ञानान्न वैकल्यं ब्रह्मणस्तर्हि न भ्रमः ।
यद्यज्ञानेन वैकल्यं ब्रह्मणस्तर्हि न भ्रमः ।
प्रमाणस्य ह्यवैकल्ये दोषाभावाद्ग्रहः प्रमा ।
प्रमाणस्य हि वैकल्याद्घटस्याग्रहणं तव ॥ ५२६ ॥

घटादौ प्रमाणाभिमतस्य अधिष्ठानब्रह्मचैतन्यस्य अज्ञानेन वैकल्यं भवति न वा । न द्वितीयः । दोषाभावेन घटज्ञानं प्रमैव स्यादित्याह **दोषाभावाद्ग्रहः प्रमेति ।** न आद्यः । वैकल्यात् घटस्य ग्रह एव न स्यात् । दूरे तस्य ज्ञानस्य भ्रमत्वम् इत्याह **अग्रहणं तवेति ।** तवेत्यनेन प्रमाणवैकल्यादग्रहणमिति तन्मतप्रक्रियां स्मारयति । तथा च उभयथाऽपि न जगद्भ्रमः । तव इत्येतत् दोषाभावाद्ग्रहः प्रमा इति पक्षेऽपि योज्यम् । तेन प्रामाण्यस्य स्वतस्त्वाङ्गीकारः परस्य द्योत्यते ॥ ५२६ ॥

यद्यारोपं विनाऽपि स्याद्घटादीनामवस्थितिः ।
तर्ह्यनारोपितं सर्वं जगद्ब्रह्मवदेव हि ॥ ५२७ ॥

किं च आरोपाभावेऽपि घटादिकं प्रकाशते उत आरोपसद्भावदशायामेव। नाद्यः घटादेरनारोपितत्वमेव स्यादित्याह **ब्रह्मवदिति** ॥ ५२७ ॥

यद्यारोपं विना न स्यात्सर्वं प्रातीतिकं भवेत्।
प्रमाणस्य हि वैकल्यात्कस्याग्रहणमुच्यते।
अज्ञानाद्येव कस्मात्ते प्रातीतिकमभून्मते ॥ ५२८ ॥

न द्वितीयः। सर्वस्यापि अज्ञानादिवत् प्रातिभासिकत्वस्यैवापत्तेः। व्यावहारिकस्यैवाभावेन प्रमाणवैकल्याद्व्यावहारिकाग्रहणं इति त्वत्प्रक्रिया-हानिरित्याह **प्रातीतिकमिति। कस्येति च। कस्मादिति।** उभयेषां प्रतीतिमात्रसमयपरिवर्तित्वसाम्यादिति भावः ॥ ५२८ ॥

आरोपकुण्ठनं चेत्स्यात्तदा घटनिवर्तने।
निर्घटं जगदेतत्स्यात्सन्निकर्षाद्यसंभवात् ॥ ५२९ ॥

चक्षुर्वृत्तेरयोगेन कुण्ठने नास्ति कुण्ठनम्।
अतः पुनर्भ्रमायोगादघटं भूतलं भवेत् ॥ ५३० ॥

प्रातीतिकत्वपरिहाराय घटारोपश्चेन्नाङ्गीक्रियते तर्हि घटस्यैवाभावापादेन निर्घटमेव जगत् स्यादित्याह **आरोपेति।** कुण्ठने तदभावाङ्गीकारे। ननु पुनरारोपेण घटसिद्धिरस्तु इति चेत् नैतत्संभवतीत्याह **सन्निकर्षासंभवादिति।** आरोपाभावेन घटस्यैव प्रागभावात् अविद्यमानेन सन्निकर्षस्यासंभवात् सन्निकर्षपेक्षारोपस्य पुनरुत्पत्तेरेवायोगेन न घटप्रत्यावृत्तिप्रत्याशेत्याह **कुण्ठने इति।** आरोपाभावे इत्यर्थः। **कुण्ठनं** परिहारः। सन्निकर्षजन्यवृत्त्यैव आरोपाभावस्य परिहारः पुनरारोपोत्पत्तिरिति यावत्। एष्टव्या। सैव न संभवतीत्युक्तमिति भावः ॥ ५२९ ॥ ॥५३० ॥

आरोपकुण्ठने चेत्स्यात्तर्ह्यनारोपितो घटः।
नारोपितो हि सोऽश्वस्स्याद्योऽश्वाभावेऽपि
तिष्ठति ॥ ५३१ ॥

आरोपाभावाङ्गीकारे निर्घटं स्यादिति पररीत्यैवोक्तम्। वस्तुतः तथात्वे घटस्यानारोपितत्वरूपं सत्यत्वमेव सेत्स्यतीति सदृष्टान्तमुपपादयति **नेति।** **अश्वाभावेऽपि** अश्वस्यारोपाभावेऽपि ॥ ५३१ ॥

घटोऽज्ञानेन जन्यश्चेत्तर्हीदंपूर्वता कुतः।
अज्ञानस्य ब्रह्मणश्च सदा सर्वत्र वर्तनात् ॥ ५३२ ॥

अध्यस्तं हि रूप्यादिकं अधिष्ठानाज्ञानजन्यं, तत्प्रतिभासात्मकं च परेणाङ्गीक्रियते। तदुभयं साधारणदोषेण दूषयति **घट इति।** अज्ञानेन जन्य इति पदच्छेदः। ज्ञानरूपं चेदित्यप्युपस्कर्तव्यम्। **कुत इति।** घटादीनामनादित्वमेव स्यादिति यावत्। तत्र हेतुः **अज्ञानस्येति** घटादिकारणस्य। **ब्रह्मणः** घटावभासात्मकचैतन्यस्य। न हि सामग्री कार्यं व्यभिचरति नापि प्रतिभासः प्रतिभासिकं विनाऽवतिष्ठत इति भावः ॥ ५३२ ॥

मृदाद्यभावान्नाभूच्चेत्तत्किमज्ञानजं न ते।
यदि तत्सर्वमन्यस्माद्घटस्तस्माद्भविष्यति ॥ ५३३ ॥

अथाज्ञानमात्रं न सामग्री किन्तु मृदादिकमपि। तदभावात् घटादेः नानादित्वं दोष इति चेत्तत्र प्रष्टव्यम्। तन्मृदादिकमपि कस्य कार्यमिति। अज्ञानस्येति चेदुक्तदोषानिस्तारः। मृदादीनामपि अनाद्यज्ञानजन्यत्वादनादित्वेन तत्कार्यघटादेरनादित्वापातस्य तदवस्थत्वादिति। यदि पुनर्मृदादेरज्ञानातिरिक्तकार्यत्वं तर्हि तस्य सत्यत्वापत्तिरिति दोषे सत्येव दोषान्तरमाह **घट इति। तस्मात्** कारणान्तरात्। तथा चैकविध्यसंभवेन किं घटादिमात्रस्य अप्रामाणिकाज्ञानजन्यत्वकल्पनयेति भावः ॥ ५३३ ॥

यद्यज्ञानेन ते ब्रह्म घटं भ्रान्त्यैव कल्पयेत्।
मठान्तर्घटसन्तानैः कुतो नापूर्यते स्थली ॥ ५३४ ॥

किं कुलालस्य शालैव ब्रह्मणः क्षीरसागरः।
किं दीर्घादीर्घबाधाभ्यां विशेषो बाध्यवस्तुनोः ॥ ५३५ ॥

दण्डादिनैरपेक्ष्येण अज्ञानेनैव ब्रह्म घटादीन् सृजतीति पक्षेऽतिप्रसङ्गमाह **यदीति।** कुलालशालातः मठस्य मृद्दण्डाद्यभाव एव विशेषो वाच्यः। स च त्वयैवाप्रयोजकीकृत इत्याशयः। कुलालशालामधिष्ठायैव ब्रह्म घटादिकं कल्पयति इति क्षुद्रशङ्कां परिहरति **क्षीरसागर इति।** स्यादेतत्। व्यावहारिकं घटादिकं ब्रह्म मृदादिसापेक्षमेव कल्पयति। प्रातिभासिकं अज्ञानादिकं तु तन्निरपेक्षमेव। अतो नोक्तो दोष इति। अत्र विवेक्तव्यम्। को नाम व्यावहारिकप्रातिभासिकयोर्विशेषः। उभयोः भ्रान्तिकल्पितत्त्वस्य बाध्यत्वस्य चाविशेषात्। न च भ्रान्तेर्दीर्घत्वतदभावाभ्यामेव विशेषः। अस्य वाङ्मात्रत्वेन अकिञ्चित्करत्वादित्याह **किमिति। दीर्घादीर्घेति।** दीर्घादीर्घकालानन्तर-भावीत्यर्थः। **विशेषः** सृष्टौ अज्ञानेतरसापेक्षत्वतन्निरपेक्षत्वरूपः। यथोक्तं सुधायां 'बाधविलम्बस्त्वप्रयोजकः। अर्थतादवस्थ्यानिवृत्ते'रिति ॥ ५३५ ॥

अन्वयव्यतिरेकाभ्यां दृष्टं कारणचक्रतः।
तत्तत्कार्यस्य जन्मास्तु तेऽज्ञानं तव तिष्ठतु ॥ ५३६ ॥

किं च अज्ञानोपादानकत्ववादिनाऽपि तत्तदुचितासंकीर्णव्यवहारनिर्वाहार्थं, तत्तदुपादानभूतमृदादिकार्यत्वं स्वीकार्यम्। अन्वयव्यतिरेकसिद्धत्वात्। तथा च आनुभाविकैः तत्तदुपादानमृदादिभिरेवालम्। किं अनर्थयाऽज्ञानकल्पनयेत्याह **तत्तदिति।** अज्ञानं तु त्वत्कुकपोलकल्पनाया निमित्तकारणमेवास्तु इत्याह **तवेति** ॥ ॥५३६ ॥

यदीदमंशो ब्रह्म स्यादनिदंरूपता कथम्।
स्थैर्यासिद्धिः पदार्थानां देशकालाविवक्षणे ॥ ५३७ ॥

यदि अयं घट इत्यत्र इदंशब्देन अधिष्ठानं ब्रह्मोच्यते, तर्हि तस्य त्वदङ्गीकृताऽनिदंरूपता विरुध्यते इत्याह **यदीति।** घटादेः तदिदंपदाविषयत्वे सोऽयं घट इत्यादिप्रत्यभिज्ञया स्थैर्यासिद्ध्या क्षणिकत्वनिराकरणं न स्यादित्याह **स्थैर्येति** ॥ ५३७ ॥

घटं ताडयता दण्डैः प्रायो ब्रह्मापि ताडितम्।
यदौपनिषदत्वे स्वे छलं त्यक्त्वैव दृश्यते ॥ ५३८ ॥

औपनिषदं ब्रह्म न चाक्षुषवृत्तौ विषय इत्येतत्साहित्यमुद्रया रञ्जयति घटमिति ॥ ५३८ ॥

किं लोकानुभवस्सूत्रं येन भाष्यमपेक्षते।
देशकालस्थमेवेदं तदित्याहुर्हि लौकिकाः ॥ ५३९ ॥

अनुभवो नापलापार्ह इत्येतत्साहित्यमुद्रयाऽऽह किं चेति। तदुक्तमभियुक्तैः 'न हि प्रतीतिर्व्याख्यानमपेक्षते' इति ॥ ५३९ ॥

घटोऽयमिति धीर्भ्रान्तिः किल लोकस्य संमता।
यद्ब्रह्म घटतादात्म्यधीत्वं तस्याः परो वदेत्॥ ५४० ॥

घटे नायं घट इति या भ्रान्तिस्सा प्रमा किल।
यद्घटो ब्रह्म नेत्यर्थस्तस्याः परमते भवेत् ॥ ५४१ ॥

लोकसिद्धभ्रमबाधयोर्वैपरीत्यं चैवं सति स्यादित्याह द्वाभ्यां घट इत्यादिना ॥ ॥ ५४० ॥ ५४१ ॥

यस्य ह्यभ्रमकालेऽपि सिद्धिस्स्वमतसंमता।
अनारोपितमेवेदं ब्रह्मवद्धि घटादिकम् ॥ ५४२ ॥

अनानुभविकं स्वस्य सर्वानुभवबाधितम्।
मिथ्यात्वे बहुकल्प्यं स्यात्ततस्सत्यमिदं जगत्॥ ५४३ ॥

अभ्रमकाले भ्रमात्पूर्वं सन्निकर्षनिर्वाहार्थम्। स्वेति। अन्यथा वृत्तेः तत्र प्रतिबिम्बनमित्यादि तत्प्रक्रियाऽनुपपत्तेः ॥ ५४३ ॥

प्रधानसदृशाकारवर्णाधिष्ठानदर्शने।
तथा तथा भ्रमोऽपि स्यान्नान्यथा यत्र कुत्रचित्॥ ५४४ ॥

एतावता दृग्दृश्ययोराध्यासिकसंबन्धाङ्गीकारेण जगतो मिथ्यात्वसाधनं न संभवतीत्युपपादितम्। इदानीं मिथ्यात्वसाधकपरोक्तहेतूनां प्रतिकूलतर्कपराहतिं समर्थयिष्यमाणः, उपोद्घातमाह **प्रधानेति**। अनेन 'अधिष्ठानं च सदृशं तथ्यवस्तुद्वयं विना। न भ्रान्तिर्भवति क्वापि स्वप्नमायादिकेष्वपि' इति भगवत्पादीयं वचनं प्रमाणयति ॥ ५४४ ॥

पृथुबुध्नोदराकारघटवर्णशिवादिके।
घटभ्रमस्तथैवोर्ध्वे स्थाण्वादौ पुरुषभ्रमः।
रजताकारसदृशवर्णे तु रजतभ्रमः ॥ ५४५ ॥

प्रधानाधिष्ठानयोः सादृश्यं सर्वथाऽपेक्षितमित्येतत् दृष्टान्तैरुपपादयति **पृथ्विति**। तदुक्तं भगवत्पादैः 'न हि सत्यशुक्तेः सत्यरजतस्य तयोः सादृश्यस्य चाभावे भ्रान्तिर्भवति' इति ॥ ५४५ ॥

विचित्राकारवर्णानामनन्तानन्तधर्मिणाम्।
शुद्धब्रह्मण्यधिष्ठाने विश्वविभ्रमसिद्धये।
स्वभावसिद्धा सिद्धाऽभूज्जगदाकारवर्णता ॥ ५४६ ॥

प्रकृतोपयोगमाह **विचित्रेति**। धर्मिणामित्यनन्तरं आरोपस्येति शेषः। अधिष्ठाने इत्यनेन संबन्धः। **शुद्धेति** विशिष्टस्य मिथ्यात्वेनाधिष्ठानत्वानुपपत्तेः। **स्वभावसिद्धा** सत्या। भ्रान्तिकल्पितत्वे, अधिष्ठानान्तरापेक्षयाऽनवस्थया मूलक्षतेः। अनेन निराकारस्य शुद्धस्याधिष्ठानत्वं वदतः परस्य व्याघातो दोषोऽप्युक्तो ध्येयः ॥ ५४६ ॥

अधिष्ठानमनारोप्यं तवैवावश्यकं मते।
ब्रह्मणः पारमार्थ्यं हि न सिद्ध्येदन्यथा तव ॥ ५४७ ॥

तवेति अधिष्ठानत्वान्यथाऽनुपपत्त्या ब्रह्मणः पारमार्थ्यं वदत इत्यर्थः ॥ ॥५४७ ॥

निरधिष्ठानकभ्रान्तिवादिता च भवेद्ध्रुवम्।
अधिष्ठानं हि शुद्धं ते व्यावहारिकविभ्रमे ॥ ५४८ ॥

न चेच्छून्यवादप्रवेशः स्यादित्याह **निरधिष्ठानेति**। अधिष्ठानस्य आरोपितसत्ताऽधिकसत्ताकत्वनियमाङ्गीकारेणापि अधिष्ठानस्य शुद्धत्वं पारमार्थिकत्वं च तवावश्यकमित्याह **अधिष्ठानमिति**। **व्यावहारिकविभ्रमे** **व्यावहारिकस्य विभ्रमे**। व्यावहारिकवियदादिविषयकविभ्रमे। बाधिकायाश्चरम-प्रमायाः परमार्थशुद्धविषयकत्वाङ्गीकारादिति भावः ॥ ५४८ ॥

सोपाधिकभ्रमेऽपि स्यादुपाधेस्तादृगात्मता।
पीतः पीतेन पित्तेन तिक्तस्तिक्तेन तेन हि ॥ ५४९ ॥

तादृगात्मता भ्रमे भासमानवर्णादिसदृशवर्णादिमत्त्वम्। पीतवर्णो-पेतनायनपित्तरूपोपाधिना। **पीतः**। शङ्खः पीत इति भासते। **तेन** आस्यगतपित्तेन **तिक्तः**। गुडः तिक्त इति भ्रमो भवतीत्यर्थः ॥ ५४९ ॥

तवोपाधिरविद्यैव तत्राकारादिकल्पितम्।
उपाध्यन्तरशून्यत्वान्निरुपाधिकमेव तत् ॥ ५५० ॥

तन्निष्ठनियताकारभ्रान्त्यै ब्रह्म भवेत्तथा।
अतो जगद्भ्रमायाभूद्ब्रह्मैव जगदन्तरम् ॥ ५५१ ॥

तथा च जगद्भ्रमस्यौपाधिकत्वोपगमेऽपि न सत्यजगदन्तराङ्गीकारा-पत्तिदोषनिस्तार इति निरूपयति **तवेत्यादिना**। अविद्यैवेष्टा। आरोपिते भासमानाकारसदृशाकारवत्त्वं उपाधेरावश्यकमित्युक्तम्। अविद्याया अपि कल्पितत्वात् तत्राकारसिद्ध्यर्थं पुनः उपाध्यन्तरं वा तादृशाकारोपेतं अधिष्ठानान्तरं प्रधानान्तरं च वा स्वीकर्तव्यम्। न चाविद्याभ्रमस्य अन्य उपाधिः परमतेऽस्तीत्याह **उपाध्यन्तरशून्यत्वादिति**। अतः निरुपाधिकभ्रमे क्लृप्तं सत्यजगदन्तरद्वयं अधिष्ठानप्रधानभूतं अङ्गीकार्यम्। तथा च जगदारोपार्थं द्वयं, अविद्यारोपार्थं च द्वयं इति सत्यजगच्चतुष्टयाङ्गीकार आपन्नः। एवं च वृश्चिकभिया

पलायमानस्याशीविषमुखे निपात इति भावः। **अतः** भ्रमस्य सोपाधिकत्वनिरुपाधिकत्वरूपपक्षद्वयेऽपि ब्रह्मात्मकसत्यजगदङ्गीकारस्यावश्यकत्वात् ॥ ५५१ ॥

ममास्तु तज्जगत्सत्यं मनोरथरथोपमम्।
इदं जगत्तवैवास्तु मिथ्यामिथ्यात्ववादिनः ॥ ५५२ ॥

अधिष्ठानभूतं अत एव सत्यं त्वयाङ्गीक्रियमाणं ब्रह्मात्मकं जगदेकम्। अपरं त्वयाऽऽरोपितत्वेन मिथ्याभूतं जगदपरम्। द्वयोर्मध्ये आद्यं, सतां मनोरथरथोपमं अर्थक्रियासमर्थं, जगत् मम अस्तु। ब्रह्मात्मकं इति पररीत्या। वस्तुतस्तु 'इदं हि विश्वं भगवानिवेतरं यतो जगत्स्थानविरोधसंभवः' इति स्मृत्युक्तदिशा ब्रह्मस्वामिकं इत्येव तात्पर्यार्थः। अपरं मिथ्यात्ववादिनः तवास्तु। तत्रान्नपानादीनां अर्थक्रियाऽसमर्थत्वेन अभावेन तव नित्योपवासात् 'क्षुत्क्षामान्' इत्युक्तरीत्या तमःसाधनत्वात्। सत्यत्ववादिनः ब्रह्मप्राप्तिरूपो मोक्षः। आरोपितत्वं वदतो मायिनः 'असत्यमप्रतिष्ठं ये जगदाहुरनीश्वर। — । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' इति स्मृत्युक्तं तम एव। इत्येवं फलभेदमाह **ममेति तवेति** च ॥ ५५२ ॥

पटस्थले घटभ्रान्तिर्घटदेशे पटभ्रमः।
न क्वापि विद्यते वस्तुव्यत्यासो विभ्रमस्य हि ॥ ५५३ ॥

परन्यायेनैव जगतः पारमार्थिकत्वं सिषाधयिषुः पराभिमतं भ्रमस्वरूपं विवेचयति **पटेति**। जगत्प्रतीतेर्नैयत्यं तावदस्ति घटस्थले एव घटस्य, पटस्थले एव च पटस्य इत्येवम्। न तु पुनः व्यत्यासेन, घटस्थले पटस्य प्रतीतिः पटस्थले घटस्य इत्येवंरूपा ॥ ५५३ ॥

तत्तदा स्याद्यदि ब्रह्म तत्र तत्रैव तादृशम्।
स्वयमस्ति न चान्यत्र ततो भ्रान्तिश्च तादृशी ॥ ५५४ ॥

तदेतस्य नैयत्यस्य पररीत्योपपत्तिप्रकारमनुवदति **तदिति ब्रह्म** घटाधिष्ठानम्। **तत्रैव** घटदेशे एव **तादृशं** घटाकारम्। **स्वयमस्ति** अधिष्ठानवत् तदाकारस्यापि सत्यत्वावश्यंभावात्। **नान्यत्र** पटदेशे। **भ्रान्तिः** घटभ्रान्तिः। **तादृशी** घटदेशे एव घटाकारा ॥ ५५४ ॥

अधिष्ठानानुसारेण तत्र तत्रैव जायते।
इति वा स्वस्वहेतूत्थाः पदार्थास्तत्र तत्र हि ॥ ५५५ ॥

सन्ति स्वभावतस्तस्मात्तत्र तत्रैव तादृशी।
मतिर्व्यत्यासतो नेति व्यवस्थाऽऽश्रयणेन वा।
इतस्तृतीयः पन्थास्तु न मुरारेश्च विद्यते ॥ ५५६ ॥

तादृशीत्युक्तमेव विशदयति **अधिष्ठानेति**। सिद्धान्ते प्रतीतिनैयत्ये हेतुमाह **स्वस्वहेतूत्था इति**। तत्र तत्र स्वोपादानप्रदेश एव। पदार्थाः सन्ति इत्युत्तरेणान्वयः। **स्वभावतः** सत्यत्वादेव। **इतः** प्रागुक्तप्रकारद्वयादन्यः **पन्थाः** प्रकारः। मुरारेरित्यपहासः। 'मुरारेस्तृतीयः पन्थाः' इत्याभाणकविषयस्य अस्वप्रकाशानुव्यवसायमुपेत्य प्रामाण्यस्वतस्त्ववादिनो मुरारिमिश्रस्यापि ॥ ॥ ५५५ ॥ ५५६ ॥

पक्षद्वयेऽपि नास्माकं हानिरुक्तप्रकारतः।
शुद्धं जगत्पूर्वपक्षे जडं पक्षान्तरे जगत् ॥ ५५७ ॥

हानिः सत्यत्वस्येति शेषः। मायिरीत्या ब्रह्मात्मकाधिष्ठानभूत जगत्सत्यत्वसिद्धेः। अस्मत्पक्षे स्वातन्त्र्यैक्यपरत्वमाश्रित्य। स्वस्वकारणजन्यत्वपक्षे तु सत्यत्वस्य निराबाधत्वात् इत्येवमुक्तप्रकारतः। तदेव स्मारयति **शुद्धमिति**। ब्रह्मात्मकं अत एव सत्यम्। **पूर्वपक्षे** मायिपक्षे। तद्रीत्या अधिष्ठानभूतचैतन्यात्मकत्वे सत्यत्वस्य कथञ्चिदहानेः। **पक्षान्तरे** स्वस्वकारणजन्यत्वेन दृश्यमानमेव जडं जगत् सत्यभूतं इति सिद्धान्ते ॥ ५५७ ॥

मिथ्या चेत्तद्भवेत्प्रातिभासिकं क्षणिकत्ववत् ।
इदानीमेव बाधेन तत्रारोपोऽपि बाधितः ।
तदा सत्यं जगदिदं भवेन्मम निराकुलम् ॥ ५५८ ॥

मायिरीत्याऽपि चैतन्यात्मकत्वेऽपि सत्यत्वसिद्धिरिति यदुक्तं तत्र बाधकमाशङ्क्य निराकरोति **मिथ्या चेदिति**। निराकारे शुद्धे प्रतीयमानस्य जगदाकारस्य मिथ्यात्वमुच्यते, अतः आरोपिताकारेण न सत्यत्वसिद्धिः इति परेण यद्युच्यते इत्यर्थः । परिहरति **प्रातिभासिकमिति**। आपद्यते इति शेषः । तत्र हेतुः **इदानीमेव** भ्रमकाले एव। **बाधेन** विरुद्धाकारप्रतिभासेन। ब्रह्मणः चेतनत्वप्रत्यक्त्वादिना । जगतः जडत्वपराक्त्वादिना ॥ तदुक्तं वादावल्यां 'न आत्मा जगदारोपाधिष्ठानम् । अविषयत्वात् । तद्विरुद्धतया प्रतीयमानत्वात्' इति । तथा च आरोपः प्रातिभासिकः, मिथ्येति यावत्। इदानीमेव बाधात् ब्रह्मणि प्रतीयमानक्षणिकत्ववत् ॥ जगत् सत्यं बाधितारोपकत्वात् आत्मवत् इति प्रयोगो ध्येयः ॥ ५५८ ॥

अधिष्ठानान्तराभावात्कथं ब्रह्मणि कल्पितम् ।
भवेत्तन्न ह्यधिष्ठानपारंपर्यं च ते मते ॥ ५५९ ॥

नन्वधिष्ठानचैतन्यस्यापि न सत्यत्वम्। येन तदात्मकत्वेनापि जगतः सत्यत्वसिद्धिरित्यत आह **अधिष्ठानान्तराभावादिति**। सत्यभूतेत्युपस्कर्तव्यम्। तस्यापि मिथ्यात्वे अपसिद्धान्तः अनवस्था च । तत् ते मते न इत्यन्वयः ॥ ५५९ ॥

मायासृष्टिर्न नियता मन्त्रशक्त्यवसायतः ।
फणीकुर्यान्मणीकुर्यात्तृणीकुर्याच्च तत्पुनः ॥ ५६० ॥

सार्वजनीनानुभवसिद्धं नियतप्रतीतिकत्वं मायासृष्टिपक्षे विरुध्यत इत्याह **मायेति**। **फणीकुर्यात्** सर्पत्वेन दर्शयेत् । एवमुत्तरत्रापि ॥ ५६० ॥

अयं तु नियतारोपो रूप्यसर्पभ्रमादिवत् ।
उक्ता व्यवस्था तत्प्राथ्या सुस्थोऽनर्थस्ततस्तव ॥ ५६१ ॥

भ्रमेषु क्वचिन्नियतप्रतीतिकत्वं कुत्रचिदनियतप्रतीतिकत्वं इत्यन्वान्तरविभागसद्भावेऽपि, प्रधानाधिष्ठानसादृश्यरूपसत्यत्रितयसापेक्षत्वनियमः सर्वभ्रमसाधारण इत्याह **उक्ता व्यवस्थेति**। तदुक्तं तत्त्वनिर्णये 'मायामयी सृष्टिरपि तत्सदृशस्यान्यस्य विद्यमानत्व एव दृष्टा । द्रव्यत्वादिसादृश्ययुतं किञ्चिदधिष्ठानमाश्रित्यैव च' इति । **अनर्थः** सत्यत्रितयाङ्गीकाररूपः ॥ ५६१ ॥

अधिष्ठानं प्रधानं च समसत्ताकमेव हि।
दृश्यते रजतारोपे सर्पारोपादिकेषु च ॥ ५६२ ॥

सत्तात्रैविध्यवादेऽपि अधिष्ठानप्रधानयोः समसत्ताकत्वं आरोप्यापेक्षयाऽधिकसत्ताकत्वं च क्लृप्तमित्याह **अधिष्ठानमिति** ॥ ५६२ ॥

सदृशं च तदन्योऽन्यं नियतभ्रमसिद्धये ।
अत एव प्रधानं तदारोप्यादधिकं यतः ॥ ५६३ ॥

नियतेति। अनियतभ्रमेऽपि किञ्चित्सादृश्यमावश्यकमिति पूर्वोक्ततत्त्वनिर्णयवाक्यादवधेयम् । **अत एव** आरोप्यापेक्षयाऽधिक- सत्ताकत्वादेव ॥ ५६३ ॥

तद्बाधेऽपि न तद्बाधो दोषः काचादिरेव च ।
तथाविधो यतो दृष्टस्त्रितयं तद्भ्रमेऽपि सत् ॥ ५६४ ॥

तद्बाधेऽपि आरोप्यस्य बाधेऽपि। **तद्बाधः** अधिष्ठानप्रधानयोः बाधः। उक्तबाधाभावं भ्रमकारणदोषेऽप्यतिदिशति **तथाविधः इति**। त्रितयमित्युपलक्षणम्। अज्ञानं, बाधकज्ञानं, भ्रमः, द्रष्टा, देहेन्द्रियादिकं, दोषः, संस्कारः इत्येतेषामपि सत्यत्वमावश्यकमिति ध्येयम्। अत्र विस्तरः न्यायामृते 'मिथ्यात्वहेतूनां प्रतिकूलतर्काः' इति भङ्गे (१/२५) ॥ ५६४ ॥

इयं विभ्रममर्यादा स्वीकार्या लोकसंमता ।
दृष्टस्यास्य परित्यागे स्याददृष्टस्य कल्पना ॥ ५६५ ॥

भ्रमरूपकार्यं प्रति उक्तानां सत्यभूतानाम् कारणत्वेन तदनङ्गीकारे अकारणकार्योत्पत्तिरूपबाधकं स्यादित्याह **इयं हीति। अदृष्टकल्पना** अकारणकार्योत्पत्तिरूपा ॥ ५६५ ॥

तद्विश्वभ्रमसिद्ध्यर्थं प्रधानं जगदन्तरम्।
अधिष्ठानब्रह्मसमसत्ताकं स्यादनिच्छतः।
दोषोऽपि तादृक्कल्प्यस्स्यादुक्तो दोषो
न चेद्भवेत् ॥ ५६६ ॥

अनिच्छतः 'पिण्याकयाचनार्थं गतस्य खारीतैलप्रदानप्रतिज्ञावत्' इति वादावल्युक्तरीत्येत्यर्थः। **तादृक्** अधिष्ठानसमसत्ताकः पारमार्थिक इति यावत्। **न चेत्** उक्तसर्वेषां वा तेषामेकतमस्यापि वा सत्यत्वानङ्गीकारे ॥ ५६६ ॥

व्यावहार्यं प्रधानं चेदधिष्ठानं च तादृशम्।
बलात्स्यात्सदृशे ते हि कुतो विसदृशे वद ॥ ५६७ ॥

अधिष्ठानान्तरं वाच्यमधिष्ठानभ्रमे यदि।
तदा प्रधानभ्रान्तौ च स्यात्प्रधानान्तरं तव ॥ ५६८ ॥

ननु यदुक्तं भ्रमस्य सत्यप्रधानोपेतत्वं नियतमिति न तद्युक्तम्। तथा हि। न तावत्प्रधानं भ्रमे स्वरूपेणोपयुज्यते। अज्ञातरजतस्यापि रजतारोपप्रसङ्गात्। नापि तज्ज्ञानम्। ज्ञानस्य चिरविनष्टस्य कारणत्वानुपपत्तेः। किन्तु तत्संस्कार एव। स च भ्रमेणाप्युपपद्यते। अतः प्रधानस्य व्यावहारिकसत्यत्वेऽपि भ्रमोपपत्तिरिति। तदेतत्प्रतिवन्द्या दूषयति **अधिष्ठानं चेति। बलात्** व्याप्तिबलात्। हि यस्मात्। ते अधिष्ठानप्रधाने। **सदृशे** समसत्ताके इति व्याप्तिः। ननु अधिष्ठानस्य व्यावहारिकत्वं न युक्तम्। तथा सति आरोपार्थं तस्याप्यधिष्ठानान्तरं कल्पनीयं स्यात्। एवं तस्याप्येवमित्यनवस्था स्यादिति चेत्समं प्रधानेऽपीत्याह **तदेति** मूलक्षतेरभावान्नानवस्थेति चेन्न प्रपञ्चभ्रमस्य अप्रमितत्वात् ॥ ५६७ ॥ ५६८ ॥

पूर्वं पूर्वं प्रधानं चेत्कार्ये कार्ये ममापि हि।
उपादानमधिष्ठानं तद्भागास्तस्य तस्य च ॥ ५६९ ॥

पूर्वोत्तरप्रधानयोः कार्यकारणभावः उपेयते चेत् तत्तत्कार्यस्य तत्तत्कारणमेवाधिष्ठानमिति अधिष्ठानेऽपि तथा स्यादित्याह **उपादानमिति । भागाः** उपादानानि ॥ ५६९ ॥

इदमेव ह्यधिष्ठानं प्रतीतेरनुसारतः ।
न ब्रह्म नेह नानेति तत्र विश्वाप्रतीतितः ॥ ५७० ॥

एवं सति अयं घट इति भ्रमप्रतीतिरपि अनुकूलिता स्यात् । न हि कोऽपि अयं घटः इति उक्ते ब्रह्म घट इति वा ब्रह्मणि घट इति वा प्रत्येति। उपादानस्यैवाधिष्ठानत्वपक्षे तु कपालो घट इति वा कपाले घट इति प्रतीतिः लोकसिद्धा सिद्धेत्याह **इदमेवेति ।** ब्रह्मणि विश्वं इति प्रतीतिस्तु नेह नानास्तीति श्रुत्यैव प्रतिषिद्धेत्याह **नेति** ॥ ५७० ॥

ब्रह्म वा व्यावहार्यं स्यादधिष्ठानं तदंशकः ।
तस्य स्युस्तत्तदंशाश्च तस्य तस्य प्रधानवत् ॥ ५७१ ॥

पूर्वपूर्वब्रह्मांशा एव उत्तरोत्तरेषामधिष्ठानानि सन्तु इति रीत्यन्तरमाह **तदंशक** इति ॥ यद्यपि नायं परस्य पन्थाः, तथाऽपि युक्तिरसिकतया प्रौढिवादेनात्र प्रस्ताव्य चर्चित इति ध्येयम् । यदि यः कोऽपि परः वैयात्यात् 'सहस्रशीर्षा' इति श्रुत्या सांशत्वं, 'स भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नि' इति श्रुत्या साधिष्ठानत्वं च परिकल्प्य एवं प्रत्यवतिष्ठेत तर्हि प्रधानस्यापि तथा स्यादिति पूर्वोक्तप्रतिबन्दीस्थिरीकरणार्थं इति ज्ञातव्यम् ॥ ५७१ ॥

निरधिष्ठानता तु स्यात्सर्वथा तस्य वर्जने ।
अन्यथा निरधिष्ठानो भ्रमस्स्याद्रजतभ्रमः ॥ ५७२ ॥

ननु उपादानानामेव अधिष्ठानत्वं न युक्तम् । तेषामपि मिथ्यात्वादिति चेन्नायमस्ति तव नियमः यत् सत्यस्यैवाधिष्ठानत्वमिति । मिथ्याभूतानामेव रज्जुशुक्तिकादीनां अधिष्ठानत्वाभ्युपगतेः । प्रत्युत त्वन्मते सत्यस्य ब्रह्मण एव

ज्ञानाविषयत्वात् सामान्यतोज्ञातत्वविशेषतोऽज्ञातत्वादिधर्मशून्यत्वात् अधिष्ठानत्वं दुर्घटमित्याह **अन्यथेति** ॥ ५७२ ॥

अथवा जडमात्रस्य ब्रह्माधिष्ठानमस्तु ते ।
ब्रह्मणो जीव एवास्तु यत्सोऽहमिति ते भ्रमः ॥ ५७३ ॥

मिथो जीवैक्यवादे च जीवो जीवान्तरस्य भूः ।
एवं चानन्तजीवास्ते भूयासुर्भ्रमभूमयः ॥ ५७४ ॥

पक्षान्तरमुट्टङ्कयति **अथवेति ॥ जडमात्रस्येति ।** मात्रशब्देन जीवानां व्यवच्छेदः । जीव एवास्तु इत्यनन्तरं अधिष्ठानमित्यनुकर्षः । तथा च जीवस्य ब्रह्माहम् इति प्रतीतिरुपपन्ना सम्पद्यते । ननु जीवस्य मिथ्यात्वेन अधिष्ठानान्तरं वाच्यं इति चेत्सत्यम् । जीवान्तरस्य तथाभावोऽस्तु । नन्वेवं चैत्रे मैत्रस्यारोपितत्वे चैत्रस्य अहं मैत्र इति धीः स्यादिति चेत् स्यादेव मिथो जीवैक्यवादे इत्याह **जीव इति । भूः** अधिष्ठानम् । **भूमयः** अधिष्ठानानि ॥ ५७३ ॥ ५७४ ॥

यदि भीर्ब्रह्महत्याया भीतो भवजगत्क्षयात् ।
अब्रह्मवादितापीष्टा तव भाट्टानुसारिणः ॥ ५७५ ॥

ननु ब्रह्मण आरोपितत्वोक्तौ तद्धत्यादोषः इति चेन्मा भैषीः । शशविषाणवदप्रामाणिकस्य तव ब्रह्मणो हत्याया एवाभावात् । प्रत्युत प्रमितस्य जगतो मिथ्यात्वोक्तौ जगद्धत्यादोषस्तु वज्रलेप इत्याह **यदीति । भाट्टमतानुसारिणः ।** 'व्यवहारे भट्टनयः' इति अङ्गीकुर्वतः निरीश्वरभाट्टपृष्ठलंबिनः ॥ ५७५ ॥

ब्रह्मवादा जगद्वादैस्सह यान्तु वनान्तरम् ।
प्रकारद्वयतो लघ्वी सर्वत्रैकप्रकारता ॥ ५७६ ॥

वनान्तरं शून्यवादरूपमतान्तरानुसारेण निषेधविषयताम् । **एकप्रकारता** सर्वं मिथ्या इत्येवंरूपा ॥ ५७६ ॥

लोके सत्तासाम्यदृष्टेरधिष्ठानप्रधानयोः ।
कल्प्यमेतत्समस्तं च विपरीते विपर्ययः ॥ ५७७ ॥

आरोप्यमाणादधिकसत्ताकत्वं यतस्त्रिषु ।
लोकसिद्धं भ्रमे व्याप्तं तदभावे तु न भ्रमः ।
व्यापकस्य निवृत्तौ च किं स्याद्व्याप्यस्य वर्तनम् ॥ ५७८ ॥

'कल्पनाया आरोप्यसदृशसत्याधिष्ठानप्रदानपूर्वकत्वं व्यापकम् । तच्चात्र नास्ति । इति व्याप्यकल्पनाऽपि नास्ति' इति वादावल्युक्तमनुरुध्य निगमयति **लोक** इति ॥ ५७७ ॥ ५७८ ॥

किञ्च दोषोऽपि कोऽत्र स्यादिति चिन्त्यं
विवेकिभिः ॥ ५७९ ॥

अविद्यमानमेवार्थं भ्रमकाले तु यस्स्थिरः ।
प्रदर्शयति लोकस्य स दोष इति गीयते ।
करणेषु यथा काचो यथाऽर्थेष्वतिदूरता ॥ ५८० ॥

दोषानुसन्धानरूपकारणाभावान्न जगज्ज्ञानं भ्रम इति समर्थयितुं दोषस्वरूपं निर्धारयति **अविद्यमानमिति** । यत्सद्भावे करणाभिमतं विपरीतं ज्ञानं जनयति स दोष इत्युक्तं भवति । **काच** इत्युपलक्षणम् । अनुमाने असिद्ध्यादिः । शब्दे ज्ञातज्ञापकत्वादिः । एवं अतिदूरतेत्युपलक्षणम् । अनुमागमयोः प्रमाणविरुद्धत्वादिः इत्यवगन्तव्यम् ॥ ५८० ॥

उपदानं तवाज्ञानं तन्तुवत्कार्यकारकम् ।
भ्रमकाले तु यन्नश्येत्कः पश्येत्तस्य दोषताम् ॥ ५८१ ॥

यत्प्रवृत्तौ भ्रमस्यापि प्रवृत्तिस्स्यात्पदे पदे ।
यन्निवृत्तौ निवृत्तिश्च भ्रमस्य स हि पण्डितैः ॥ ५८२ ॥

एवं च भ्रमे परस्य अविद्यैव दोष इष्टः । न च तथा संभवति । अज्ञानस्य प्रपञ्चोपादानत्वाभ्युपगमात् न तस्य प्रपञ्चभ्रमं प्रति निमित्तकारणभूतदोषत्वम् । भ्रमे

निमित्तकारणं च तदुच्यते यत्सद्भाव एव भ्रमरूपकार्योत्पत्तिः यन्निवृत्तौ च तद्ध्वंसः। अज्ञाने तु न तदुभयमस्ति। किन्तु वैपरीत्यमेवेत्याह **भ्रमकाल इति**॥ ॥५८१ ॥ ५८२ ॥

दोष इत्युच्यतेऽनीदृगज्ञानं ते जगत्त्रये।
कथं दोषो भवेत्पश्य प्रतिकर्मव्यवस्थितिम्।
न चेत्तन्तुः पटे दोषो मृद्दोषो मृण्मये भवेत् ॥ ५८३ ॥

प्रतिकर्मव्यवस्थितिम्। यदिन्द्रियनिर्गतान्तःकरणपरिणतया वृत्त्या यदवच्छिन्नचैतन्यावरकमज्ञानं यदा निवर्तते स एव तदानीमेव तं प्रत्येव विषय इत्येवंरूपाम्। तदुपादानस्यापि तद्भ्रमं प्रति दोषत्वाङ्गीकारे अतिप्रसङ्गमाह **न चेदिति** ॥ ५८३ ॥

किञ्च कुड्येन वस्त्रेण तमसा वाऽऽवृते घटे।
ज्ञानमात्रनिरोधेन न प्रमा नापि चाप्रमा ॥ ५८४ ॥

तस्मादावरणाज्ञानं स्याज्ज्ञानप्रतिबन्धकम्।
भ्रमहेतुः कथं दोषो भावाज्ञानमिदं वद ॥ ५८५ ॥

आवरणाभिमतं भावरूपाज्ञानं ज्ञानसामान्योत्पत्तिप्रतिबन्धकं ज्ञानविशेषभ्रमहेतुरिति परोक्तिः महोन्मादविलास इत्याह **किञ्चेति**। कुड्यं व्यवहितमावरणं, वस्त्रं संबद्धं, तमः सत्यपि सन्निकर्षे ज्ञानोत्पत्तिविघटकमिति विवेकः। कार्यानुत्पादप्रयोजकत्वं सर्वथा प्रतिबन्धकसामान्यलक्षणम्। तथा च ज्ञानसामान्योत्पत्तिप्रतिबन्धकं ज्ञानविशेषभ्रमहेतुश्चेति सुस्फुटो व्याघातः ॥ ५८४ ॥ ॥ ५८५ ॥

तददोषस्य दोषत्वभ्रमो यस्तव चेतसि।
तत्र दोषो भवेच्छब्दभावाज्ञानं परं तव ॥ ५८६ ॥

अपहसति **तदिति** तस्मादित्यर्थः। **अदोषस्य** भ्रमोत्पत्तिप्रतिबन्धकस्य। **दोषत्वभ्रमः** भ्रमोत्पत्तिहेतुत्वभ्रमः। **यस्य** मायिनः। **शब्दभावः** आवरणरूपशब्दस्य यथार्थोऽभिप्रायः। तदज्ञानं, तद्विषयकविपरीतज्ञानम् ॥ ५८६ ॥

तस्माद्योग्यप्रधानादेरभावान्न जगन्मृषा ॥ ५८७ ॥

तस्मात् व्यापकाभावात्। व्याप्यं जगन्मृषात्वं भ्रान्तिकल्पितत्वमपि न ॥ ॥५८७ ॥

अतीतकल्पेऽतीतं यत्प्रधानं तज्जगत्तव।
तत्संस्कारेण चेदानीमारोप्यन्ते घटादयः।
इति वाच्यं नष्टदृष्टेरदृष्टत्वाद्भ्रमान्तरे ॥ ५८८ ॥

'पूर्वपूर्वप्रधानारोपस्य उत्तरोत्तरप्रपञ्चारोपे प्रधानत्वादिति चेन्न असत्त्वात्' इति वादावल्युक्तं समर्थयते **अतीतेति**। एवं वदता कल्पादिकालीनभ्रमस्य पूर्वकल्पीयप्रधानसंस्कारः कारणं वाच्यं इत्याह तत्संस्कारेणेति ॥ तत्र हेतुः **नष्टदृष्टेरिति। भ्रमान्तरे** अनुभूयमानारोपस्थले सर्वत्र। **नष्टदृष्टेः** नष्टपदार्थदर्शनस्य। **अदृष्टेः** सन्निकर्षायोगेनासंभवात् ॥ ५८८ ॥

यतोऽनुभूयमानस्यैवारोपोऽयमभून्न ते।
भ्रमोऽन्योऽयं प्रधानस्य संस्कारोद्बोधजो ध्रुवम् ॥ ५८९ ॥

गृह्यमाणारोपस्थले प्रधानस्य विद्यमानताया नियतत्वात्, प्रकृते च तदसंभवात् अयं प्रपञ्चभ्रमः गृह्यमाणारोपादन्यः स्मर्यमाणारोप इत्येव वाच्यं गत्यन्तराभावादित्याह **ध्रुवमिति** ॥ ५८९ ॥

भ्रमहेतुस्स संस्कारो यदि जीवेषु जृंभते।
जातिस्मरत्वसिद्ध्यर्थं तपांस्यासंस्तदा वृथा ॥ ५९० ॥

अस्तु तथेति चेत्तत्रातिप्रसङ्गमाह **जातिस्मरत्वेति**। 'हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः' इति जन्मान्तरस्मरणार्थं गजेन्द्रस्य तपः, तथा 'एवं पुरा

धारणयाऽत्मयोनिः नष्टां स्मृतिं प्रत्यवरुह्य तुष्यन्। तथा ससर्जेदममोघदृष्टिर्यथाऽप्ययात्प्राग्व्यवसायबुद्धिः' इति चतुर्मुखस्य तपः इत्येवं **तपांसि** तैस्तैः कृतानि तपांसि, निरर्थकानि स्युः। त्वद्रीत्या सर्वेषां जीवानां पूर्वकल्पीयस्य इदानीन्तनारोपं प्रति प्रधानस्य स्मरणस्य स्वत एव सिद्धेरित्याह **वृथेति** ॥ ५९० ॥

संस्काराधारमनसोऽसत्त्वाच्च न स वर्तते।
घटावच्छिन्नचैतन्ये तत्संस्कारात्कथं भ्रमः ॥ ५९१ ॥

असत्त्वात् प्रलयेऽभावात्। **सः** संस्कारः। **न वर्तते** निराधारस्यावस्थानायोगादिति भावः ॥ ५९१ ॥

ज्ञानोपादानमनसस्संस्काराधारतोचिता।
अन्यत्रानुभवोऽन्यत्र संस्कार इति को वदेत्॥ ५९२ ॥

ज्ञानोपादानेति 'ह्रीर्धीर्भीः सर्वं मन एवे'ति श्रुतेः। **उचिता** उपादानोपादेययोः समानाश्रितत्वनियमात्। नियमानङ्गीकारेऽतिप्रसङ्गमाह **अन्यत्रेति** ॥ ५९२ ॥

तत्संस्काराद्ययोगेन संस्कारस्य तिरस्कृतेः।
दोषस्य दूषणाच्चैव सत्यमासीज्जगत्त्रयम् ॥ ५९३ ॥

तत् तस्मात्। संस्कारादीत्यादिपदेन प्रधानाधिष्ठानसादृश्यादिग्रहणं **तिरस्कृतेः** चैतन्याश्रितत्वस्येति शेषः। **दोषस्य** अज्ञानस्य। **दूषणात्** आवरणाभिमतस्य ज्ञानकारणत्वानुपपत्तिव्युत्पादनेनेति भावः ॥ ५९३ ॥

विमतोऽयं प्रपञ्चस्तदनारोपित एव हि।
आरोपहेतुशून्यत्वाद्यथा ब्रह्मेति साध्यते ॥ ५९४ ॥

एवं असिद्धेः अप्रयोजकतायाश्च परिहृतत्वेन सिद्धमनुमानमाह **विमत इति** ॥ ॥ ५९४ ॥

दृष्टानुसारवैरूप्ये नष्टारोपकथा वृथा ।
इत्यारोपलतामूलं सिक्तमुष्णेन वारिणा ॥ ५९५ ॥

दृष्टानुसारवैरूप्ये शुक्तिरूप्यभ्रमे दृष्टो यः प्रकारः सत्याधिष्ठानप्रधानसादृश्यादिपूर्वकत्वं तदपलापेन, प्रपञ्चारोपसाधनायानुमानप्रयोगे । त्वदुक्तानुमानेष्वपि व्याप्तिपक्षधर्मतयोरपि दृष्टानुसारेणैव वक्तव्यतया तयोरेवासिद्धेः आरोपसाधनाय त्वया प्रवर्तिता कथा **वृथा** निष्प्रयोजना ॥ **लता** आरोपसाधनाय प्रयुक्ता युक्तिः । **उष्णेन वारिणा** अनुमांगवैकल्यरूपदोषेण । **सिक्ता** आभासतां नीता । यद्वा **दृष्टः**, कथाहेतुः यः, प्रमाणैः साधनीयं तर्कैश्च दूषणीयं इत्येवं प्रकारः, **तदनुसरणवैरूप्यात्** जगदारोपकथने तदन्तःपातिप्रमाणानामपि मिथ्यात्वेनासाधकत्वप्राप्त्या, **नष्टारोपकथा** नष्टानां 'त आसुराः स्वयं नष्टा जगतः क्षयकारिण' इति गीतोक्तदिशा आसुरस्वभावानां मायावादिनां **कथा वृथा** कथकत्वमेव न संभवति । **इति** हेतोः **आरोपलतायाः मूलं** साधकत्वं **उष्णेन वारिणा सिक्ता** वन्ध्यासुतवचस इव साधनबाधनाक्षमतां प्राप्ता । तदुक्तं अनुव्याख्याने 'अनङ्गीकुर्वतां विश्वसत्यतां तत्र वादिता' इति ॥ ५९५ ॥

आरोपयोग्याधिष्ठानशून्यत्वात्परमार्थसत् ।
ब्रह्मवज्जगदेतत्स्यादिति सर्वं समञ्जसम् ॥ ५९६ ॥

अधिष्ठानशून्यत्वादित्युपलक्षणम् । प्रधानशून्यत्वात् सादृश्यशून्यत्वात् इत्यादिकं प्रत्येकं प्रयोक्तव्यम् । शुक्तिरूप्यादिकं व्यतिरेकदृष्टान्तः ॥ ५९६ ॥

दृष्टानुसारवैरूप्ये सत्यं जगदभून्मम ।
दृष्टानुसारसारूप्ये सत्यं जगदभून्मम ॥ ५९७ ॥

वैरूप्ये सत्यत्वसिद्धिप्रकार उक्तः । सारूप्ये लोके अधिष्ठान, प्रधान, सादृश्य, दोष, देहेन्द्रिय, बाधकज्ञानसंस्कारभ्रमादीनां आरोप्यादधिकसत्ताकत्वस्यैव दृष्टत्वेन तेषां, तत्समानन्यायेन जगतः, सत्यत्वसिद्धिरित्युभयतः पाशारज्जुः परस्येत्याह **दृष्टेति** ॥ ५९७ ॥

घटोऽहमिति न भ्रान्तिरनानुभविकत्वतः ।
घटोऽयमिति चेद्भ्रान्तिस्स्वस्मिन्नासौ घटभ्रमः ॥ ५९८ ॥

प्रतीतेः स्वरूपं त्रेधा विविच्य सर्वथा तस्या भ्रान्तित्वं दुर्घटमित्याह **घट इति** । घटोऽहमिति प्रतीतिरनुभवपराहता । अयं घट इति प्रतीतिस्तु अधिष्ठानचैतन्यमनुल्लिखन्ती न चैतन्ये घटस्यारोपितत्वे प्रमाणमित्याह **स्वस्मिन्निति** । **असौ** अयं घट इत्याकारकः । **स्वस्मिन्** चैतन्ये ॥ ५९८ ॥

स्वस्याहंत्वेन भास्यत्वनियमादावयोर्मते ।
अन्यत्र नैक्यभ्रान्तिस्सा तद्भेदस्य स्फुटत्वतः॥ ५९९ ॥

चैतन्यस्य अहंशब्देनैवोल्लेख उभयवादसिद्ध इत्याह **स्वस्येति** । अतः इदंशब्दो देशकालावेवोल्लिखति न चैतन्यम् । **अन्यत्र** देशकालयोः । **स्फुटत्वतः** भ्रमकाल एव प्रतीयमानत्वात् । तथात्वेऽपि भ्रमत्वे भ्रमस्यानिवृत्तिप्रसङ्गः । ।५९९ ॥

अन्यत्र सत्त्वमर्थश्चेन्न भ्रान्तिस्सा प्रमैव हि ।
अभ्रान्तिसिद्धा सत्ता स्यात्स्वस्मिन्नेव घटस्य हि ॥ ६०० ॥

अतः 'अयं घट' इति प्रतीतिः देशकालयोः सत्तामेव घटस्योल्लिखति । सा च प्रमैवेत्याह **अन्यत्रेति** । चैतन्ये घट इति प्रतीतिरपि सामानाधिकरण्यस्याभावेन न धर्म्यारोपविषयिणी ॥ ६०० ॥

अहमर्थे ह्यधिष्ठाने यतो नायमिति भ्रमः ।
अयं घट इति भ्रान्तिः कथं तामुल्लिखेत्ततः ॥ ६०१ ॥

अयमिति प्रतीतौ चैतन्यस्योल्लेखो नास्त्येवेत्याह **कथमिति** ॥ ६०१ ॥

घटोऽयमिनि वृत्तिश्चेद्दृश्याध्यासो गतो दृशि ।
नीरूपब्रह्मणश्चक्षुर्वृत्तौ भानविरोधतः ॥ ६०२ ॥

वृत्तिरेवायं घटः इत्येवमाकारा चैतन्यघटयोरभेदमुल्लिखतीति पक्षे प्रागुक्तं दोषं स्मारयति **दृशीति**। तथा च दृग्दृश्ययोराध्यासिकसंबन्धस्यातन्त्रत्वापातः। **भानविरोधतः** भानासंभवात् ॥ ६०२ ॥

अधिष्ठानब्रह्मघटभ्रमरूपा न साऽप्यभूत्।
घटावच्छिन्नमप्यभ्रं चक्षुषा न हि दृश्यते ॥ ६०३ ॥

रूपवद्वस्त्ववच्छेदेनापि नीरूपब्रह्मणो न चक्षुर्वृत्तौ भानं आकाशे तददृष्टेरित्याह **अभ्रमिति** ॥ ६०३ ॥

वृत्त्याऽज्ञानविनाशे हि ब्रह्मणस्स्फुरणं तव।
वृत्तिः प्रथमसंभूता कालाद्येवावलम्बते ॥ ६०४ ॥

तव अज्ञानस्य विषयाश्रितत्वेनावरकत्वमिति वादिनः। तथा च वृत्तेरुत्पत्तिसमये चैतन्यस्यावृतत्वेन न सा तद्विषयिणी। **कालाद्येव** साक्ष्युन्नीतौ देशकालावेव। **अवलम्बते** विषयीकरोति ॥ ६०४ ॥

इत्यारोपकुठाराग्रे क्रूरा धारैव दुर्घटा।
स्वच्छविश्वद्रुमच्छेदः कर्तुं तत्केन शक्यते ॥ ६०५ ॥

चैतन्यस्य निर्धर्मकस्याधिष्ठानत्वमेव दुर्घटम्। दूरे वृत्तेरधिष्ठान-विषयत्ववार्ता। अतः आरोपरूपकुठार एव नास्ति। कुतस्तस्याग्रधारा। कुतस्तरां तस्याः क्रूरत्वरूपबाधकत्वम्। कुतस्तमां विश्वद्रुमस्य छेदलक्षणबाध इति भावः ॥ ॥६०५ ॥

घटोऽयमिति धीर्दृक्चेन्नाधिष्ठानभ्रमस्तव।
घटोऽयमिति वृत्तिश्चेन्नाधिष्ठानभ्रमस्तव ॥ ६०६ ॥

दृक् चेत् चैतन्यं चेत्। अयं इत्युल्लेखोऽनुभवविरुद्धः। **वृत्तिश्चेत्** न नीरूपचैतन्यस्य तद्विषयत्वम् ॥ ६०६ ॥

अनारोपितवस्तुत्वाद्विश्वं स्यात्परमार्थसत्।
ब्रह्मवद्बाधकोक्तीनामन्यार्थत्वं च तद्बलात् ॥ ६०७ ॥

अनारोपितवस्तुत्वात् संप्रतिपन्नभ्रान्तपदार्थेतरत्वात्। **बाधकोक्तीनां** बाधकत्वेन पराभिमतानां नेहनानाऽस्ति किञ्चनेत्यादीनाम्। वस्तुतो बाधकत्वमेव न संभवति। 'न हि प्रत्यक्षसिद्धमन्येन केनापि बाध्यं दृष्टं' इति तत्त्वोद्योतवचनात्। 'दृष्टस्य वस्तुनो बलवद् दृष्टिं विना नान्यद्बाधकमि'ति च। **अन्यार्थत्वं** स्वगतभेदराहित्यरूपम् ॥ ६०७ ॥

चक्षुरादीन्द्रियैर्बाह्यैर्बहिष्ठोऽर्थो यदीक्ष्यते।
घटोऽयमित्यादिरूपं तदा ज्ञानं विदुर्बुधाः ॥ ६०८ ॥

इदमंशो नानुमितौ न शाब्द्यामपि विद्यते।
अपरोक्षे परं स स्याद्बाह्याक्षैर्बाह्यवस्तुनः ॥ ६०९ ॥

स्वाङ्गस्थभूषणादीनां चक्षुषा वीक्षणेऽपि हि।
ममेदमिति वा ज्ञानं मयीदमिति वा भवेत् ॥ ६१० ॥

अयमित्युल्लेखः बाह्यवस्त्वपरोक्षज्ञानैरेव। साक्षिणा त्वान्तरपदार्थानां अहं सुखी इति मम सुखं इत्याद्युल्लेखः। अतः 'अयं घटः' इति घटस्य देशाकालसंबन्धमेव गृह्णाति न तु चैतन्ये घटस्य तादात्म्यारोपं येन घटस्य मिथ्यात्वप्रत्याशा इति समर्थनाय उभयत्र बहून् लौकिकप्रयोगानभिनीय दर्शयति **चक्षुरादीत्यादिभिः**। **इदमंशो नानुमिताविति** अयं वह्निरिति साध्यसिद्धेरननुभवात्। **शाब्द्यामिति** इदं 'सत्यं ज्ञानमनन्तमि'ति अनुल्लेखात्। **सः** इदमिति निर्देशः ॥ ६०८ ॥ ६०९ ॥ ६१० ॥

साक्षाच्च साक्षिणा वेद्ये साक्ष्याधारे च वस्तुनि।
अहं सुखी मम सुखमहं जानाम्यहं यते ॥ ६११ ॥

अहमिच्छामीति वा धीस्सर्वानुभवशोधने ।
गौरोहमित्यादिरूपो भ्रमोऽपि किल ते मते ॥ ६१२ ॥

सुखवानहमित्येव सुप्तावपि मतिः किल ।
अज्ञोऽहमिति हि भ्रान्तिरज्ञानस्यापि ते मते ॥ ६१३ ॥

तस्मात्प्रमायां भ्रान्तौ वा जाग्रत्स्वप्नसुषुप्तिषु ।
अहमित्युल्लिखेत्साक्षी स्वात्मानं नान्यथा
क्वचित् ॥ ६१४ ॥

कथं तर्हि बाह्यप्रत्यक्षेऽपि गौरोऽहमिति धीरित्यत औपचारिकोऽयं प्रयोगः मन्मते कृष्णं वस्त्रमितिवत्प्रमैव । तदुक्तं न्यायामृते [१/५७] 'कृशोऽहं कृष्ण इत्यादौ कार्श्यादिर्देहसंस्थितः । पुत्रादिस्थितकार्श्यादिवदात्मन्युपचर्यते' इति । त्वन्मते तु प्रत्यक् चैतन्य एव देहधर्मः गौरत्वमध्यस्तमिति सर्वथाऽऽन्तरविषयकप्रत्यय एव अहमित्युल्लेख इत्यनेकनिदर्शनैर्द्रढयति सुखवानित्यादिभिः ॥ ६११ ॥ ६१२ ॥ ॥ ६१३ ॥ ६१४ ॥

अतोऽयं घट इत्याद्या वृत्तिः प्रात्यक्षिकी ध्रुवम् ।
दृग्दृश्ययोगायोगाद्यैस्सा भ्रान्तिर्नाभवत्तव ॥ ६१५ ॥

अधिष्ठानचिदात्मैव भ्रमो वाच्यो भवन्मते ।
स चाहं घट इत्याद्याकारवान्स्यान्न चान्यथा ॥ ६१६ ॥

प्रात्यक्षिकी बाह्येन्द्रियजन्या । दृगिति अधिष्ठानचित एव दृग्रूपत्वात् ॥ ॥६१५ ॥ ६१६ ॥

अनानुभविकत्वाद्यैर्भ्रमोऽप्येष न शोभते ।
अनारोपितमेवातो जगदासीन्न संशयः ॥ ६१७ ॥

घटोऽहमिति या भ्रान्तिस्सा पशोश्च न दृश्यते ।
नाहं घट इति ज्ञानं मूढस्याप्यस्ति चेतसि ।
किं ब्रह्म मूढतो मूढं घटोऽहमिति यस्य धीः ॥ ६१८ ॥

अतः वृत्तावारोपानङ्गीकारात् चैतन्ये तदननुभवाच्च ॥ ६१७ ॥ ६१८ ॥

पशोरप्यहमित्यस्ति सदा ज्ञानमनाकुलम् ।
घटब्रह्मसदाऽज्ञानकलङ्काद्विकलं किल ॥ ६१९ ॥

पशुश्च स्वगृहं वेत्ति वत्सं वनतृणादिकम् ।
घटब्रह्म घटं वेत्ति न पटं वेत्ति कर्हिचित् ।
पटब्रह्म पटं वेत्ति नान्यत्किल कदाचन ॥ ६२० ॥

पशोरपि निकृष्टं मायिब्रह्म इत्येतत्प्रपञ्चयति **पशोरपीत्यादिभिः**। अज्ञानातिशयान्निकृष्टत्वमाह **न पटमिति** ॥ ६१९ ॥ ६२० ॥

तत्र तत्र स्थितं ब्रह्म तं तमर्थं किलोल्लिखेत् ।
नैवान्यदुल्लिखेत्स्वार्थोल्लेखनं च न सर्वदा॥ ६२१ ॥

स्वयोग्यबहुवेत्तृत्वं बालानां च सदैव हि ।
किं ब्रह्म सर्वतः श्रेष्ठं बालादपि च बालिशम्। ६२२ ॥

घटमात्रोल्लेखिनो घटब्रह्मणः स्वविषयकस्य घटान्यपटविषयकस्य च ज्ञानस्याभावाद्बालेभ्योऽपि बालिशत्वमित्याह **तत्रेति** ॥ ६२१ ॥ ६२२ ॥

तुच्छानां पशुपक्ष्यादिजीवानां कृपया किल ।
तस्याज्ञानं विनाश्यं स्यात्तदोन्मिषति नान्यदा ॥ ६२३ ॥

जडैव मानसी वृत्तिर्जडार्थविषया सती ।
तदज्ञानं तिरस्कुर्यात्स्वच्छा न ब्रह्मचित्किल ॥ ६२४ ॥

वृत्तिरेवाज्ञानविरोधिनी न चैतन्यमिति प्रक्रियां गर्हयति **तुच्छानामिति**। **कृपया** तत्तदन्तःकरणवृत्त्या ॥ ६२३ ॥ ६२४ ॥

शुकादयो यं प्रपन्नास्स प्रपन्नो जडं किल।
अहो जडस्य विज्ञानादजडाज्ञानभीर्भवेत्।
अजडं तु दृढज्ञानं नाज्ञानं भीषयेत्किल ॥ ६२५ ॥

प्रपन्नः स्वाज्ञाननिर्हरणाय तदपेक्षावान्। **विज्ञानात्** इत्यस्य विपरीतलक्षणया करणमात्रत्वेनोपचारेणैव ज्ञानपदविषयादित्यर्थः। **दृढज्ञानं** ज्ञप्तिरूपत्वेन ज्ञानपदमुख्यविषयः ॥ ६२५ ॥

वेदा एव ज्ञापयन्ति नेन्द्रियाणीति यं श्रुतिः।
स्तौति ब्रह्मादिदेवाश्च नेक्षन्ते यं स्वचक्षुषा।
स मूढैः पशुपक्ष्याद्यैश्चक्षुषा दृश्यते किल ॥ ६२६ ॥

स्वचक्षुषा स्वातन्त्र्येणेति पूरणीयम्। **चक्षुषा दृश्यते** तज्जनितवृत्त्या विषयीक्रियते। अन्यथा तया तदावरणापगमासंभवात् ॥ ६२६ ॥

श्रुतिस्मृतिविरुद्धेयं सर्वानुभवबाधिता।
प्रक्रिया विक्रिया कस्मादुररीक्रियते त्वया ॥ ६२७ ॥

किं ब्रह्मणाऽपराद्धन्ते नीचादपि च नीचताम्।
यत्तस्य सर्वदा ब्रूषे दोषे भीतिः कथं न ते ॥ ६२८ ॥

कस्मादिति तामसस्वरूपजृम्भितं परतत्वप्रद्वेषं विना इति शेषः ॥ ६२७ ॥
॥६२८ ॥

नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने।
न यत्र श्रूयते माया लोकदृष्टिविकल्पना ॥ ६२९ ॥

त्वमाद्यः पुरुषस्साक्षादीश्वरः प्रकृतेः परः।
मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित
आत्मनि ॥ ६३० ॥

इति भागवते प्रोक्ता माया भ्रमकरीश्वरे ।
यस्मान्निषिद्धा तेनेदं कथं मायामयं जगत् ॥ ६३१ ॥

माया भ्रमकरी इति पदच्छेदः । अत्र श्लोकत्रयेण प्रागुक्तः श्रुतिस्मृतिविरोधो निरूप्यते । श्रूयते इत्यनेन स्मृतिः श्रुतिसंवादपुरस्सरं मायां निषेधति । प्रोक्ता इत्यतः पूर्वं अत्रैव वाक्यशेषे इति वा परेणेति वा पूरणीयम् । 'नमस्तुभ्यं' इतीदं दशमस्कन्धे वरुणवाक्यम् । 'त्वमाद्यः' इति प्रथमस्कन्धे अर्जुनवचनम् । अत्र भ्रमकरीति सामान्योक्त्या स्वाश्रयव्यामोहकरी परव्यामोहकरी चेत्यज्ञानसामान्यलाभः । तेनाविद्यकत्वस्यापि निरासः । 'साक्षादीश्वरः प्रकृतेः परः' इत्यनेन 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं' इति प्रमाणोक्तदिशाऽमायिकत्वलाभः । **चिच्छक्त्या** न तु परोक्तप्रकारेण वृत्त्युपरागमहिम्ना । **कैवल्ये सर्वोत्कृष्टे स्वे महिम्नि** । 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते । तद्यत्स्वभावः कैवल्यं' इति श्रुतेः ॥ ॥ ६२९ ॥ ६३० ॥ ६३१ ॥

न श्रूयत इति प्राह यत्स्वयं स्मृतिरूपिणी ।
स्वशक्त्या तन्मृतां मायां
श्रुतिशक्त्याऽप्यमीमरत् ॥ ६३२ ॥

यद्वा चिच्छक्तिनिर्दग्धमायाऽऽशङ्कास्थिभस्मनोः ।
उद्धाराय प्रभोस्तस्य दास्यौ मन्ये श्रुतिस्मृती ॥ ६३३ ॥

'निरनिष्टो निरवद्यः' 'यः सर्वज्ञः सर्ववित्' इतिप्रभृतिश्रुतिभिः 'अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चने'ति भगवत्पादीयवचनेन च प्रागेव निर्दग्धैव परमात्मन्यज्ञानशङ्कापिशाची । 'निवृत्तरजस्काः पञ्च स्त्रियः संचिन्वन्ति' इति गृह्योक्तेः अस्थिभस्मसंचयः कार्यः । अस्थिभस्मनामपि उत्सारणेन शङ्कानिश्शेषनिर्मूलनमेव उदाहृतश्रुतिस्मृतिरूपवाक्यपञ्चकस्योद्देश इति साहित्यरसेन निरूपितप्रमेयं मधुरयति **यद्वेति** । **दास्यौ** गृह्योक्तदिशा पञ्च स्त्रियः ॥ ६३३ ॥

ब्रह्माण्डान्तर्बहिर्भ्रान्तं किं महान्तो महेश्वरम् ।
संमानयन्ति ध्यायन्ति शृण्वते मन्वते सदा ॥ ६३४ ॥

एकैकार्थभ्रान्तिमन्तमपि सन्तस्सभान्तरात्।
निष्कासयन्ति निन्दन्ति किं ते स्वान्ते
स्मरन्ति तम्॥ ६३५ ॥

भ्रान्तम् अहं घटादिब्रह्माण्डकोशः अहं आवरणं इत्येवं भ्रान्तिस्वरूपम्। **महान्तः** योगसिद्धा ब्रह्मादयः। तथा च, ब्रह्म भ्रमसामान्यशून्यं अखिलयोगिध्यानादिविषयत्वात् इति युक्तिः कथिता। विपक्षे हेतूच्छित्तिं बाधकमाह **एकैकेति** ॥ ६३४ ॥ ६३५ ॥

सर्वार्थान्विपरीतांश्च बुद्धिस्सा पार्थ तामसी।
इति गीतासु यः प्राह किं भ्रान्त्यै स्पृहयत्यसौ॥ ६३६ ॥

असौ विपरीतज्ञानं तामसत्वेन गर्हयन् श्रीकृष्णः। एवं 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति बाधशून्यत्वेन प्रमितयथार्थज्ञानस्वरूपश्च ॥ न हि कोऽप्यनुन्मत्तः स्वयं निन्दिताय स्पृहयति इति भावः ॥ ६३६ ॥

क्वापि योगोऽर्थसंयोगो योगिनां सर्वदर्शने।
सोऽप्यर्थसत्तासापेक्षः किं तेषां नरि शृङ्गदृक्॥ ६३७ ॥

क्वापि व्यवहितातीतानागतविप्रकृष्टादिविषये। योग एवार्थसंयोगः। समाधिलब्धपरिपाकातिशयः योगः। **सर्वेति** स्वयोग्यसर्वेत्यर्थः। **सापेक्ष इति** संबन्धसामान्यस्य संबन्धिद्वयसत्तासापेक्षत्वनियमात्। नियममेव व्यतिरेकमुखेनोपपादयति **किमिति**। **दृक्** ज्ञानम् ॥ ६३७ ॥

तत्त्वज्ञानाय धर्मोऽस्तु युक्तिश्शक्तिश्च वर्तताम्।
मिथ्यादृष्टिर्न तपसा किं कौर्मे रोम्णि दृङ्मुनेः॥ ६३८ ॥

तत्त्वं अनारोपितं प्रमितिविषय इति यावत् तेन कूर्मरोमज्ञानव्यवच्छेदः। तपसेति प्रकृतापेक्षया। सार्वत्रिक एवायं नियमः इति भावः ॥ ६३८ ॥

सत्यार्थ एव सन्मान्यो मिथ्यार्थो न महत्प्रियः।
किं रज्जुसर्पालङ्कारः शुक्तिरूप्याचले शिवः॥ ६३९ ॥

मान्यः उत्कर्षसिद्ध्यर्थमपेक्षणीयः। आरोपितशङ्खचक्रादिप्रदर्शनेन पौण्ड्रकोऽपहसनीय एव जातो न मान्य इति व्यतिरेकोऽप्यनुसन्धेयः ॥ ६३९ ॥

अयं घट इति ज्ञानं सर्वेषामस्तु मानसम्।
देशकालस्थतेदन्ता तत्र त्वखिलसंमता ॥ ६४० ॥

मानसं न तु चिद्रूपम्। तथा सत्यहं घट इत्युल्लेखापत्तेः। अत एव इदंशब्देन नाधिष्ठानब्रह्मानुवेधः। **देशेति** पुरोदेशवर्तमानकालसंबन्धिता ॥ ६४० ॥

इयं धीश्च प्रमैवास्तु ब्रह्म श्रुत्युक्तसाधनैः।
अन्ते निरीक्ष्यमेवास्तु किमप्रामाणिकोक्तिभिः ॥ ६४१ ॥

प्रमैव बाधाभावात्। **ब्रह्म** नीरूपत्वाच्चाक्षुषवृत्त्यविषयः। किमित्याक्षेपे। अनुभवानादरणे, असन् नृशृङ्गमित्यादौ असच्छब्देनाधिष्ठानानुवेधः कल्पनीयः स्यादिति भावः ॥ ६४१ ॥

अथ दृग्दृश्यसंबन्धायोगात्केवलमीदृशी।
कुसृष्टिर्हि त्वया वाच्या सापि शोच्या
महात्मनाम् ॥ ६४२ ॥

अथेदानीं पराभिमतं दृग्दृश्ययोराध्यासिकसंबन्धं सविस्तरं निरस्यति **अथेत्यादिभिः**। **संबन्धायोगादिति**। ज्ञानस्याद्रव्यत्वेन संयोगस्याभावात्, समवायस्य चात्मातिरिक्तेनासंभवादिति भावः। **कुसृष्टिः** अध्यासः, प्रतिकर्मव्यवस्थानिर्वाहार्थं अन्तःकरणस्य बहिर्निर्गमनं, तत्तदाकारेण परिणामः, तत्र ज्ञातृचैतन्यस्य प्रतिफलनं, तेनाधिष्ठानावरणनिवृत्तिः इत्यादिका। **शोच्येति**। क्लृप्तेन विषयविषयिभावाख्यस्वरूपसंबन्धादेव व्यवहारनिर्वाहादिति भावः ॥ ॥६४२ ॥

एवं सति च दृश्यस्य दृक्संबन्धोऽपि को वद।
अध्यासाध्यस्तभावश्चेत्सोऽपि
सम्यग्विविच्यताम् ॥ ६४३ ॥

एवं सति संयोगाद्यसंभवे सति, असंबद्धस्य प्रकाशनेऽतिप्रसङ्गात् त्वयाऽपि यस्य कस्यचित्संबन्धस्यावश्यं वक्तव्यत्वे च सति ॥ ६४३ ॥

आरोपरूपज्ञानत्वमध्यासत्वं हि केवलम् ।
अध्यस्तत्वं च तज्ज्ञानज्ञेयत्वं न ततोऽपरम् ॥ ६४४ ॥

ज्ञेयत्वं विषयत्वम् ॥ ६४४ ॥

अतस्त्वयोक्तस्संबन्धो ज्ञानज्ञेयत्वमेव हि ।
न संयोगस्तयोरासीत्समवायोऽपि न ह्यभूत् ॥ ६४५ ॥

अयं तु वृत्तिघटयोरप्यस्त्येव स्वभावतः ।
वृत्तिर्ज्ञानं घटो ज्ञेय(इ)मिति को नाम नाब्रवीत् ॥ ६४६ ॥

ज्ञानज्ञेययोः स्वरूपसंबन्धः घटतद्वृत्त्योः क्लृप्तः । तेनैव सर्वनिर्वाहे किमाध्यासिकसंबन्धकल्पनादुर्व्यसनेनेत्याह **अत इत्यादिभिः** ॥ ६४५ ॥ ६४६ ॥

ज्ञानज्ञेयत्वमनयोः केनेति यदि शङ्क्यते ।
आरोप्यारोपभावो हि तयोः केनेति कीर्तय ।
संयोगसमवायौ तु नोभयोरपि संमतौ ॥ ६४७ ॥

प्रतिबन्द्या परेणैव स्वरूपसंबन्धमङ्गीकारयितुं पृच्छति **केनेति** ॥ ६४७ ॥

यदि ब्रह्मणि सत्त्वं च घटस्य पृथगुच्यते ।
तर्ह्यध्यस्तत्वकथनं कण्ठशोषणमेव ते ॥ ६४८ ॥

संयुक्तसमवायाख्यस्संबन्धस्तत्र ते भवेत् ।
घटेन युक्तं तद्ब्रह्म समवेता च तत्र चित् ॥ ६४९ ॥

संभावितं प्रकारान्तरमुट्टङ्क्य निषेधति **यदीति । पृथगिति ।** घटस्य चैतन्येऽध्याससिद्धौ उपयोगितया, अध्यासात् पृथग्भूतः, ब्रह्मणो घटेन संयोगसंबन्धोऽङ्गीक्रियते चेदित्यर्थः ॥ एवं सति घटस्य ब्रह्मसमवेतेन ज्ञानेन

संयुक्तसमवायः संबन्ध उक्तो भवति । तत्कथमित्यत आह **घटेनेति । चित्** ज्ञानम् ॥ ॥६४८ ॥ ६४९ ॥

एवं चेद्ब्रह्मसंयुक्तघटाभ्रज्ञानताऽपि ते ।
घटज्ञाने कुतो नाभूत्संबन्धस्य समत्वतः ॥ ६५० ॥

संबन्धान्तरेणैवालम् । किमध्यासेनेति पररीत्यैवोक्तम् । वस्तुतस्तु न ज्ञानाश्रयब्रह्मणा संयुक्तत्वमात्रेण न तज्ज्ञानज्ञेयत्वम् । तथा सति घटाकाशस्यापि ब्रह्मसंबद्धत्वाविशेषेण घटज्ञानज्ञेयत्वं स्यादित्याह **घटाभ्रेति** ॥ ६५० ॥

किं ज्ञाने ज्ञानताऽस्तीति घटज्ञानेऽपि भासते ।
तस्माज्ज्ञाने स्थितत्वं तज्ज्ञानत्वे न प्रयोजकम् ॥ ६५१ ॥

तज्ज्ञाने भासमानत्वे तद्विषयत्वमेव तन्त्रम् । न तु ज्ञानरूपत्वं ज्ञानाश्रितत्वं वा इत्येतन्निदर्शयति **किमिति** ज्ञाने आश्रितत्वमात्रेण ज्ञानता न घटज्ञानेऽवभासत इति भावः ॥ ६५१ ॥

विषयत्वं विषयिता काचिद्वाच्याऽपरैव तत् ।
स एव वृत्तिघटयोरस्त्वद्धाऽयं भ्रमाय ते ॥ ६५२ ॥

अतः तज्ज्ञानत्वे तद्विषयकत्वमेव तन्त्रमिति निगमयति **विषयत्वमिति । स एवेति** । तदुक्तं वादावल्यां 'चैतन्याविषयत्वेऽपि बाधकाभावात् । वृत्तिविषयत्वेनैव व्यवहारोपपत्तेरि'ति । **अद्धा** निश्चयेन । **अयं** अध्याससंबन्धः । **ते भ्रमाय** तवैव भ्रमनिदर्शकः ॥ ६५२ ॥

संबन्धाभावमात्रेण वस्तु मिथ्येति को वदेत् ।
सिद्धे वस्तुनि संबन्धस्तादृक्कल्प्यो हि कश्चन ॥ ६५३ ॥

त्वया संबन्धो ज्ञातुं न शक्यते इत्येतावता प्रमितवस्त्वपलापो न युक्त इत्याह **संबन्धाभावमात्रेणेति** ॥ त्वया संबन्धस्य ज्ञातुमशक्यत्वमात्रेण । तदुक्तमभियुक्तैः 'न हि जात्यन्धेन नीलं द्रष्टुं न शक्यते इत्येतावता अनिर्वचनीयमेव तत्' इति । उक्तं

च वादावल्यां 'संयोगासंभवे समवायवदन्यस्यापि तयोरसंभवे कल्प्यत्वात्। विषयविषयिभावस्य संभवादि'ति ॥ ६५३ ॥

घटाभावश्च भूमिश्च योगाभावेन किं मृषा।
तादृक्स्वरूपतामन्ते तयोर्योगं हि मन्वते ॥ ६५४ ॥

योगेति स्वरूपातिरिक्तसंबन्धेत्यर्थः। तादृक्स्वरूपतां संबन्धान्तरमन्तरेण विशिष्टव्यवहारजनकत्वयोग्यत्वरूपस्वरूपताम् ॥ ६५४ ॥

न चेत्परोक्षवृत्तीनां विषयाः स्युः कथं वद।
न हि वृत्तौ पदार्थानामध्यासस्तत्र विद्यते ॥ ६५५ ॥

परोक्षवृत्तीनामित्युपलक्षणम्। न्यायामृते दृग्दृश्यसंबन्धानुपपत्तिभङ्गे उक्तरीत्या 'ध्वंसादेरतीतादिना मिथ्यात्वलक्षणान्तर्गतस्यात्यन्ताभावस्य प्रतियोगिना वेदान्तनिष्ठशक्तितात्पर्ययोश्च ब्रह्मणा, मुमुक्षायाश्च मोक्षेण तदुक्तदूषणस्य च दूष्येण, त्वद्वाक्यस्य चार्थेन . . . . असंबन्धेन स्वन्यायस्वक्रियास्ववचनविरोधाः स्युरि'त्युक्तातिप्रसङ्गाश्च ग्राह्याः। न हि ज्ञेये ज्ञानमिव, प्रतियोगिशक्या ज्ञेयेष्यमाणव्यवहर्तव्यादयः अभावशक्त्यज्ञानेच्छाव्यवहारादिष्वध्यस्ताः। [न्याया. १/२३] ॥ ६५५ ॥

ज्ञानज्ञेयत्वमर्यादा तत्र येनोच्यते त्वया।
तेनैव दृश्यतादृक्त्वमपरोक्षेऽपि कथ्यताम् ॥ ६५६ ॥

येन स्वरूपसंबन्धेन। तत्र परोक्षवृत्तिस्थले। अपरोक्षे अपरोक्षवृत्तौ ॥ ॥६५६ ॥

अन्यथा पटवृत्तिश्च घटवृत्तिः कुतो न ते ॥ ६५७ ॥

अन्यथा स्वरूपसंबन्धभेदेन ज्ञाने वैलक्षण्यानङ्गीकारे ॥ ६५७ ॥

तत्तद्वृत्तित्वमेव स्याद्येनोपायेन ते मते।
तेनोपायेन सा वृत्तिस्तत्तज्ज्ञानं भवेन्मम ॥ ६५८ ॥

इदं घटज्ञानमेव न पटज्ञानमिति वैलक्षण्यं येन घटेन्द्रियसन्निकर्ष-जनितवृत्तिप्रतिफलनादिना त्वया कथ्यते मया प्रतिफलनादिकुसृष्टिं विहाय तत्तदिन्द्रियसन्निकर्षादिजन्यत्वमात्रेण वृत्तिविषयत्वेनैव कथ्यते इत्याह **तत्तदिति** ॥ ६५८ ॥

तस्मात्कीलस्य लाभाय न देवालयनाशनम्।
कुरु स्वीकुरु विश्वस्य सत्यतां भृत्यतां भज ॥ ६५९ ॥

असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ ६६० ॥

एतान्दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ६६१ ॥

इति गीतास्थकृष्णोक्त्या मिथ्यात्वाशां परित्यज ॥ ६६२ ॥

कीलोऽत्र संबन्धः। देवालयः विश्वम्। अल्पस्य हेतोर्बहुनाशो न युक्त इति न्यायव्युत्पादने तात्पर्यम्। वस्तुतः अन्धेन त्वया कीलस्यादर्शनमात्रेण देवालयस्य मिथ्यात्वकथनमयुक्तमित्याशयः। न कुर्वित्यन्वयः। **भृत्यतां** सत्यविश्वनिर्माणेन जगत्प्रभोरीश्वरस्येत्यादिः। स्वरूपसंबन्धस्य प्रमितत्वेन आक्षेपकस्य संबन्धाभावस्य प्रमितत्वं निराकृतम्। आक्षेप्यं मिथ्यात्वं प्रमाणविरुद्धं चेत्याह **असत्यमिति**। न च वाच्यं इयं निन्दा जगतोऽत्यन्तासत्त्ववादिनं बौद्धमेव स्पृशति न तु पुनः व्यावहारिकसत्यत्ववादिनं मायिनमिति। बौद्धेनापि सांवृत-सत्यत्वस्याङ्गीकृतत्वात्। उभाभ्यामपि बाध्यत्वस्य स्वीकृतत्वेन विवादस्य नाममात्रत्वात्॥ तदुक्तं वादावल्यां 'अत्यन्तासत्त्वाभ्युपगन्तुर्वादिन एवाभावात्। आहुरित्यस्यायोगात्' इति। 'आसुरीं पार्थ मे श्रुणु' इत्युपक्रमेण नष्टात्मानः अल्पबुद्धय इति विशेषणेन मिथ्यात्ववादिनो निन्दा स्फुटा ॥ ६५९ ॥ ६६० ॥ ॥६६१ ॥ ६६२ ॥

घटावच्छिन्नचैतन्ये घटाध्यासो न युज्यते ।
आत्माश्रयप्रसङ्गेन तादृग्भ्रान्तेरसंभवात्   ॥ ६६३ ॥

अतो घटादेरध्यासश्शुद्धचित्येव ते मते ।
निरंशं शुद्धचैतन्यमेकमेव हि तत्तदा   ॥ ६६४ ॥

अध्यासात्प्रागवच्छेदभेदाद्भेदोऽपि तत्र न ।
एवञ्च सर्वं तत्रासीदध्यस्तं न तु किञ्चन   ॥ ६६५ ॥

किं च घटस्यारोपः किं घटाधिष्ठानचिति, शुद्धचिति वा । नाद्यः घटारोपार्थं घटारोपस्यैव कारणत्वाङ्गीकारापत्त्याऽऽत्माश्रयात् । न द्वितीयः । शुद्धचितो निरंशत्वेन अध्यासस्याविशिष्टत्वात् युगपदेव सर्ववस्तूनां प्रकाशापातात् । न चावच्छेदकभेदादतिप्रसङ्गनिस्तारः । आरोपात्प्राक् अवच्छेदस्यासंभवादित्याशयः । **किञ्चन** घटादिकं यत्किञ्चिदेकमेव ॥ ६६३ ॥ ६६४ ॥ ६६५ ॥

तस्मात्सर्वस्य चाध्यासात्सा सर्वस्य च दृग्भवेत् ।
न चेत्कस्यापि दृङ्न स्यादध्यासस्त्वफलो भवेत् ॥ ६६६ ॥

सा घटाधिष्ठानभूता चित् । यदि पुनः चितः अज्ञानावृतत्वेन न सर्वस्य प्रकाशः तर्हि तत एव हेतोः कस्यापि प्रकाशो न स्यात् इत्याह **न चेदिति**। तदुक्तं वादावल्याम् । 'अध्यस्तत्वेन प्रकाशने जीवे अध्यासपक्षे सर्वदा सर्वेषां प्रपञ्चः प्रकाशेत । ब्रह्मणोऽधिष्ठानत्वे तु न कस्यापि कदाऽपी'ति । **अफल इति** प्रकाशस्यानुपपादकत्वात् ॥ ६६६ ॥

अतोऽध्यासान्न दृग्दृश्यभावो ब्रह्मघटादिषु ।
किं त्वध्यासेन हीनोऽर्थः सोयं त्वद्दृशि दृश्यते ॥ ६६७ ॥

अतः उभयथाऽपि दोषसद्भावात् । **दृशि** वृत्तौ चैतन्ये वा । **दृश्यते** विषयो भवति ॥ ६६७ ॥

किञ्च शुक्त्यादिचैतन्येष्वध्यस्तं प्रातिभासिकम् ।
त्वन्मते करणद्वारा साक्षी किल निरीक्षते ॥ ६६८ ॥

तदाऽध्यासाध्यस्तभावसंबन्धो न तयोरभूत् ।
अतस्ततोऽन्यस्संबन्धस्तत्रावश्यं भवेत्तव ॥ ६६९ ॥

तेनैव वृत्तिर्दृश्यानां दृगस्त्वखिलसंमता ।
अनानुभविकी ब्रह्मचितो दृक्त्वकथा वृथा ॥ ६७० ॥

किञ्च शुक्तिरूप्यादिस्थले परप्रक्रिययैवाध्याससंबन्धो भग्नः इत्याह **किञ्चेति** । रूप्यं शुक्त्यवच्छिन्नचैतन्ये आरोपितम् । प्रतिभासते च साक्षिणा । तथा च येन भासते न तदधिष्ठानम् । यच्चाधिष्ठानं पराग्भूतं शुक्त्यवच्छिन्नं चैतन्यं न तेन भासते । न च वाच्यं इदं रूप्यमिति भ्रमे अंशद्वयम् । तत्र इदमंशः अन्तःकरणवृत्त्यवच्छिन्नेन रजतांशस्तु अविद्यावृत्त्यवच्छिन्नेन चैतन्येन प्रतिभासते अतो नोक्तो दोष इति । तथा सति अख्यातिमतानुमतिप्रसङ्गेन प्रवृत्त्याद्यनुपपत्तिः । चैतन्यैक्याङ्गीकारेण परिहारे तु प्रतिकर्मव्यवस्थाभङ्गः । अतः तत्र त्वयाऽपि शुक्तिकाशकलसन्निकृष्टमिन्द्रियं दोषवशाद्रजतं गृह्णातीति वाच्यम् । तथा च सर्वत्र स एव सन्निकर्षोऽस्तु । कृतमध्यासकुकल्पनया । भ्रमप्रमाविवेकस्तु दोषजन्यत्वतदभावाभ्यां संभवतीति न ब्रह्मचित एव दृक्त्वकल्पनं युक्तमित्याह **अनानुभविकीति** । तदुक्तं वादावल्यां 'चैतन्याविषयत्वेऽपि बाधकाभावात् । वृत्तिविषयत्वेनैव व्यवहारोपपत्तेः' इति ॥ ६६८ ॥ ६६९ ॥ ६७० ॥

अज्ञानं किल सर्वत्र ब्रह्म सर्वगतं किल ।
घटभ्रमस्तथाप्यस्य कुम्भकारगृहे किल ॥ ६७१ ॥

पूर्वोक्तविसङ्गतीः संगृह्य परप्रक्रियामपहसति **अज्ञानमित्यादिभिः पञ्चभिः** । **ब्रह्मेति** अधिष्ठानाभिमतं एकमेवेत्यर्थः । तदुक्तं न्यायामृते [१/२३ पु.१९१] 'न हि त्वन्मतेऽपि विज्ञानवादिमत इव तत्तदर्थास्तत्तज्ज्ञानेऽध्यस्ताः । सत्यायाः शुद्धदृशः

स्वतो भेदाभावात् उपाधिविशिष्टाया भेदेऽपि घटादिवन्मिथ्यात्वेन तदधिष्ठानत्वायोगादि'ति । **घटभ्रमः** अहं घट इत्याकारकः ॥ ६७१ ॥

मृदादिकारणाभावे तत्रापि न भवेत्किल ।
जातेऽप्यनलसंयोगस्याधिक्ये बाध्यते किल ॥ ६७२ ॥

मृदादीति । न हि शुक्तौ रूप्यभ्रमाय उपादानाद्यपेक्षाऽस्ति रूप्यस्यासत्त्वादेवेति भावः ॥ **आधिक्ये इति** । तथा सति घटस्य नाशादिति भावः ॥ ॥६७२ ॥

तत्र तत्र घटे नीते भ्रमद्ब्रह्मानुगं किल ।
मुद्गरेण घटे ध्वस्ते भ्रमनाशो भवेत् किल ॥ ६७३ ॥

ब्रह्म अनुगं इति पदच्छेदः ॥ ६७३ ॥

एवं ब्रह्मभ्रमास्सर्वे क्लृप्तास्तत्तत्स्थले किल ।
विचित्रकार्यकर्तृणां यथाऽऽकांक्षा तथा किल ॥ ६७४ ॥

कर्तृणां कुविन्दादीनां चिकीर्षाऽपि भ्रमकारणत्वेनैष्टव्येत्याह **विचित्रेति** ॥ ॥६७४ ॥

इदं विवेककौशल्यं ब्रह्मणो वा भ्रमस्य वा ।
उताज्ञानस्य किं वा तच्छास्त्रकर्तुर्न वेद्म्यहम् ॥ ६७५ ॥

विवेककौशलं विपरीतलक्षणया अविवेकमूढतेत्यर्थः । **अहं इति** । न केवलं अहमेव किन्तु आविपालगोपालाः दुःशास्त्रकारस्य मायिन एवेदं कुकल्पना-विलसितमिति विदन्तीत्याशयः ॥ ६७५ ॥

भ्रमकारणसंपत्तौ भ्रमस्सर्वत्र संभवेत् ।
प्रयोजनानुसारेण स नियोक्तुं न शक्यते ॥ ६७६ ॥

प्रयोजनेति कुलालादीनामित्युपस्कर्तव्यम् ॥ ६७६ ॥

भ्रमजत्वकथा तस्माद्भ्रान्तश्रोत्राय रोचते ।
स्वस्वहेतूद्भवं सर्वं कार्यमित्यतिनिर्मलम् ॥ ६७७ ॥

रोचते इति काकुः । भ्रान्तोऽपि सर्वः स्वसामग्रीमहिम्नैव भ्रमोत्पत्तिः न तु आत्मनः प्रयोजनानुसारेणेति निश्चिनोतीति भावः ॥ ६७७ ॥

किञ्चाध्यस्तं समस्तं च स्वाधिष्ठानैस्सहेक्ष्यते ।
तदध्यस्तघटादीनां वृत्तिश्च ब्रह्मगोचरा ।
अध्यस्तसाक्षाद्धीत्वेन वाच्यावश्यं त्वयैव हि ॥ ६७८ ॥

न चेद्ब्रह्मगताज्ञानं कथं सा विनिवर्तयेत् ।
न ह्यन्यज्ञानतोऽन्यत्र स्यादज्ञानपरिक्षयः ॥ ६७९ ॥

किं च भ्रमबाधयोरुभयत्राधिष्ठानोल्लेखो नियतः । इदं रजतं नेदं रजतमित्यत्र दर्शनात् । तत्राधिष्ठानचितो ज्ञानं न तावदध्याससंबन्धेन । चितः स्वस्मिन्ननध्यासात् । अतो वृत्त्यैवेति वाच्यम् । अतः आवश्यक्या तयैवाध्यस्ताभिमतप्रपञ्चज्ञानमस्तु । अलमप्रामाणिकस्याध्यासस्य तस्य संबन्धत्वस्य च कल्पनयेत्याह **किञ्चेति । सहेति** तदभिन्नतयेत्यर्थः । वृत्तिश्चेद्ब्रह्माविषयिणी तया ब्रह्मावरकाज्ञाननिवृत्तिर्न स्यादित्याह **न चेदिति** ॥ ॥६७८ ॥ ६७९ ॥

एवञ्च ब्रह्मवृत्तिस्सा येन योगेन ते मते ।
तेनैव दृग्दृश्यभावोस्त्वध्यासेन न किं फलम् ॥ ६८० ॥

कथं च वृत्तिरूपोऽयं भ्रमो ब्रह्मोल्लिखेत्तव ।
अतीन्द्रियं परं ब्रह्म कथं चक्षुरपीक्षते ॥ ६८१ ॥

योगेन इन्द्रियसन्निकर्षेण । इदं च परं प्रति आपाद्य तेनैव परस्य खण्डनकौशलम् । तन्मते ब्रह्मण औपनिषदत्वात् । इदं चानुपदमेव स्वयं वक्ति **कथं**

चेति। यद्वा **योगेन** वेदान्तैः शक्तितात्पर्यलक्षणसंबन्धेन चरमवृत्तौ ब्रह्मणो विषयत्वम्, तेनैव अतीन्द्रियधर्मादिज्ञानमप्यस्तु इति भावः ॥ ६८० ॥ ६८१ ॥

दृष्टं चेद्ब्रह्म मुक्तिः स्याद्दृष्ट्वैव किल मुच्यते।
किं न्यूनमस्य ज्ञानस्य मुक्तिदान्निर्विकल्पकात् ॥ ६८२ ॥

निर्विकल्पकादिति मोक्षहेतुत्वेन त्वदङ्गीकृताद्बाधकज्ञानात्। भ्रमाविषयविशेषविषयकत्वं तु बाधकत्वे तन्त्रम्। तत्तु त्वयैव तिरस्कृतमिति भावः ॥ ६८२ ॥

अखण्डब्रह्मचिद्भागे तन्मात्रस्यावगाहिनी।
वृत्तिश्चानुकरोत्येषा तदंशे चरमप्रमाम्   ॥ ६८३ ॥

वृत्तिरेवेति। अधिकविषयकत्वेऽपि विशेष्यांशविषयकत्वस्यानपायादिति भावः। अङ्गीकृतं चास्या वृत्तेर्ब्रह्मानुभवत्वं परेणापि। यथोक्तं न्यायामृते 'विज्ञातो घट इत्युक्तिर्ब्रह्मानुभवतो भवेत्' इति परमतानुवादप्रस्तावे ॥ ६८३ ॥

न चेदधिष्ठाननिष्ठाज्ञानहन्त्र्यपि सा कथम्।
याऽविद्यास्तमये शक्ता मुक्तौ शक्ता कथं न सा ॥ ६८४ ॥

कथमिति तावन्मात्रस्यैव तन्मते मोक्षत्वात्। यथाऽऽह 'अविद्याऽस्तमयो मोक्ष' इति ॥ ६८४ ॥

अहिमूषिकयोः पात्री यथा भागान्तरस्थितम्।
आखुं हन्यात्तथेयं च हन्याद्द्रष्टरि बन्धनम्।
तृणैश्छन्नोऽपि किं वह्निर्न दहेत्सतृणं वनम् ॥ ६८५ ॥

'ननु ज्ञातोऽयं घट' इति अधिष्ठानब्रह्मविषयकत्वेन भवतु ब्रह्मानुभवः। किं त्वियं अध्यस्तं घटमपि विषयीकुर्वन्ती कथं अध्यस्तं अज्ञानं नाशयेदिति शङ्कामनुरूपदृष्टान्तप्रदर्शनेन परिहरति ॥ **अहीति**। मूषिकाऽऽश्रयभूताऽपि पेटिका सर्पस्याप्याश्रयत्वेन यथा भागान्तरस्थितमूषिकावधहेतुस्तथेति भावः।

दृष्टान्तान्तरमाह **तृणैरिति**। वह्निरावरणं तृणं विनाश्य वनमपि यथा दहेत्तथेति भावः ॥ ६८५ ॥

घटवृत्तिर्यतोऽज्ञाननाशिनीति मतं तव।
ज्ञानार्थं श्रवणाद्यर्थं सिद्धेन्ने किं नु तण्डुलैः ॥ ६८६ ॥

ननु सत्यं वृत्त्यैव ब्रह्मानुभव इति। 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते' इत्यादेः। किन्तु स तादृशाऽनुभवो नाज्ञाननाशकः किन्तु श्रवणादिजन्य एव इति चेन्नैतत्तव मतमित्याह **घटेति**। त्वदभिमतदृष्ट्वैव तं मुच्यते इति श्रुत्यर्थविरोधश्च। श्रवणादि अर्थ्यं इति पदच्छेदः। आगमदोष एव यल्लघीयसि सत्युपाये गरीयस उपायान्तरस्य बोधनम्। तथा हि लोकन्यायः 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदि'ति ॥ ६८६ ॥

न चेच्छ्रवणशक्त्यैव स्याद्बन्धस्य निवर्तनम्।
ज्ञानस्वभावतो मुक्तिरिति रिक्तं वचस्तव ॥ ६८७ ॥

न हि ममेव तव मते ज्ञानजन्यप्रसादान्मुक्तिः। येन प्रसादसंपत्तये श्रवणादिजन्यत्वेन ज्ञानं नियम्येत। किन्तु ज्ञानस्वभावादेव। एवमपि श्रवणाद्यपेक्षाऽऽग्रहे परस्य बाधकमाह **न चेदिति**। 'तद्धेतोरेवास्तु तद्धेतुत्वं मध्ये किं तेने'ति न्यायेनेति भावः ॥ ६८७ ॥

अयमित्यत्र लोको हि देशकालस्थतां वदेत्।
ब्रह्मांशस्य प्रवेशं तु साक्षी सर्वस्य बाधते ॥ ६८८ ॥

सर्वस्य देशकालादिकस्य साक्षी ब्रह्मांशस्य प्रवेशं बाधते इति योजना ॥ ॥६८८ ॥

अतोऽनुभवबाधे तु स्यादारोपकथा तव।
आरोपितत्वसिद्ध्यैव लोकानुभवबाधनम् ॥ ६८९ ॥

सर्वानुभवबाध्यार्थं वेदोऽपि न हि बोधयेत् ॥ ६९० ॥

कथेति कथामात्रं न तु प्रामाणिकीति भावः। तेनात्रोक्तोऽन्योन्याश्रय आपाततः। वस्तुतोऽनुभवबाधिता निर्मूला प्रक्रियैव तिरस्कारार्हा इति हृदयम्। **सर्वेति** अयं घट इत्यत्र प्रतीतौ इदंशब्देन ब्रह्म भासते इत्येवमर्थम्। **वेदः** 'तमेव भान्तमनुभाति सर्वं' इत्यादिस्त्वदभिमतः। तदुक्तं भगवत्पादैः 'न चानुभवविरोधे आगमप्रामाण्यम्। आगमप्रामाण्यानुभवस्यैवाप्रामाण्यप्राप्तेरि'ति॥ ६८९॥ ॥६९०॥

तं भान्तमनुभातीति सौरालोकस्य दर्शने।
हेतुतामाह भासेति स्पष्टोक्तेस्स हि भास्करः॥ ६९१॥

प्रकाशमानं तं सूर्यं अनुसृत्य सर्वं रूपवद्वस्तु, आलोकसहकारेण चाक्षुषज्ञाने प्रतीयत इति श्रुत्यर्थमाह **तमिति**। भासेति किरणानां करणत्वोक्त्या तच्छब्दः स्वरसतो भास्करपर एवेत्याह **स इति**॥ ६९१॥

भास्वन्तमनुसृत्योत्था ज्ञानाख्या भा ममास्ति तत्।
तं भान्तमनुभातीति युक्तं ते तु न भाद्वयम्॥ ६९२॥

अधिष्ठानात्मकं ज्ञानं घटज्ञानं हि ते मते।
तज्ज्ञानमनुसृत्योत्थमन्यज्ज्ञानं क्व ते वद॥ ६९३॥

तं भान्तमनुभातीति वाक्यार्थो दुर्घटस्तव।
अतोऽस्मदुक्त एवार्थो वाक्यस्वारस्यसंपदा॥ ६९४॥

'गच्छन्तमनुगच्छति' इति वाक्येऽनुशब्देन गमनद्वयमिवात्रापि अनुभातीत्यत्रानुशब्देन भानद्वयं प्रतीयते। तच्च सूर्यस्य प्रकाशनं अनु घटादेर्भानं इति मदुक्तार्थः श्लिष्टः इत्याह **भास्वन्तमिति**। परस्य तु अनुशब्दार्थो दुर्घटः। भानरूपस्य अधिष्ठानचैतन्यस्यैकत्वादित्याह **अधिष्ठानेति**॥ ६९२॥ ६९३॥ ॥६९४॥

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ।
इति स्मृत्या सूर्यभासो जगद्भासकतोचिता ॥ ६९५ ॥

स्वोक्तार्थे स्मृतिं संवादयति **यदिति**। 'आदित्यगतं तेजो जगद्भासयते' इति भागः प्रकृतोपपादकः ॥ ६९५ ॥

कश्चिच्च चक्षुषा नैनं पश्यतीति हि वेदवाक् ।
स्वाद्वन्नलाभेऽपि कुतः कण्टकान्ने रुचिस्तव ॥ ६९६ ॥

कश्चिदिति। अनेन 'न चक्षुषा पश्यति कश्चनैनं' इति श्रुतिं संगृह्णाति। तथा च अयं घट इति चाक्षुषप्रत्यक्षे न ब्रह्मणो भानमिति भावः। **स्वाद्वन्नं** सूर्यचन्द्रादिप्रकाशस्येशाधीनत्वरूपं मोक्षहेतुभगवन्महिमरूपम्। **कण्टकान्नं** जगतः क्षये पर्यवसाय्यध्यासरूपम्। व्याख्याते चेमे श्रुतिस्मृती अस्मदुक्तरीत्यैव परेणापि ॐ अनुकृतेस्तस्य च, ॐ अपि स्मर्यते इति सूत्रभाष्ये। अत्र विस्तरः भे.प.ब्र.सू. इति ग्रन्थे पु. ६०. ॥ ६९६ ॥

भासमानमिदं सर्वं रत्नार्केन्द्वनलादिकम् ।
तं भान्तमनुभातीति तस्य भासा विभाति च ॥ ६९७ ॥

निरवद्यः श्रुतेरर्थस्सोऽयं स्मृतिसमाख्यया ।
भादीप्ताविति धात्वर्थं दीप्तिमाहुर्यतो बुधाः ॥ ६९८ ॥

स्मृतिसमाख्ययाऽत्र श्रुतौ परमात्मनो जगद्भासकत्वं इतराभास्यत्वं सूर्यचन्द्रादिभाननियामकत्वं, एवंरूपो भगवतो महिमातिशय एवोच्यते इत्याह **भासमानमिति**। एवं सति दीप्त्यर्थकत्वमपि भाधातोरनुकूलितमित्याह **भा दीप्ताविति**। परमते चैतन्यस्य निर्विशेषभारूपत्वेन कर्त्राद्यर्थकप्रत्यया अपि विरुध्यन्ते इत्यपि ध्येयम् ॥ ६९७ ॥ ६९८ ॥

यद्यद्विभूतिमत्सर्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥ ६९९ ॥

इति गीतोदिता वाणी श्रीमतः केशवांशतः ।
श्रीमतां यद्भवं प्राह श्रुतिश्चाह तमेव तत् ॥ ७०० ॥

श्रुत्युक्तार्थे स्मृत्यन्तरमपि प्रमाणयति **यद्यदिति** । **सर्वं** आदित्यादिकं वस्तु । **श्रीमत्** कान्तियुक्तम् । **मम तेजोंशेन** प्रकाशरूपांशेन सहभूतं जानीहीत्यर्थः । **तं** उक्तं श्रुत्यर्थं एव आह । **तत्** तस्मात् स एवार्थो युक्तः ॥ ६९९ ॥ ७०० ॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ७०१ ॥

श्रुत्यर्थधानाक्षोणीयं वाणीगुप्त्यै वृतिश्च नः ।
चक्षुषैवेक्षणक्षेपाद्यच्छ्रुत्येकार्थता स्मृतेः ।
अदिव्यचक्षुर्वृत्तौ यद्ब्रह्मानुल्लेखवाक्च सा ॥ ७०२ ॥

'न चक्षुषा पश्यति कश्चनैनं' इत्युक्तश्रुतेः स्मृतिसमाख्यामाह **न तु मामिति** । **धानाक्षोणी** बीजावापभूमिः । **इयं** स्मृतिः । वाणीगुप्त्यै । श्रुतिसंरक्षणाय । **वृतिः** गीताचार्येण दत्तो वर इति भावः । स्वपक्षसाधने परपक्षदूषणे चेत्युभयत्र व्यापृतत्वात् ॥ श्रुत्यर्थसाधकत्वं दर्शयति **चक्षुषेति** । परपक्षप्रतिक्षेपप्रकारमाह **अदिव्येति** । 'न ह्ययं घट' इति ज्ञानजनकं चक्षुः प्राणिमात्रसाधारणं दिव्यमिति संभवतीति भावः ॥ ७०१ ॥ ७०२ ॥

अथवा स्वस्वरूपेण ज्ञानेन परमेश्वरम् ।
स्वशक्त्यैव सदा भान्तमनुसृत्यान्यदेहिनाम् ॥ ७०३ ॥

प्रत्यक्षेणानुमानेन शब्दाख्यकरणेन वा ।
भातीदं सकलं विश्वमित्यर्थोऽस्त्वति निर्मलः ॥ ७०४ ॥

भाधातोर्दीप्त्यर्थकत्वमाश्रित्य श्रुतेरर्थ उक्तः। ज्ञानार्थकत्वं स्वीकृत्यार्थान्तरमाह **अथवेति। तं** परमात्मानं **एव** स्वसत्तादौ परानपेक्षत्वरूपस्वातन्त्र्येणैव। **तदाह स्वशक्त्यैवेति। भान्तं** क्रियासातत्ये शतृ-प्रत्ययः। तदर्थः स्वपराशेषविषयकज्ञानाश्रयमित्यर्थः। सर्वार्थविषयकमिति स्वतन्त्रमिति च तज्ज्ञानस्य लक्षणद्वयोक्तेः। **तं** परमात्मानं **अनु** उपजीव्य। जीवानां इति शेषः, तत्तद्योग्यतां च **अनु** अनुसृत्य, **सर्वं** जगत् **भाति** तत्तत्करणजन्यज्ञानविषयो भवति ॥ ७०३ ॥ ७०४ ॥

एवं सति ब्रह्मणो वा विशेष्यस्य विशेषणे।
तज्ज्ञाने वा नृणां जन्यज्ञानमात्रे निमित्तता।
सर्वोत्पत्तौ निमित्तस्य (प्रोक्त्यै) प्राप्त्यैव
स्यान्न ते कथा ॥ ७०५ ॥

ज्ञानविशिष्टं ब्रह्म जन्यज्ञानमात्रं प्रति निमित्तकारणमित्युक्तौ विशेष्यप्राधान्यविवक्षायां ब्रह्मणः विशेषणस्य तद्विवक्षायां ब्रह्मज्ञानस्य निमित्तकारणत्वमर्थः प्राप्यत इत्याह **एवमिति**। विशेष्यस्य ब्रह्मणः वा विशेषणे तज्ज्ञाने वा सर्वोत्पत्तौ निमित्तता इति योजना। वाक्यार्थ इति शेषः। तत्र हेतुः भासेति तृतीयया निमित्तताप्राप्त्या एव इति। ते **कथा** अध्यासप्रलापः ।न अत्र श्रुतौ नैवोक्ता इति भावः ॥ ७०५ ॥

एवशब्दोऽनुशब्दश्च स्यादेवं सति सार्थकः।
भासेत्यत्र तृतीयाया हेतुत्वार्थोऽपि शोभते ॥ ७०६ ॥

एवेति परसापेक्षत्वनिरासेन स्वातन्त्र्यस्य, अनुशब्देन जन्यज्ञानमात्रे तदधीनत्वस्य, भासेति तृतीयया निमित्ततायाश्च बोध इति श्रौतपदस्वारस्यमित्याह **एवेत्यादिना** ॥ ७०६ ॥

तव त्वतीन्द्रियं वस्तु नैतद्वाक्यस्य गोचरः ॥ ७०७ ॥

तव चाक्षुषवृत्त्या भान्तं इत्यर्थं वदतः। **अतीन्द्रियं वस्तु** ब्रह्म। **एतद्वाक्यस्य** एतद्घटकस्य **तं** इति **तस्य** इति च शब्दस्य। **न गोचरः** नैव प्रतिपाद्यः ॥ ७०७ ॥

परोक्षवृत्तावज्ञानानाशाद्दृक्च यदावृता।
अतस्सर्वपदार्थोऽपि स्यादनर्थकरस्तव ॥ ७०८ ॥

परपक्षे सर्वशब्दस्य ऐन्द्रियकार्थमात्रपरतया सङ्कोचोऽपि दोष इत्याह **परोक्षेति**। **यत्** यस्मात्। **दृक्** धर्माधर्माद्यतीन्द्रियाधिष्ठानभूता चित्। आवृता। तत्र हेतुः परोक्षवृत्तेः आवरणनिवर्तकत्वस्य त्वयाऽनङ्गीकारात् इति ॥ ७०८ ॥

यद्वा भान्तं तमन्वेतद्भातीति प्रतिभां हरेः।
स्वगोचरां सर्वजगद्गोचरां च श्रुतिर्जगौ ॥ ७०९ ॥

अन्यत्त्वमुख्यतो ज्ञेयमनुशब्दोऽपि शंसति।
अस्मज्ज्ञानं तदेवेति कोऽपस्मार्यत्र वर्णयेत् ॥ ७१० ॥

यद्वा तस्य **भासा** स्वरूपप्रभयैव **सर्वं इदं** प्रमाणप्रमितं अशेषं जगत् **विभाति** अशेषविशेषपुरस्कारेण निरतिशयस्पष्टतया च प्रकाशते। **तमेव भान्तं** प्राधान्येन प्रकाशमानं **अनु** तज्ज्ञानोद्देशेनैव **सर्वं** अन्यत् **भाति** ज्ञेयं भवति इत्यर्थः। जीवानां अयं घट इत्यादिज्ञानं अधिष्ठानचैतन्यात्मकमेवेति अपगतस्मृतिरपि न वदेत्। अयं तु मायी 'मत्तः स्मृतिर्ज्ञानमि'ति स्मृतेः दुराग्रहेणापलापी ततोऽपि निकृष्ट इत्याशयः ॥ ७०९ ॥ ७१० ॥

अथवा विश्वरूपाख्यरूपेपा ज्ञानिनां दृशि।
भान्तं तमनुसर्वं च भातीत्यर्थः श्रुतेर्भवेत् ॥ ७११ ॥

भान्तमित्येतस्य 'दृशि' इत्येतत्पूरणीयम्। तस्य च योगप्रभावलब्धातिशये, विश्वरूपविषयके योगिज्ञान इत्यर्थः। **तं** परमात्मानम्। **अनु** तदवयवैकदेशाश्रितत्वेन। **सर्वं भाति** जगत् प्रतीयते इत्यर्थः। 'तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा। अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा' इति स्मृतेः ॥ ७११ ॥

मलमूत्रादिदृष्टिं सा ब्रह्मदृष्टिं कथं वदेत्।
या तदाहौपनिषदमवाङ्मनसगोचरम् ॥ ७१२ ॥

एवं चतुर्धा स्वमते योजनां प्रदर्श्य परोक्तार्थस्यातिजुगुप्सितत्वमाह **मलेत्यादिभिः**। **या** श्रुतिः **तत्** ब्रह्म औपनिषदं आह **सा** श्रुतिः मलमूत्रादिदृष्टिं एव ब्रह्मदृष्टिं कथं वदेत् इत्यन्वयः ॥ ७१२ ॥

यद्धि वाङ्मनसाऽतीतं तद्वीथीवृषभः कथम्।
श्लेष्ममूत्रमलादीनामपि दृग्ब्रह्मदृक्किल।
तवातिसुलभं ब्रह्म यदौपनिषदं सताम् ॥ ७१३ ॥

सर्वैरपि सुलभतया दृश्यत्वनिदर्शनाय वीथीति वृषभविशेषणम्। **यत्** ब्रह्म **वृषभः** वृषभसदृशः ॥ ७१३ ॥

ब्रह्मज्ञाने सति नृणां मुक्तिः पश्चाद्भवेत्किल।
मलैस्सह विमुक्तिः प्राक्पश्चाद्ब्रह्मदृशिस्तु ते॥ ७१४ ॥

पुण्यनाशस्तदैव स्यात्पातकैर्लिप्यते किल।
ब्रह्मदृष्ट्या त्वशुद्धस्य हन्त शुद्ध्यै स्पृहा किल ॥ ७१५ ॥

मलादिविमोकानन्तरं शुद्ध्यर्थं प्रक्षालनादिविधयः खलु शास्त्रे प्रवर्तन्ते। त्वद्रीत्या ते विरुध्यन्ते। तेषां विधीनामुपपत्तये त्वयैवं वक्तव्यम्। मलमूत्रदर्शनरूपब्रह्मदर्शनेन पुण्यहानिः पापलेपश्च जातः। तदुभयपरिहाराय शुद्धिर्विधीयते इति। तदेतदपहसनीयमित्याह **पुण्येति** ॥ ७१३ ॥ ७१४ ॥ ७१५ ॥

अतोऽधिष्ठानदृक्छून्यदृष्टित्वाद्घटदर्शनम्।
ब्रह्मधीरिव नारोप इति स्यादनुमाऽपि नः ॥ ७१६ ॥

स्वावेद्याधिष्ठानदृक्च नाधिष्ठानस्य धीस्तव।
ततोऽधिष्ठानदृक्छून्या घटदृष्टिर्द्विधाऽप्यभूत् ॥ ७१७ ॥

'अयं घट इति चैतन्यरूपं ज्ञानं' न भ्रमः अधिष्ठानाभिमतचैतन्यसंभिन्नतया प्रकाशमानत्वरहितत्वात् ब्रह्मज्ञानवत्, व्यतिरेकेण शुक्तिरूप्यज्ञानवत् न चासिद्धिः । औपनिषदस्य ब्रह्मणश्चाक्षुषज्ञाने भानायोगस्योक्तत्वात् । निर्विशेषस्य चैतन्यस्य स्वकर्मकत्वस्य परेणानङ्गीकाराच्चेत्याह **अत इति स्वावेद्येति च** ॥ ७१६ ॥ ७१७ ॥

तस्मादारोपबलतो न मिथ्याऽभूदिदं जगत् ।
बाधस्य शोधनेऽपि स्यान्न मिथ्येति मतिर्मम ॥ ७१८ ॥

अस्ति चेन्नास्तिताबोधो बाधस्सर्वस्य नाभवत् ।
नास्ति चेन्नास्तिताबोधो बाधस्सर्वस्य नाभवत् ॥ ७१९ ॥

सर्वस्य बाधः सत्यो मिथ्या वा । आद्ये आह **सर्वस्येति** सर्वान्तःपातिनो बाधस्यैवोर्वरितत्वात् । द्वितीये तु स्वयमेवानङ्गीकारान्न बाध इत्याह **नास्तीति** । न च बाधस्येदानीमेवास्तित्वं कालान्तरे सोऽपि बाधिष्यत इति वाच्यम् । इदानीं अस्तित्वस्यापि त्रैकालिकनिषेधरूपबाधप्रतिरोधकत्वात् । तदुक्तं न्यायामृते 'स्वकाले ह्यस्तितां गृह्णन् साक्षात्कारस्त्रिकालगम् । प्रतिषेधं निरुन्धानो गृह्णात्येवात्यबाध्यतामि'ति ॥ ७१८ ॥ ७१९ ॥

यद्यन्ते निष्प्रकारा धीर्ब्रह्माऽन्यस्य न बाधनम् ।
यद्यन्ते सप्रकारा धीर्ब्रह्माऽन्यस्य न बाधनम् ॥ ७२० ॥

किं च चरमज्ञानं बाधकाभिमतं निष्प्रकारं सप्रकारं वा । नाद्य इत्याह **यदीति** निष्प्रकारकस्य साधनबाधनाक्षमत्वात् । भ्रमाविषयविशेषविषयकत्वमेव बाधकत्वे तन्त्रम् । न द्वितीय इत्याह **यदीति** चरमज्ञानस्य प्रमात्वेन तद्विषयस्य प्रकारस्य सत्यत्वापत्त्या ब्रह्मान्यस्य सर्वस्य बाधासिद्धेः ॥ ७२० ॥

अतो बोधाद्धि सर्वस्य बाधं युक्तिरपाकरोत् ।
अबोधादेव बाधोक्तिरिति वक्ति ततस्सुधीः ॥ ७२१ ॥

अतः पक्षद्वयेऽपि दोषस्योक्तत्वात् । **अबोधात्** तवाज्ञानादेव । **सुधीः** तत्त्ववादी ॥ ७२१ ॥

ज्ञानेनाज्ञानस्य नाशे तदुपादानकं जगत्।
नश्येच्चेन्न ह्ययं बाधो नाशोऽयं घटनाशवत्।
अनित्यतैव तेन स्यान्मिथ्यात्वं निर्निबन्धनम्॥ ७२२ ॥

अथ ज्ञानेन बाधो नाम नाश इत्यभिप्रेयते तर्हि सुतरां सत्यत्वं सेत्स्यतीत्याह **ज्ञानेनेति**। **अज्ञानस्येति**। ज्ञानमज्ञानस्यैव निवर्तकमिति नियमात्। तर्हि बाध इत्यपार्थकं वचः इत्याह **नाश इति**। विमतः, नाश एव, उपादाननाशपूर्वकत्वात् कपालनाशजन्यघटनाशवत् इति प्रयोगः अभिप्रेतः ॥ ७२१ ॥ ७२२ ॥

नाशानन्तरनास्तित्वबोधो घटपटादिके।
नष्टे तन्नास्तिताबोधसमो मिथ्या ततोऽपि न ॥ ७२३ ॥

नास्तिताबोधः ध्वंसविषयकः नाशावन्तरनास्तिताबोधत्वात् तथाविध-घटादिनास्तिताबोधवत्। तथा च न मिथ्यात्वमित्याह **नाशेति** ॥ ७२३ ॥

प्रध्वंसाभावबोधोऽसौ न मिथ्यात्वस्य वेदनम्।
प्राङ्नास्तिताया बोधस्तु न तवापि ममापि न ॥ ७२४ ॥

नाशात् प्राक् अस्तीति बोध उभयसंमत इत्याह **प्रागिति** ॥ ७२४ ॥

सत एव विनाशेन प्रा(क्सत्तै)क्सत्येव जगत्यभूत्।
अतो विषं महेशस्य कण्ठाभरणतामगात् ॥ ७२५ ॥

अतो दुरभिप्रायेणैव त्वयोक्तो नाशस्तत्त्ववादिनो मम सिद्धान्तभूत-सत्यत्वसाधनायैवाभूदिति साहित्यमुद्रयाऽऽह **महेशस्येति** ॥ ७२५ ॥

त्रिकालनास्तिताबोधो बाधोऽप्येतेन खण्डितः।
प्राक्सत्तानियमो यस्मान्नाशस्याखिलसंमता ॥ ७२६ ॥

अखिलेति ।यथाऽह मायिभाष्यकारोऽपि 'सत एव घटादेरुत्पत्तिर्विनाशो वा दृष्टः । नासतः शशविषाणादेरि'ति ॥ ७२६ ॥

कालत्रयेऽपि सत्ताया निषेधः कुत्र विद्यते ॥ ७२७ ॥

"बन्धबाध एवमुक्तिरिति चैन्नैवं श्रुतिसूत्रे वदतः 'तरति शोकमि'त्यादौ विपरीताभिधानादि"ति सुधोक्तमाह **कालत्रयेऽपीति** ॥ ७२७ ॥

न विद्यते द्वितीयं चेदद्वितीयाभिधं हि तत् ।
वर्तमाननिषेधोऽयं लटस्तत्रैव शासनात् ॥ ७२८ ॥

ननु 'एकमेवाद्वितीयमि'ति श्रुतौ अद्वितीयशब्दः कालत्रयनिषेधपर इति चेन्मैवम् । न विद्यते द्वितीयं यस्य इति खलु तत्र विग्रहः । तत्र लटा वर्तमाननिषेध एव प्रतीयते । प्रलयवर्णनपरत्वात् । अतीतानागतकालयोः सत्ता अनुमन्यत एव । 'विशिष्य निषेधः शेषविध्यनुज्ञापक' इति न्यायात् इत्याह **नेति** ॥ ७२८ ॥

अघटा भूमिरित्युक्ते किं भाव्यपि घटोऽत्र न ।
अत ईदृक्पदस्थो नञात्यन्ताभावबोधकः ॥ ७२९ ॥

'भावी' इत्युपलक्षणम् । **अतीतेत्यपि** ग्राह्यम् ॥ ७२९ ॥

सोऽपि यस्येति शब्दस्य वाच्यार्थे केवलं भवेत् ।
स्वस्वोपादानगानर्थान्समर्थान्किं निषेधति ॥ ७३० ॥

एवं यस्य इति यच्छब्दवाच्यब्रह्मणि विशिष्य निषेधे तदन्यत्र स्वस्वोपादानेषु कपालादिषु घटादिकार्यवस्तूनां सत्तामनुजानात्येवेत्याह **सोऽपीति** ॥ ७३० ॥

एकदेशनिषेधश्च न मिथ्यात्वप्रयोजकः ।
सन्नप्यर्थो न सर्वत्र क्वचिन्नास्त्यस्ति च क्वचित् ॥ ७३१ ॥

नेति किन्तु परिच्छिन्नत्वस्यैव । तदेवाह **सन्नपीति** ॥ ७३१ ॥

नेह नानेति वाक्यं च नानात्वं ब्रह्मणि क्षिपेत्।
जगत्त्रिकालसत्तां तन्न क्षिपेत्स्वस्वभूमिषु ॥ ७३२ ॥

'नेहनानेत्यागमोऽस्त्वत्र मानं इति चेन्न । तस्य ब्रह्मणि नानात्वनिषेधपरत्वात्' इति वादावल्युक्तं सपरिकरं विवृण्वन्नाह **नेति** नानाशब्दस्य भावप्रधानत्वपक्षे **इह** ब्रह्मणि सगुणे नानावतारे च किञ्चन गुणक्रियाऽऽदिप्रतियोगिकः स्वगतो भेदो नास्ति । 'यदेवेह तदमुत्र, यदमुत्र तदन्विह' इति श्रुतेः । **क्षिपेत्** निराकुर्यात् । **भूमिषु** प्रमाणसिद्धाधिकरणेषु । परस्परप्रतियोगिकपारमार्थिकभेदशून्यस्वैकदेशप्रतियोगिकपारमार्थिकभेदशून्यतां न बोधयतीत्यर्थः । इदमत्रावधेयम् । विशिष्य निषेधन्यायेन इह भेदो नास्तीत्युक्तौ अन्यत्र भेदसद्भावोऽवगम्यते ! भेदो नास्तीति निषेधे गुणक्रियाऽवयवादयः सन्ति । किन्तु तेषां परस्परं परमात्मनो वा भेदो नास्तीति ज्ञायते । तदुक्तं 'एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावती'ति । किंचनेति भेदसामान्यनिषेधेन भेदाभेदपक्षो निराक्रियते । एवं गुणक्रियाऽवयवादिप्रतियोगिकानेकभेदनिषेधार्थः किञ्चनशब्दः । भवितृप्राधान्यनिर्देशपक्षेऽपि नाना भिन्नं किंचन गुणकर्मादिकं नास्ति इत्येवार्थः । किंचन शब्दः प्रकृतगुणकर्मादिधर्मपर एव सर्वनामशब्दत्वात् । तदुक्तं न्यायामृते 'वाक्यशेषस्थधर्माख्यविशेषे पर्यवस्यति । किंचनेति हि शब्दोऽयमक्ताशब्दो घृते यथा' इति । भिन्नधर्मा न सन्तीत्युक्तौ विशेष्याणां धर्माणां प्रमितत्वेन निषेधायोगेन विशेषणस्य भेदस्यैव निषेधः पर्यवस्यति । धर्माणां स्वरूपेण निषेधाभिप्राये नानेतिशब्दो निरर्थकः स्यात् । यद्वा नानाशब्दो विनाऽर्थकः । 'नाना विष्णुं मोक्षदो नास्ति देवः' इति प्रयोगात् । तथा च किंचनशब्दस्य प्रपञ्चार्थकत्वेऽपि प्रपञ्चो ब्रह्मणाऽविनाभूत इत्येवार्थः । यद्वा प्रलये प्रपञ्चो ब्रह्मणि नास्ति इत्युक्तौ, लटा तदानींतननिषेध एव ज्ञाप्यते सृष्टिस्थित्योस्तत्सद्भावोऽनुज्ञायत एव । एतदप्युक्तं **स्वस्वभूमिषु इति**। सृष्टिस्थितिकालयोः स्वस्वाधिकरणे सत्तां नैव निषेधतीत्यर्थः । यद्वा जगति नाना कुवादिकल्पितः किंचन अप्रामाणिक आकारः, सदसद्विलक्षणत्वं सप्तभङ्गी स्वातन्त्र्यं परमाणुपुञ्जरूपत्वं इत्यादिकं नास्तीत्यर्थः । एतदप्युक्तं सत्तां न क्षिपेत् किन्तु अप्रामाणिकमाकारमेव क्षिपेदिति । किं चेदं पराभिमतप्रपञ्चाभेदभ्रमस्य न बाधकम् । नात्र ब्रह्म जगताऽभिन्नं नेति ज्ञाप्यते किन्तु ब्रह्मणि भिन्नं जगन्नेत्येव । तथा

चाभेदभ्रमः स्थिरीकृत एव स्यात् म तु बाधित इत्यवगन्तव्यम् । एतदप्युक्तं नानात्वं क्षिपेत् नत्वभेदं येन बाधकं स्यादिति भावः । यद्वा ब्रह्मणि भिन्नं किंचन जगन्नास्ति किन्तु सर्वमपि अस्तीत्यर्थः । यद्वा अतीतानागतः प्रपञ्च इदानीं नास्तीत्युक्ते सत्कार्यवादोऽप्यनेनैव निरस्तो ध्येयः ॥ ७३२ ॥

असङ्गिनि च सद्विश्वं नास्तीत्यपि निगद्यते ॥ ७३३ ॥

'ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि' इति भागवतोक्तासङ्गित्वेनापि जगतो भगवति विद्यमानस्यापि नास्तित्वरूपं श्रुत्यर्थं घटयति **असङ्गिनीति** । यथोक्तं तत्रैव तात्पर्ये 'सर्वं परे स्थितमपि नैव तत्रेति भण्यते । यतो हरेर्न जीवेन जीवनं न हरौ ततः । जीवः प्रकृतिरप्यत्र यतो नैव हि बन्धकृत् । कर्म चाफलदातृत्वात् कालश्चा-परिणामनात्" इत्यादि ॥ ७३३ ॥

मया ततमिदं विश्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ७३४ ॥

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
योगैश्वर्यबलादेतन्न तु मिथ्यात्वतः किल ॥ ७३५ ॥

उक्तार्थे गीतां संवादयति **मयेत्यादिभ्याम्** । अस्यार्थो विवृतो गीताविवृतौ 'त्वगिन्द्रियेण तं ज्ञात्वाऽन्योन्यधर्मसंक्रान्तिमासाद्य न तिष्ठन्ति भगवतः प्राकृतस्पर्शरहितत्वात्' इति ॥ **योगः** स्वरूपसामर्थ्यम् ॥ ७३४ ॥ ७३५ ॥

इति कृष्णस्य वचनान्न तन्मिथ्यात्वकारणम् ॥ ७३६ ॥

तत् श्रुत्युक्तं नास्तित्वम् । **किल** प्रसिद्धम् । श्रुतिस्मृतिभ्यामेव गत्यन्तर-कथनादिति भावः ॥ ७३६ ॥

अतस्तद्बाधपरशोरयो लोकत्रयेऽपि न ।
सिद्धं तु शाखाछेद्येव मूलच्छेदः कथं वद ॥ ७३७ ॥

तद्बाधपरशोः विश्वमिथ्यात्ववादस्य । **अयः** साधकम् । **लोकत्रयेऽपि** प्रस्थानत्रये अन्विष्यमाणेऽपि । विश्वं सत्यं इति श्रुत्या, उक्तगीतावाक्यैः, वैधर्म्याच्च न स्वप्नादिवत् इत्यादि सूत्रैः खण्डितत्वात् । **शाखा** आपातार्थः । **मूलं** तत्त्ववादः ॥ ७३७ ॥

तत्त्रिकालेऽपि नास्तित्वं न श्रौतं नोपयोगि च ।
नाशस्यास्य च बाधस्य परस्परविरोधतः ॥ ७३८ ॥

न च वाच्यं ईश्वरवन्नित्यया श्रुत्या नास्ति किंचनेति निषेधे नास्तित्वं सार्वकालीनमेव सेत्स्यति न वर्तमानमात्रकालीनमिति । 'न वेदा न वर्णाश्रमाचारधर्माः' इति वेदमिथ्यात्ववादिना त्वया तन्नित्यत्वानङ्गीकारात् । अङ्गीकारे च तत्रैव श्रुत्यर्थमिथ्यात्वस्य भङ्गापत्तेः । तेनैव न्यायेन श्रौतसत्यत्वादीनामपि त्रैकालिकत्वसिद्धेः । प्रमाणविरोधे श्रुत्यादीनां प्रमाणानुगुणार्थान्तराङ्गीकारस्य न्यायप्राप्तत्वात् । तदेतदाह **न श्रौतमिति** श्रुतितात्पर्यविषयो नेति भावः । इह ब्रह्मणि यत् **नाना** बहुचित्रं जगदस्ति, तत् **न,** ब्रह्मणो भिन्नं इति योजनोपपत्तेः । नञो भिन्नेत्यर्थवाचित्वेनाभिधानसिद्धत्वात् । **नोपयोगि** । तुष्यत्वितिन्यायेनाभ्युपगमेऽपि त्वदभिलषितस्य 'अज्ञानस्य स्वकार्येण सह ज्ञानेन निवृत्तिर्बाध' इति त्वया निरुक्तस्य ज्ञाननाश्यत्वरूपमिथ्यात्वस्य साधनं उपयोगं नावहतीति भावः । निवृत्तेः सत्त्वनियतत्वात् सत्त्वासत्त्वयोश्च परस्परविरहव्यापकत्वेनैव प्रमितत्वादिति भावः ॥ ७३८ ॥

व्यावहारिकसत्त्वं तु नास्त्वित्वापरनाम हि ॥ ७३९ ॥

ननु न प्रमाणविरोधेन प्रतीतार्थप्रच्यावनम् । तेषां व्यावहारिकसत्यमात्रप्रतिपादकत्वात् । अनया श्रुत्या च पारमार्थिकसत्त्वस्य निषेधादिति इति वाच्यम् । निर्मूलत्वात्कल्पनायाः । 'बाध्यविषये च व्यावहारिकमित्यस्याद्वैति- परिभाषामात्रसिद्धत्वादि'ति अद्वैतिभिरङ्गीकारेण प्रमाणान्तरैर्व्यावहारिकसत्त्वोक्तौ तेषां अप्रामाण्यस्यैवापातात् । सर्वाभ्युपगतव्यवहारनिर्वाहकत्वरूप- व्यावहारिकत्वोक्तौ

श्रुतीनां वैयर्थ्यप्रसङ्गात्। 'अप्राप्ते शास्त्रमर्थवदि'ति न्यायात्। तदेतदाह **व्यावहारिकेति** ॥ ७३९ ॥

सत्तानिषेधे सत्येव या सा भ्रान्तौ प्रतीयते।
तदाऽस्तित्वकथा शुक्तिरूप्यास्तित्वकथोपमा॥ ७४० ॥

अस्तित्वकथा कथामात्रम्। न हि इतोऽन्यत् शशशृङ्गादेरपि असत्त्वमस्ति। **कथोपमेति**। बाधविलम्बः नासत्त्वप्रतिक्षेपकः इति भावः ॥ ७४० ॥

नाशो न चेदयं बाधो जगत्प्रत्येव संभवेत्।
अज्ञानस्यैव विज्ञानं विरोधीति गतं तदा ॥ ७४१ ॥

ननु ज्ञाननाश्यत्वं नाम ज्ञानबाध्यत्वमेवाभिमतं चेत् तर्हि ज्ञानेन साक्षादेव बाधसंभवे अज्ञानद्वाराश्रयणं निरर्थकं इत्याह **नाश इति** ॥ ७४१ ॥

सोऽपि त्रिकालसत्ताया निषेधः स्यान्न चापरः।
स तु न श्रूयते क्वापीत्युक्तं तत्कुत्र बाध्यता ॥ ७४२ ॥

बाधपक्षे पूर्वोक्तं अश्रौतत्वं दोषं स्मारयति **न श्रूयत इति** ॥ ७४२ ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ ७४३ ॥

इत्यादिवाक्यैर्बन्धस्य पुण्यपापादिकर्मणाम्।
अज्ञानस्य च विज्ञानाच्छ्रुतो नाशो न चापरः।
अतस्सर्वजगन्नाशो ज्ञानेनेत्यतिसाहसम् ॥ ७४४ ॥

नाश एव न बाध इत्यभिनीय दर्शयति **भिद्यत इति**। श्रुतोऽपि नाशः बन्धकारणमात्रस्याज्ञानादेः न तु सर्वजगत इत्याह **न चापर** इति ॥ ७४३ ॥ ७४४ ॥

इदानीं नष्टनानार्थनाशोऽन्ते ज्ञानतः कथम्।
प्रागेव नास्तिता तस्य यतस्सर्वस्य संमता ॥ ७४५ ॥

'अज्ञानस्य स्वकार्येण प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाधः' इति बाधलक्षणे 'प्रविलीनेन सह' इत्यंशं अपहसति **इदानीन्तनेति** नष्टस्य ब्रह्मज्ञानेन पुनर्नाशो वा, पुनः पूर्वं ज्ञातस्य नाशज्ञानं वा । नाद्यः इत्याह **प्रागेवेति** ॥ ७४५ ॥

अतो नास्तित्वबोधोऽन्ते कथमस्येति चिन्त्यते ।
अनुवादितया वाक्यममानं स्याद्धि तेषु ते ॥ ७४६ ॥

न द्वितीयः बाधबोधकवाक्यस्य ज्ञानज्ञापकत्वेनाप्रामाण्यापत्तेरित्याह **अनुवादितयेति** ॥ ७४६ ॥

किन्तु प्रलयकालीनवह्न्यर्काद्यैर्जगत्क्षयः ।
मुद्गरादिकुठाराद्यैर्मध्ये मध्येऽर्थनास्तिता ॥ ७४७ ॥

तव बाधकज्ञानस्य न जगन्नाशकत्वम् । नाशस्य हेत्वन्तरेणैव सिद्धेरित्याह **किन्त्विति** । तदुक्तं सुधायां 'किन्तु मुद्गरप्रहारादिना घटस्येव ईश्वरस्य ज्ञानेच्छाप्रयत्नव्यापारैर्विनाश एवे'ति ॥ प्रलये नाशदर्शनमपि यथायथं प्रतियोगिग्राहकप्रमाणैरेव न तु पुनः त्वदुक्तप्रणाड्या ब्रह्मज्ञानेनेति भावः ॥ ७४७ ॥

तच्छिन्नमूलशाखाग्रो मिथ्यावादाख्यपादपः ।
न फलाय न पत्राय न च्छायायै भवेत्तव ॥ ७४८ ॥

छिन्नेति निराकरणेनाभासीकृतेत्यर्थः । **मूलं** साधकाभिमतश्रुत्यादिमानस्वरूपम् । तेषामप्यग्रतो मिथ्यात्वापातेन वन्ध्यासुतवचस इव स्वरूपासिद्धहेतूनामिव चासाधकत्वात् । अग्रच्छेदो नाम वाक्यानां पूर्वोत्तरविरोधेन प्रमाणान्तरविरोधेन त्वदभिमतार्थाप्रतिपादकत्वम् । अनुमानानां व्याप्त्याद्यङ्गवैकल्यम् । **न फलायेति** । वन्ध्यासुतेन मरुमरीचिकया पोषितगन्धर्वनगरवृक्षस्येव स्वरूपत एवाभावादिति हृदयम् ॥ ७४८ ॥

इदानीं बाध्यरजताधिकसत्ताश्रयत्वतः ।
भेदो ब्रह्मगुणा विश्वं ब्रह्मवत्परमार्थसत् ॥ ७४९ ॥

पूर्वोक्तं प्रातिभासिकेतरत्वरूपं पारमार्थिकत्वसाधकं हेतुं स्मारयति **इदानीमिति** ॥ ७४९ ॥

देहात्मनोरेकता च नभोनैल्यं च ते मते ।
यत्प्रातिभासिकं सर्वं तद्धेतुर्न विपक्षगः ॥ ७५० ॥

बाध्यं यच्छुक्तिरूप्यादि तदद्यैव हि बाध्यते ।
नभोनैल्यं च तत्रत्यैर्न नीलमिति बाध्यते ॥ ७५१ ॥

मम देह इति नभो न नीलमिति च प्रमयेदानीमेव बाधात् न देहात्मैक्यादौ व्यभिचारः । तत्र हेत्वभावादेव । शुक्तिरूप्ये तु प्रातिभासिकत्वं तेनैवाङ्गीकृतम् । **तत्रत्यैः** प्रत्यक्षतो नैल्याभावं पश्यद्भिः । अत्रत्यस्य तु तत्रत्यस्य प्रत्यक्षमूलकेनाप्तवाक्येन बाधः । न सर्पथा केवलागमेनेति भावेनाह **नभ इति** ॥ ७५१ ॥

आकाशे नीलिमोदेतीत्यादिवेदोक्तितस्तु तत् ।
अबाध्यमेव वा नैल्यं नोभयत्रापि न क्षतिः ॥ ७५२ ॥

व्युत्पादितं प्रातिभासिकत्वं अव्याकृताकाशे प्रतीतनैल्यस्य । भूताकाशनीलिम्नस्तु श्रुतिसिद्धत्वात् योगिप्रत्यक्षगम्यत्वाच्च पारमार्थिकत्वमेवेति न तत्र व्यभिचारप्रसङ्ग इत्याह **आकाश इति** । **नः** तत्त्ववादिनाम् । **क्षतिः** उक्तानुमानस्य व्यभिचारः ॥ ७५२ ॥

देहोऽहमिति विज्ञानं न हि कस्यापि देहिनः ।
नाहं देह इति ज्ञानं सर्वेषामपि सर्वदा ॥ ७५३ ॥

मम देह इति प्राहुस्सर्वेऽपि कथमन्यथा ।
देहात्मैक्यभ्रमस्येत्थमवकाशो न विद्यते ॥ ७५४ ॥

गौरोहमित्यादिवाक्च गौराद्यङ्गेऽभिमानतः।
अहंताया व्यवहृतिरुपचारेण केवलम्।
न हि सिंहात्मकं मर्त्यं वक्ति वागौपचारिकी॥ ७५५ ॥

'अहं गौरः' इति व्यवहारः सिंहश्चैत्रः, कृष्णं वस्त्रं इत्यादिवदुपचारमात्रत्वात् न तथाविधप्रतीतिसाधक इत्याह देह इत्यादिभिः ॥ ७५३ ॥ ७५४ ॥ ७५५ ॥

यतोऽस्ति पुत्रे मित्रादौ वित्ते वाऽतिप्रिये नृणाम्।
नष्टे नष्टोऽहमिति वाक्तुष्टे तुष्टोऽहमित्यपि ॥ ७५६ ॥

उपचारमेव सुस्पष्टैर्निदर्शनैर्द्रढयति पुत्र इत्यादिना ॥ ७५६ ॥

अतो बाध्यस्य सर्वस्य बाधोऽद्यापि हि विद्यते ॥ ७५७ ॥

बाध्यस्य संप्रतिपन्नभ्रान्तपदार्थस्य प्रातिभासिकरूप्यादेः। **अद्यापि** ब्रह्मज्ञानेतरेण तत्प्रागेव ॥ ७५७ ॥

अनादिकालतस्सर्वं दृश्यते जगदीदृशम्।
बाधो न लभ्यते सर्वमस्तीत्यद्यापि वीक्ष्यते ॥ ७५८ ॥

जगदीदृशमिति। तदुक्तं तत्त्वोद्योते 'न क्वाप्यनीदृशं विश्वं तत्तत्कालानुसारत' इति ॥ ७५८ ॥

यो नास्त्यत्रास्ति सोऽन्यत्र गृहे नास्त्यस्त्यसौ बहिः।
सर्वत्र सर्वदेदं तु नास्त्यवेति क्व धीर्वद ॥ ७५९ ॥

किञ्चायं निषेधः एकदेशकालप्रतिपन्नस्य कालान्तरादौ चेत् रीत्यन्तरेण परिच्छिन्नत्वं अनित्यत्वं वोक्तं भवति। त्रिकालाखिलदेशनिषेधस्तु नास्त्येव। नित्यसर्वगतयोः कालाकाशयोस्तादृशनिषेधप्रतिज्ञाने व्याघातश्चेत्याह य इति ॥ ७५९ ॥

अनादितोऽनुवृत्तेन सत्त्वेन सहितं जगत्।
न भाविबाधबाध्यं स्याद्ब्रह्मवत्परमार्थसत् ॥ ७६० ॥

अनादित इति। यथोक्तं 'यथेदानीं तथा चाग्रे पश्चादप्येतदीदृशमि'ति। गीतायां च 'न चैव न भविष्यामः सर्वे वयमतः परमि'ति ॥ ७६० ॥

अनुवृत्तिरनुच्छेदस्सत्ता चास्तीति वेद्यता।
तदा तदास्तीति बुद्धिर्यन्नष्टेष्वपि विद्यते ॥ ७६१ ॥

'न च तस्योत्तरकालीनबाधाभावाग्राहकत्वमिति वाच्यम्। तदानीमबाध्यताग्रहणेनैव तत्सिद्धेरि'ति वादावलीं हृदि कृत्वाऽऽह **तदेति** ॥ ७६१ ॥

शब्दमात्रेण दृष्टोऽर्थो नान्यथीक्रियते बुधैः।
प्रवाहयन्ति किं तीरं मञ्चं सञ्चारयन्ति किम् ॥ ७६२ ॥

प्रत्यक्षसिद्धस्य शब्दबाध्यत्वेऽतिप्रसङ्गमवाह **प्रवाहेति मञ्चेति च**। तदुक्तं भगवत्पादैः 'न हि प्रत्यक्षसिद्धमन्येन केनापि बाध्यं दृष्टमि'ति ॥ ७६२ ॥

एकाभावेऽपरां वृत्तिमाश्रित्य तमबाधितं।
अर्थे प्रवर्तयन्ति स्म दृष्टं मार्ष्टुं हि कः क्षमः ॥ ७६३ ॥

तं आप्तवाक्यम्। तदुक्तं भगवत्पादैः 'वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना। इतराणि विरुद्धानि प्रलम्भभ्रमजान्यपि' इति ॥ ७६३ ॥

अतोऽबाधितमेवास्तु विश्वं सर्वसुखप्रदम्।
वाक्यं च प्रतिवाद्युक्तरीत्याऽर्थं प्राप्य जीवतु ॥ ७६४ ॥

सुखप्रदं सज्जनानामिति शेषः। **वाक्यं** सदागमवाक्यम्। **प्रतिवादी** तत्त्ववादी। **जीवतु** मानं भवतु ॥ ७६४ ॥

लोकमर्यादया रुद्धा न स्युश्चेद्वाक्यमूषिकाः।
एको देवालयं गच्छेदन्यो देवस्य मस्तकम्।
असदेवेदमग्रेऽभूदिति वाङ्नास्ति किं श्रुतौ ॥ ७६५ ॥

मर्यादया 'पूर्वोत्तराविरुद्धः प्रमाणान्तराविरुद्धश्च शास्त्रार्थः' इत्येवंरूपया। **मूषिकाः** क्वचिन्नानार्थकत्वेन कुत्रचिद्वृत्यन्तरैः कुत्रचित् पदच्छेदनिर्वचनादिवैचित्र्येण विरुद्धार्थप्रतिपादनावकाशवत्त्वेन प्रत्यक्षवत् नियतसञ्चाररहिताः। **एकः** 'सत्यं ज्ञान'मित्यादिरूपः वेदः। **देवालयं** ब्रह्मणः सत्यत्वं **गच्छेत्** बोधयेत्। **अन्यः** असदेवेत्यादिरूपः। **मस्तकं** छेत्तुमिति शेषः। देवस्य सत्यत्वमेवापलपेदिति यावत् ॥ ७६५ ॥

घटो नेति निषेधे तु बाधस्ते नैव सिद्ध्यति।
प्रध्वंसप्रागभावाभ्यामपि नेत्युक्तिसंभवात् ॥ ७६६ ॥

कल्प्यमानमपि बाधकं किं घटो नेत्याकारकः, उत घटः सत्यो न इत्येवंरूपः। आद्यो न मिथ्यात्वसाधकः। ध्वंसप्रागभावबोधस्यापि संभवात्। इत्याह **घट इति** ॥ ७६६ ॥

सत्यो नेति निषेधे तु बाधोऽयं स्यान्न चान्यथा।
तादृङ्निषेधो नैवास्ति वेदे वा वैदिकेषु वा ॥ ७६७ ॥

द्वितीयस्तु अनुपलंभान्नास्त्येवेत्याह **सत्य इति** ॥ ७६७ ॥

किन्त्वद्वितीयं नेहास्तीत्याकारः परमस्त्यसौ।
तस्मान्न वर्तमानस्ते बाधोऽयं श्रूयते क्वचित् ॥ ७६८ ॥

नेहनानास्तीत्यादिवाक्येष्वाद्यैव गतिरित्याह **किन्त्विति** ॥ ७६८ ॥

भाविबाधकशङ्कायाः किं कारणमुदीरय ॥ ७६९ ॥

किं कारणमिति प्रत्यक्षविरोधो वा अनुमानागमविरोधो वा । न द्वितीयः । तयोः प्रत्यक्षबाधनासामर्थ्यात् । नाद्यः । सत्यः स्तंभो भवत्येवेति तेन सत्यत्वस्यैवावधारणात् ॥ ७६९ ॥

बाधशङ्का तु मिथ्यात्वशङ्कां कुर्यान्न निश्चयम् ।
न चेत्तयैव सच्च स्याद्यत्सा
को(ट्योर्वि)ट्यविरोधिनी ॥ ७७० ॥

अस्तु वा शङ्का । तथाऽपि तावन्न मिथ्यात्वनिश्चय इत्याह **बाधेति** । शङ्कयाऽप्यन्यतरकोटिनिश्चये तयैव सत्यत्वनिश्चयोऽप्यस्तु इत्याह **न चेदिति** ॥ ७७० ॥

त्रैकालिकनिषेधोऽपि न स्वरूपेण ते मते ।
नृशृङ्गवदसत्त्वाप्त्या ततस्सत्त्वनिषेधनम् ।
बाधोऽवश्यं त्वया वाच्यस्स तु
न श्रूयते क्वचित् ॥ ७७१ ॥

ते मत इति निःस्वरूपत्वेन शून्यमतप्रवेशभियेति भावः । **सत्त्वनिषेधनम्** । पारमार्थिकत्वाकारेण निषेधः । **न क्वचिदिति** । नेहनानास्तीत्यादिषु तद्बोधकपदाभावात् ॥ ७७१ ॥

किञ्च त्रिकालनास्तित्वं बाधः किल भवन्मते ।
नास्त्यद्वितीयमित्यादौ वर्तमानार्थकोऽस्ति लट् ।
न विद्यते द्वितीयं च यस्य तद्ध्यद्वितीयकम् ॥ ७७२ ॥

न केवलं पारमार्थिकत्वनिषेधकपदाभावः, किं नाम त्रैकालिकनिषेध-बोधकपदमपि नास्तीत्याह **किञ्चेति** । तदेव विग्रहप्रदर्शनेन स्फोरयति **न विद्यत इति** ॥ ७७२ ॥

अतो द्वेधाऽपि बाधस्ते श्रुतेर्हृदयशोधने।
नास्ति तद्बाध एवायं नाभूदस्ति भविष्यति ॥ ७७३ ॥

अतः पारमार्थिकत्वेनेति वा त्रैकालिकेति वा निषेधस्य विशेषणस्य क्वाप्यश्रवणात् ॥ ७७३ ॥

न हीदानीं वर्तमानवेदादन्योऽपि कश्चन।
भविष्यन्नास्ति ते वेदो बाधोऽयं यत्र गीयते ॥ ७७४ ॥

भविष्यन्नास्ति इति। वेदानां अनादिनित्यादिति भावः ॥ ७७४ ॥

निर्विकल्पकरूपैव चरमापि प्रमा तव।
न तत्र नास्तिताबोधो बाधोऽतः क्व भविष्यति ॥ ७७५ ॥

विमता जगती सेयं सत्यैव परमार्थतः।
अबाध्यत्वाद्यथा ब्रह्मेत्यनुमा तन्न बाध्यते।
त्रेधापि बाधायोगेन बाधायोग्यं यतो जगत् ॥ ७७६ ॥

निर्विकल्पेति। हेतुगर्भम्। अबाध्यत्वात् बाधायोग्यत्वात्। असिद्धिं परिहरति त्रेधाऽपीति ॥ ७७५ ॥ ७७६ ॥

विश्वं सत्यमिति स्पष्टं सत्यत्वं गर्जति श्रुतिः।
विश्वं मिथ्येति विस्पष्टं मिथ्यात्वं कुत्र कथ्यते ॥ ७७७ ॥

स्पष्टमिति विद्यारण्येनापि सत्यमित्यस्यानारोपितमिति व्याख्यानादिति भावः ॥ ७७७ ॥

तिलानुन्मथ्य कस्तैलं घृते सत्यपि साधयेत्।
किं श्रौतसत्यतां त्यक्त्वा मिथ्यात्वायोक्तिपीडनैः ॥ ७७८ ॥

तिलान् सिकतासु आरोपितानिति हृदयम्। घृतं तिरस्कृतम्। तैलस्याप्यलाभः। परस्य नैराश्यं परमं सुखमिति ध्वनिः। यदग्रे स्वयमेव वक्ष्यति शिलानामेव पेषणमिति ॥ ७७८ ॥

श्रौतोऽर्थो मे तवाऽऽर्थार्थश्रुत्यै वृत्त्यन्तरं दिशेत्।
यत्पृथ्वौरसपुत्रस्य दत्तपुत्रस्तु दत्तभुक् ॥ ७७९ ॥

श्रौतः स्वरसतया वृत्तिमहिम्नैव लब्धः। श्रुतेः औरसपुत्रसमः। **आर्थार्थः** तत्त्वमस्यादिश्रुतीनां जीवब्रह्मैक्यमविद्यमानमेवार्थं परिकल्प्य तदन्यथाऽनुपपत्त्या कल्प्यमानः विरुद्धगुणमिथ्यात्वरूपोऽर्थः। अत एव बलादानीतो दत्तपुत्र इव पित्र्यधनस्यानर्हः। श्रुत्यै ऐक्यश्रुत्यै। **अर्थान्तरं** सादृश्याद्यैक्यरूपम्। पृथु औरसपुत्रस्य इति पदविभागः। **पृथु** पितुः सर्वस्वं धनम्। **दत्तभुक्** तदविरोधेन तेनापवर्जितभैक्ष्यान्नभुक् ॥ ७७९ ॥

किञ्चेदं ते तिलाकारशिलानामेव पेषणम्।
यतो यत्नेपि महति मिथ्यात्वं न श्रुतिर्जगौ ॥ ७८० ॥

दृष्टान्तं स्पष्टयति **किं चेति**। आक्षेपकं स्वरूपैक्यमेवाप्रमितं शिलाशकलारोपिततिलोपमम्। आक्षेप्यं मिथ्यात्वं प्रमाणविरुद्धम्। अनुपपादकं च। स्वरूपभूतानां विरुद्धधर्माणां निषेधे जीवेश्वरस्वरूपयोरेवाभावापत्त्या कयोरैक्यं श्रुतिर्वदेदिति भावः। अतोऽङ्गविकलोऽयमर्थापत्त्याभासः ॥ ७८० ॥

असन्नासीदिति व्यर्थं य(द)द्यसत्सर्वथाऽप्यसत्।
स्वरूपकीर्तनेनैव तदसत्त्वस्य सिद्धितः।
सत्त्वप्रसक्त्यभावाच्च व्यर्थं तस्य निषेधनम्॥ ७८१ ॥

'नासदासीन्नो सदासीत्तदानीं' इति श्रुतिः सदसन्निषेधकालीनावस्थितिं तमःशब्दिताज्ञानस्य प्रतिपादयति। तेन अज्ञानस्य सदसद्विलक्षणत्वरूपमिथ्यात्वं पारिशेष्येण सिध्यतीति परस्याशां विफलयति **असदित्यादिना**। 'न च भावाभावविलक्षणं क्वचिदागमो वक्ति' इति तत्त्वोद्योतवचनमनुरुध्याह **असदिति**।

असदिति शब्देनैव अविद्यमान इत्यर्थलाभे पुनर्नासीदिति निषेधस्तव व्यर्थ इति भावः ॥ ७८१ ॥

यदीदानीं (तत्तु तु) न तत्तुच्छं तदानीं किं निषिध्यते ।
तदानीं नेति वचनमिदानीं सत एव हि ॥ ७८२ ॥

सर्वथाऽविद्यमानस्य तदानीमिति कालविशेषे विशिष्य निषेधोऽप्ययुक्त इत्याह **यदिति**। इदानीं सत्त्वानुज्ञापकत्वात्तव प्रतिकूलश्चेत्याह **तदानीमिति** ॥ ७८२ ॥

अनुवादकवाक्यं ते स्वार्थस्यासाधकं किल ।
सर्वसिद्धानुवादोऽयं कमर्थं साधयेत्तव ।
यत्प्रसिद्धा वायुरन्तरिक्षं चासदिति श्रुतिः ॥ ७८३ ॥

न च कुवादप्राप्तस्य प्रतिषेधः। असदस्तीति वादिन एवाभावादित्याह **सर्वेति**। तथा चैषोऽनुवादस्तव मते श्रुतेरप्रामाण्य एव पर्यवस्यति ॥ श्रुतेः प्रमाणानुगुणमर्थं स्वमतेनाह **यदिति**। 'यदन्यद्वायोरन्तरिक्षाच्चैतत्सदि'ति माध्यन्दिनश्रुतेः। वाय्वन्तरिक्षौ अव्यक्तत्वादसदिति भावः ॥ ७८३ ॥

अतः श्रौतमतज्ञत्वं युक्तिज्ञत्वं च बालिशे ।
यदसत्तत्तवाऽप्यद्धा नासीदित्याह सा श्रुतिः ॥ ७८४ ॥

एवं सत्यपि प्रमाणविरोधे तदविगणय्य दुराग्रहवशो यदि त्वं श्रुतेः सदसद्वैलक्ष्यरूपं अपार्थं परिकल्पयसि तर्हि श्रुत्यभिमानिनी देवता प्रकुपिताऽनेनैव वाक्येन त्वां निन्दतीत्याह **अत इति**। यत् लोके बालिशे मूर्खे श्रुत्यर्थज्ञानं युक्तिज्ञानं चोभयमसत् तत् तवापि मायावादिनः न आसीत् ॥ ७८४ ॥

सन्नासीदिति वा क्वाह सत्तेनेदं वचस्त्विति ॥ ७८५ ॥

अत एव दुराग्रहिणो तव इदं व्याख्यानं नो **सत्** समीचीनं नो आसीदिति ॥ ७८५ ॥

सच्छब्दार्थो जगच्चेत्स्यात्स्वान्यत्वं तर्हि सिद्ध्यति।
इष्टासिद्धिरबाध्यत्वरूपसत्त्वानिषेधनात् ॥ ७८६ ॥

नो सदासीदित्यंशस्य परपरिकल्पितमर्थान्तरमुपक्षिप्य तेनैव तं परिहसति **सदिति**। अयमाशयः। सन्निषेधकालीनावस्थितिमत्त्वेन त्वया सद्वैलक्षण्यं साधयितुं प्रक्रान्तम्। तत्र वक्तव्यं सच्छब्दार्थो जगद्वा ब्रह्म वा विवक्षितम्। नाद्य इत्याह **स्वान्यत्वं इति**। स्वनिषेधकालीनावस्थित्या स्ववैलक्षण्यमेव सिध्येत्। न तु अबाध्यवैलक्षण्यरूपं बाध्यत्वम्। तथा च त्वदिष्टासिद्धिः ॥ ७८६ ॥

सद्ब्रह्मैव भवेत्तस्माद्यद्वैलक्षण्यमीप्सितम्।
नासीत्तदा तच्च किल यद्ब्रह्म परमार्थसत् ७८७ ॥

द्वितीये ब्रह्मणो निषेध एव नो सदासीदिति वाक्यार्थो निष्पन्नः ॥ ७८७ ॥

हन्त मिथ्याऽभवद्ब्रह्म सत्यं जगदभूदिदम्।
यदावयोर्मते नास्ति निरधिष्ठानकभ्रमः ॥ ७८८ ॥

किं तत इत्यत आह **हन्तेति**। अधिष्ठानस्य ब्रह्मण एवासत्त्वे निरधिष्ठानभ्रमस्यानङ्गीकारात् जगत् सत्यमेवाभूदिति ॥ ७८८ ॥

अर्थान्नार्थान्तरं सिद्धमनर्थोऽयं महानभूत् ॥ ७८९ ॥

फलितमाह **अर्थादिति**। अर्थापत्तेः। **अर्थान्तरं** मिथ्यात्वम् ॥ **अनर्थः** जगतः सत्यत्वम् ॥ ७८९ ॥

नोसदासीदिदं वाक्यं परस्यानर्थकारकम्।
इत्येवाह श्रुतेरंशो द्वितीयोऽप्येव पूर्ववत् ॥ ७९० ॥

पूर्ववच्छ्रुतेः परिहासमाह **नो सदासीदिति** तव वाक्यार्थः न समीचीन इति पूर्ववदर्थः ॥ ७९० ॥

अन्तरिक्षाच्च वायोश्च यदन्यत्तत्सदित्यपि ।
यच्छ्रुतिस्स्वयमेवाह ततोऽप्येतदसङ्गतम् ॥ ७९१ ॥

परोक्तोऽर्थः सुस्पष्टश्रुतिविरुद्ध इत्याह **अन्तरिक्षादिति** ॥ ७९१ ॥

अहो बत महानेष प्रमादो धीमतामपि ।
यत्स्वोक्तवचनस्यार्थस्स्वेष्टब्रह्मविनष्टता ।
तमसस्त्वविनष्टस्य तदानीमवशिष्टता ॥ ७९२ ॥

धीमतां दुर्बुद्धिमतां **प्रमादः** उन्मादः बतेत्यपहासः । उक्तरीत्या नो सदासीदित्यस्य ब्रह्मनिषेधकत्वम् । तम आसीदिति अज्ञानस्यावशिष्टत्वं च वदता ब्रह्म मिथ्या, अज्ञानं तत्कार्यं जगच्च सत्यमिति स्वयमेव व्याख्यानात् स्वेष्टघातिता स्वानिष्टकारिता चेति अहो उन्मादविलसितमिति भावः ॥ ७९२ ॥

अतः श्रुत्यर्थकुशलो भारतीपतिरेव नः ।
अन्यस्तद्भृत्यभृत्यश्चेन्मान्यो भवति कश्चन ॥ ७९३ ॥

तद्भृत्यभृत्यः श्रीजयतीर्थार्यः । **मान्य** इति 'गुरुकारुण्यसरणिं प्रपन्ना मान्याः स्म' इत्युक्तेः ॥ ७९३ ॥

यदद्वैतपरं वाक्यं मिथ्यात्वमपि तेन ते ।
गौर्गोवत्सप्रसूरेव महिषाश्वप्रसूश्च किम् ॥ ७९४ ॥

अद्वैतपरं 'तत्त्वमसि' इत्यादिकम् । **तेन** वाक्येन । मिथ्यात्वं बोध्यते इति ते तव आशामात्रम् । तच्च विरुद्धमिति सदृष्टान्तमाह **गौरिति** । न ह्यक्षरबाह्यो वाक्यार्थो भवति इति भावः । न चानुपपत्त्या । तदभावादेव ॥ 'प्रत्यक्षादिविरोधे तु गौणार्थस्यापि संभवादि'ति भगवत्पादीयवचनात्सादृश्याद्यैक्यपरत्वेनाप्युपपत्तेः ॥ ७९४ ॥

दृष्टा दृष्टविरोधे तु वाक्यस्यान्यार्थतैव हि ।
आगोपालाविपालं च यद्दृष्टं दृष्टमेव तत् ॥ ७९५ ॥

दृष्टं निर्दोषप्रमाणसिद्धम्। सर्वज्ञत्वादिभेदकधर्मजातम्। **दृष्टमेव** त्वदविवक्षामात्रेण न त्यागार्हम् ॥ ७९५ ॥

यत्र मिथ्याप्रपञ्चस्य वाक्यैर्वेदान्तगोचरैः।
दृश्यमानमिदं सर्वमनित्यमिति चोच्यते ॥ ७९६ ॥

मिथ्योक्तेरन्यथागतिकथनाच्च न पराभिप्रेतोऽर्थ इत्याह **यत्रेति**। अनित्यमित्युपलक्षणम्। वृथात्वमित्यपि ज्ञेयम्। यथोक्तं न्यायामृते [१/३९ पृ.२८९] 'मिथ्यात्वोक्तिस्तु वृथात्वात्। 'मिथ्यैव व्यवसायस्ते' इत्यादिवत् सदोषत्वाद्वा' इति ॥ ७९६ ॥ ७९७ ॥

इति पाद्मे महेशेन त्रिंशाध्याये किलोदितम्।
अतो मिथ्येति वाग्विश्वस्यानित्यत्वं वदेत्परम् ॥ ७९७ ॥

यदि रूप्यस्य मिथ्यात्वे मिथ्या दृश्यत्वतो जगत्।
मेयत्वाद्धटवत्तर्हि घटोऽपि स्यात्पटस्तव ॥ ७९८ ॥

अत्तृत्वात्पशुवन्मन्द शृङ्गं स्यात्तव मस्तके।
पुरुषत्वान्मूकवत्ते मूकता स्याज्जितं परैः ॥ ७९९ ॥

बाधाबाधानुसरणे शिष्यस्त्वं प्रतिवादिनः।
बाधशङ्काख्यपङ्केन किं किं न स्याद्धि पङ्किलम् ॥ ८०० ॥

दृश्यत्वानुमानं आभाससाम्येन दूषयति **यदीति** 'सहदर्शनमात्रेण न व्याप्तिरवसीयते' इत्युक्तेः। मिथ्यात्वस्य सकलप्रमाणबाधात् नाभाससाम्यनिस्तार इत्याह **बाधेति** ॥ ७९७ ॥ ७९८ ॥ ७९९ ॥ ८०० ॥

क्षीरं पिबसि तृप्तस्य सुखं साक्षी प्रपश्यति।
स्वप्रसूः किल माता न कथं पिबसि निन्दसि ॥ ८०१ ॥

मिथ्यात्वं वदंस्त्वमेव स्ववाङ्मनसविसंवादं कुरुष इत्याह **क्षीरमिति**। यथाऽऽह स्वयमेव बौद्धमतखण्डनावसरे 'यथा हि कश्चित् भुञ्जानः, भुजिसाध्यायां तृप्तौ स्वयमनुभूयमानायामेवं ब्रूयात् नाहं भुञ्जे न वा तृप्यामीति —

कथमुपादेयवचनः स्यादिति [भे.प.ब्र.सू. २ भागः पु. ८] शां. भा. २ २-२८] ॥ ८०१ ॥

असत्त्वमेव मिथ्यात्वं मम सर्वस्य संमतम् ।
अपसिद्धान्तदोषेण न तत्साध्यं भवेत्तव ॥ ८०२ ॥

अन्यत्सदसतोरन्यदित्याद्यं सर्वमेव हि ।
ममाप्रसिद्धं तद्धेतुरप्रसिद्धविशेषणः ।
दृष्टान्तस्साध्यविकलः किं हेतुशतकेन ते ॥ ८०३ ॥

किं च साध्यं मिथ्यात्वं असत्त्वं चेदपसिद्धान्तः । असद्वैलक्षण्याङ्गीकारात् इत्याह **अप्रसिद्धेति** । स्वमतेन पक्षघटकं विशेषणमप्रसिद्धं स्यादिति भावः । न च वाच्यं प्रतिपन्नोपाधाविति विशेषणान्न दोष इति । 'का चेयं प्रतिपन्नता नाम । प्रमाणप्रतिपन्नता । भ्रान्तिप्रतिपन्नता वा । नाद्यः प्रमाणप्रतिपन्नस्य त्रिकालदेशनिषेधसाधनेऽतिप्रसङ्गात् । द्वितीये वक्तव्यं कोऽयं निषेधः । अभाववेदनं सद्विविक्तत्ववेदनं वा । नाद्यः अत्यन्तासत्त्वापातात् । न द्वितीयः । तस्यैवाद्याप्यनिरूपणात्' इति वादावल्युक्तदूषणेन दुष्टत्वात् । ननु मिथ्यात्वं नासत्त्वं येनापसिद्धान्तः किन्तु अन्यदेवेत्याशङ्क्य निराह **अन्यदिति** । तस्यैव विवरणं **सदसतोरन्यत्वाद्यमिति** । आद्यपदेन स्वात्यन्ताभावसामानाधिकरणत्वादिकं ग्राह्यम् । अप्रसिद्धं इति पररीत्या । स्वमते व्याघात एव दोषः । **दृष्टान्त इति** । तत्रासत्त्वस्यैव सत्त्वात् । **किमिति** व्याप्तिग्रहस्यैवासंभवादिति भावः ॥ ८०२ ॥ ८०३ ॥

परोक्षज्ञानमसति शब्दादस्तीति ते मतम् ।
तच्च खण्डपदं शक्तिग्रहे सत्येव बोधयेत् ।
शक्तसंबद्धमथवा नासंबद्धार्थबोधकम् ॥ ८०४ ॥

'न चार्थापत्त्याऽनिर्वचनीयसिद्धिः । असतः प्रतीतिं विना असद्वैलक्षण्यज्ञानासिद्धेः 'इति भगवत्पादोक्तिं समर्थयते **परोक्षज्ञानमसतीत्यादिना** । न तावदसतः

प्रतीतिरेव नास्ति इति वक्तुं शक्यम्। अज्ञाते धर्मिणि प्रतीतिविषयत्वरूपधर्मस्य निषेधायोगात्। यथोक्तं 'न ह्यज्ञाते धर्मिणि कस्यचिद्धर्मस्य विधानं वा निषेधो वा युज्यत' इति। येन पुंसा शशशृङ्गाभावो न निश्चितः तेन गोशृङ्गमस्तीति वाक्यादिव शशशृङ्गमस्तीति वाक्यादपि बोधस्यानुभवसिद्धत्वात्। अङ्गीकृतश्च परेणापि। यथाऽऽह 'अत्यन्तासत्यपि ह्यर्थे शब्दो ज्ञानं करोति हि। अबाधात्तु प्रमामत्र स्वतःप्रामाण्यनिश्चलामि'ति। करणानि ज्ञानजननायावश्यमर्थेन प्रत्यासत्तिमपेक्षन्ते। अन्यथाऽतिप्रसङ्गात् इत्याह **तच्चेति**। **खण्डपदमिति**। वाक्यघटकं वा वाक्यतुल्ययौगिकपदघटकं वा इत्यर्थः। **संबद्धमिति** उपलक्षणम्। सादृश्यवदित्यपि ग्राह्यम्। तेन गौणीवृत्तिसंग्रहः॥ ॥ ८०४ ॥

पदद्वयात्मकं वाक्यं समस्तं वा पदं भवेत्।
योग्यताऽऽवश्यकी तत्र सापि शक्यार्थसङ्गतिः॥ ८०५ ॥

द्वयेति। अनेकेत्यर्थः। **समस्तेति** यौगिकेत्यर्थः। **आवश्यकी** शब्दप्रमायां वर्तते। न तु प्रमां प्रति कारणम्। **शक्यार्थसङ्गतिः** पदबोध्यार्थानां अन्वयः॥ ॥ ८०५ ॥

असंबद्धार्थबोधस्तु न शब्दादपि जायते।
असतस्सर्वशून्यस्य कथं शब्दोऽपि बोधकः॥ ८०६ ॥

शब्दादपि न केवलं प्रत्यक्षानुमानाभ्याम्। **असंबद्धेति**। शाब्दबोधस्थले पदार्थयोः, आर्थिकार्थस्थले अर्थयोः, परस्परसंबन्धरहितेत्यर्थः॥ ८०६ ॥

यदि दोषवशाच्छब्दो बोधयेत्तदसङ्गि च।
असन्निकृष्टमेवास्तु शुक्तौ रजतमप्यसत्।
दोषोपोद्बलितं चक्षुर्गृह्णीयादविशेषतः ॥ ८०७ ॥

शब्दजन्ये शशशृङ्गमस्तीति भ्रमे योग्यताऽज्ञानात् योग्यताभ्रमाद्वा दोषाद्विपरीतान्वयबोधो जायते। दोष एव तत्र सन्निकर्षकार्यकर इति भावः॥ एवं चापरोक्षभ्रमस्थलेऽपि दोषवशादसन्निकृष्टस्यापि रजतस्योल्लेखः संभवतीति

भावः। **अविशेषतः**। दोषस्येति शेषः। परोक्षभ्रमे दोषः योग्यताभ्रमादिः। अपरोक्षभ्रमे तु सादृश्यादिरित्यन्यदेतत् ॥ ८०७ ॥

अपरोक्षप्रतीत्या तन्नासत्त्वं तस्य गच्छति।
क्वचिद्भवति शास्त्रार्थः क्वचिन्नेति कथं वद ॥ ८०८ ॥

क्वचित् एकमेव वस्तु अन्याकारेण परोक्षप्रतीतौ, अपरोक्षप्रतीतौ च भासत इत्यनुभवः। तथा चासत एवान्याकारस्य सत्त्वेन परोक्षप्रतीतेः स्वीकारः अपरोक्षप्रतीतेः पुनर्निषेधः निर्निबन्धनः। अर्थासत्त्वस्योभयत्र साम्यादित्याह **अपरोक्षेति** ॥ ८०८ ॥

भूतले घटनास्तित्वं चक्षुषा दृश्यते यदा।
प्रतियोगी कथं तत्रासन्निकृष्टोऽपि दृश्यते ॥ ८०९ ॥

सन्निकृष्टसता साकं तत्सत्त्वे नास्तितैव न।
अनन्यगत्या तन्मात्रे नियमस्त्यज्यते यदि ॥ ८१० ॥

चक्षुषेति। 'क्वचिद् घटाद्यभावोऽपि प्रत्यक्षेणैव गम्यत' इत्युक्तेः। तत्र प्रतियोगिनो घटस्य ज्ञानोल्लेख्यत्वेऽपि न चक्षुषः सन्निकर्षोऽस्ति। तथा च ज्ञानस्य तदुल्लेखित्वे तत्सन्निकृष्टकरणजन्यत्वं तन्त्रं इति नियमस्तत्र त्वयैव त्याज्यं इत्याह **भूतल इति**। परमुखेन समाधिं वाचयित्वा समं भ्रमस्थलेऽपीत्याह **सन्निकृष्टेति**। **सता** भूतलेन। **तत्सत्त्वे** घटसत्त्वे। **नास्तितैव न** अभावबुद्धिरेव न स्यात्। **अनन्यगत्या** असन्निकर्षादन्या गतिः सन्निकर्षः तस्यायोगेन ॥ ८०९ ॥ ८१० ॥

न शुक्तिरूप्यसत्त्वे स्याद्भ्रमता लोकसंमता।
अनन्यगत्या तद्भ्रान्तौ सन्निकर्षोऽपि नेष्यताम् ॥ ८११ ॥

समः समाधिरित्याह **नेति**। रूप्यस्यापि सन्निकृष्टत्वे सत एव सत्त्वेन भानमित्यापत्त्या भ्रान्तिव्यवहारलोपप्रसङ्ग इत्याह **भ्रमतेति**। सतोऽसत्त्वेन, असतः सत्त्वेन च प्रतीतेरेव भ्रान्तित्वादिति भावः ॥ ८११ ॥

अतिप्रसङ्गदोषं तु दोष एवापनेष्यति ।
प्रतिमल्लं यथा मल्लस्तदसत्त्वेऽपि का क्षतिः ॥ ८१२ ॥

अतिप्रसङ्गेति। घटसन्निकृष्टेन चक्षुषा पटादिज्ञानरूपेत्यर्थः। **दोषः** सादृश्यादिः ॥ ८१२ ॥

असद्रजतमेवेति ह्यनुभूतिर्बलीयसी ।
न चेत्तव मते साक्षी तत्साक्षात्कुरुते कथम् ॥ ८१३ ॥

असन्निकृष्टतज्ज्ञाने चक्षुषोऽप्यस्तु सा गतिः ।
सन्निकर्षे त्वर्थसत्त्वात्तज्ज्ञानं न भ्रमो भवेत् ॥ ८१४ ॥

सन्निकर्षेण चक्षुश्च कुतस्तन्न प्रकाशयेत् ।
तमो हि चक्षुपा दृश्यं केवलाविद्यकं च ते ॥ ८१५ ॥

'असदेव रजतं प्रत्यभात् इत्युत्तरकालीनानुभवात् शुक्तिरेवात्यन्तासद्रजतात्मना प्रतिभातीत्याचार्याः' इति पद्धत्युक्तमाह **असदिति**। किं च शुक्तिरूप्यादिप्रातिभासिकपदार्थानां भानं साक्षिणैवेति वदता त्वयैव सन्निकर्षनियमः परित्यक्त इत्याह **साक्षीति**। तत्रापि सन्निकर्षाङ्गीकारे रजतस्यापि सत्त्वापत्तिः चक्षुषाऽपि तद्ग्रहणापत्तिश्चेत्याह **सन्निकर्षे त्विति**। **चक्षुश्चेति च**। न चाविद्यकत्वाद्रूप्यस्य चक्षुषा भानायोगः। तथाभूतस्यापि तमसश्चक्षुषा भानाङ्गीकारादित्याह **तमो हीति** ॥ ८१३ ॥ ८१४ ॥ ८१५ ॥

शशस्य शृङ्गिताऽभावं यो न जानाति दूरतः ।
स तु कर्णद्वयं दृष्ट्या शशशृङ्गं च चक्षुषा ।
किं न प्रत्येत्यसत्तस्मादापरोक्षिकमेव हि ॥ ८१६ ॥

असतः सत्त्वेनापरोक्षप्रतीतिविषयतां स्थलान्तरेऽनुभावयति **शशस्येति**। **कर्णद्वयमिति**। तस्य शृङ्गद्वयेन ऊर्ध्वत्वरूपसादृश्यसद्भावादिति भावः। न

जानातीति बाधानुसन्धानाभावः। तथा च प्रत्यक्षभ्रमसामग्री सर्वाऽप्यविकलेति भावः ॥ ८१६ ॥

प्रातिभासिकनामापि यदि तस्य प्रदीयते।
प्राग्जातस्य कुमारस्य तन्नामकरणान्तरम् ॥ ८१७ ॥

नामेति। प्रतीतस्यासतः प्रातिभासिकेति त्वत्परिभाषामात्रेण न प्रतीतिरपलापार्हा इत्याह **प्रागिति** ॥ ८१७ ॥

असतश्शशशृङ्गस्य प्रत्यक्षेण भ्रमे सति।
प्रातिभासिकता स्याच्चेत्प्राग्धीरसत एव सा॥ ८१८ ॥

असत इति। परोक्षभ्रमे असदित्यङ्गीकृतस्य तस्यैव अपरोक्षभ्रमोत्पत्तौ प्रतिभासिकेति नामान्तरकरणमात्रेण न अपरोक्षतः प्रतीतस्य असत्त्वं अपगच्छतीत्याशयः ॥ ८१८ ॥

अर्थाभावकृतासत्त्वं कस्तदा तस्य मोचयेत्।
मिथ्यात्वसाधिका दृष्टिः किं तेऽर्थाभावबाधिका ॥ ८१९ ॥

अर्थाभावेति। अध्यस्ततुच्छयोरुभयोरपि लक्षणेऽर्थाभावस्य साम्यादिति भावः। यथोक्तं न्यायामृते 'त्रिकालसर्वदेशीयनिषेधाप्रतियोगिता सत्तोच्यतेऽध्यस्ततुच्छे तं प्रति प्रतियोगिनी' इति ॥ ८१९ ॥

सत्त्वप्रतीतिर्भ्रान्तिश्चेदसत्त्वे सति शोभते।
प्रमारूपा च सा नास्ति किं तस्यासत्त्वमोचकम्॥ ८२० ॥

सत्त्वेन प्रतीयते अतो नासत्त्वं इति चेत् किं सा प्रतीतिः भ्रान्तिः उत प्रमा। नाद्यः तस्याः असत्त्वसाधकत्वेन बाधकत्वायोगात्। सत एव सत्त्वेन प्रतीतौ भ्रान्तित्वायोगात्। अनिर्वचनीयार्थावभासो भ्रम इति तु अनवस्थापराहतम्। न द्वितीयः तदभावादेव। प्रमायां विषयस्य बाधानुपपत्तेः ॥ ८२० ॥

असन्निकृष्टदृष्टिस्तु समा पक्षद्वयेऽपि ते ।
परिणामात्परीहारे त्रिकाल्यां बाध्यता गता ॥ ८२१ ॥

पक्षद्वये असत्त्वपक्षे प्रातिभासिकसत्त्वपक्षे च । प्रतिभासमात्रशरीरस्य प्रातिभासिकस्य प्रतिभासात्पूर्वमभावेन सन्निकर्षासंभवादिति भावः । **परिणामादिति** अविद्योपादानत्वाङ्गीकारादिति भावः । **बाध्यता** त्रैकालिकनिषेधः भ्रमकाले सत्त्वस्य कालत्रयासत्त्वविरोधित्वादिति भावः । तदुक्तं वादावल्याम् । 'पदार्थस्यासत्त्वेन तदुपादानताया असंभवित्वादि'ति ॥ ८२१ ॥

पूर्वं च नासच्छृङ्गं स्यादनुत्पन्नघटादिवत् ।
विद्युद्बुद्बुदधीकल्पा धीश्च तस्य प्रमा भवेत् ॥ ८२२ ॥

उत्पद्य विनष्टत्वे घटादिवत्सत्यतैव स्यात् तद्धीश्च विद्युदादिज्ञानवत् प्रमैव स्यादित्याह **पूर्वमिति** । यथोक्तं परेणैव 'सतो हि घटादेरुत्पत्तिविनाशौ दृष्टौ नासतः शशविषाणादेरि'ति ॥ ८२२ ॥

तस्मात्तदसदेवासीदतस्तेन गतं मतम् ॥ ८२३ ॥

अतः स्ववचनविरोधात् अविद्योपादानकत्वस्यासंभवात् । **तत्** शशशृङ्गम् । **तेन** कर्णद्वयाधिष्ठाने शृङ्गद्वयस्य सत्त्वेन अपरोक्षतयाऽवभासेन । **मतं** असतः सत्त्वेनापरोक्षतया प्रतीतिर्नास्तीति मतम् ॥ ८२३ ॥

अयोग्यार्थकवाक्यं हि शक्त्यभावान्न शक्यवत् ।
शक्यसंबन्धसादृश्याधीना वृत्तिस्ततोऽस्य न॥ ८२४ ॥

करणस्थायोग्यताख्यदोषेण नयनादिवत् ।
असन्निकृष्टस्यात्यन्तासत एव हि धीरभूत् ॥ ८२५ ॥

परोक्षभ्रमे सन्निकर्षाभावं दोषस्यैव च तत्कार्यकारित्वं प्रागुक्तं विशदयति **अयोग्येति** । न तावत् शशशृङ्गमस्तीति वाक्यात् शशशृङ्गमिति समस्तपदेनैव वा बोध एव न भवतीति युक्तम् । तदुक्तं न्यायामृते "न ह्यत्र 'घढधषि' निरर्थकेष्विव

पदार्थधीरेव वा, 'कुण्डमजाचिनं' इत्याद्यपार्थकेष्विव अन्वयधीर्वा नास्ति। विपरीतबोधकेषु योग्यताऽभावेऽपि अयोग्यत्वज्ञानाभावमात्रेण योग्यताभ्रमेण वा आकांक्षासन्निधिभ्यां ज्ञानोत्पत्तेरनुभवात्। अन्यथा प्रवृत्त्यादेरयोगात्। योग्यताहीनाद्वाक्याद्भ्रमानुत्पत्तौ च तद्धीनात्प्रतिवादिवाक्याद्धीरेव न स्यादिति कथा बधिरकलहः स्यात्" इति [१/६१/४६८] अयमत्राशयः। पदानां हि योग्येतरान्विते वृत्तिः। योग्यं च प्रमाणाविरुद्धम्। शशशृङ्गयोः संबन्धः प्रमाणविरोधादयोग्यः। अतो न तत्र मुख्या वाऽमुख्या वा वृत्तिः संभवति। अतः शब्दाद्भ्रमः, करणगताऽयोग्यताऽऽख्य दोषमूलक एवेति। **नयनवत्**। पित्तदूषितं नयनं शङ्खेऽविद्यमानमेव पीतत्वं असन्निकृष्टमपि यथा दर्शयति तद्वत् ॥ ८२४ ॥ ॥ ८२५ ॥

इति सर्वैस्समाधेयं ततः प्रत्यक्षदर्शने।
दोषादसन्निकृष्टस्य भानं को दूषयेद्बुधः ॥ ८२६ ॥

ततः परोक्षभ्रमे करणदोषादसन्निकृष्टभानस्यानुभवसिद्धत्वात्। **प्रत्यक्षदर्शने** शुक्तिरूप्यादिभ्रमे ॥ ८२६ ॥

शब्दादसन्निकृष्टस्य शशशृङ्गस्य धीर्यथा।
अक्षादसन्निकृष्टस्य शुक्तिरूप्यस्य धीस्तथा ॥ ८२७ ॥

तथेति। असन्निकृष्टकरणजन्यत्वे ज्ञानस्य अतिप्रसङ्गं यथा दोषो वारयति तथैवापरोक्षभ्रमस्थलेऽपीति भावः ॥ ८२७ ॥

परोक्षधीः परीणामं यथा नापेक्षते तव।
अपरोक्षापि धीस्तद्वत्तं व्यर्थं किमपेक्षते ॥ ८२८ ॥

यथा अर्थस्यासत्त्वादेव। **तं** परिणामम्। **व्यर्थं** अर्थासत्त्वस्य साम्यात् ॥ ॥ ८२८ ॥

ज्ञानस्य सन्निकर्षत्वकथाऽप्यत्र वृथैव तत्।
दोषे सति तु किं तेन दोषाभावेऽपि किं ततः ॥ ८२९ ॥

प्रातिभासिकार्थग्रहणे ज्ञानमेव सन्निकर्ष इति मन्दाशङ्कां निराह **ज्ञानस्येति**। सन्निकर्षो हि ज्ञानस्य कारणम्। तस्य ज्ञानात्पूर्वभावित्वावश्यंभावात् आत्माश्रयत्वापत्तेर्न ज्ञानस्यैव सन्निकर्षता शङ्कितुमपि शक्या। अतो दोषस्यैव सन्निकर्षस्थानीयत्वमेष्टव्यमित्याह **दोषे सतीति**। सन्निकर्षो हि अर्थसत्त्वमपेक्षते। न च प्रातिभासिकं रूप्यं प्रतिभासात्पूर्वमस्ति। तस्य प्रतिभासशरीरत्वात्। अतो अन्वयव्यतिरेकाभ्यां दोषस्यैव कारणत्वं इति भावः॥ ८२९ ॥

शुक्तौ सर्पभ्रमादृष्टे रज्जौ रूप्यभ्रमोज्झितेः।
सादृश्यस्य प्रतीत्यर्थं रजतत्वप्रकारिका।
धीर्वाच्या गौरवात्सा धीस्तस्यैवेति न कल्प्यते॥ ८३० ॥

अधिष्ठानगतसादृश्यप्रतिसंबन्धिज्ञानमेव रजतज्ञानम्। तत्र रजतं न सन्निकर्षघटकतयाऽपेक्षितम्। पूर्वं प्रधानानुभवजनितसंस्कारसचिवं दुष्टेन्द्रियं पुरोवर्तिनि रजतत्त्वप्रकारकधियं जनयति। अतः असता सन्निकर्षाभावेऽपि दोष एव असतः सत्त्वेन प्रतीतिं जनयतीत्याह **सादृश्यस्येति**॥ ८३० ॥

विशेषणज्ञानजन्या विशिष्टस्य प्रमाऽपि न।
अभावत्वप्रकारत्वपूर्वापूर्वार्थदर्शनात्॥ ८३१ ॥

ननु विशिष्टज्ञानं प्रति विशेषणज्ञानकारणताया दण्डी चैत्र इत्यादिविशिष्टज्ञानस्थले क्लृप्तत्वात् तदनुसारेणात्रापि भ्रमविशेषणीभूतरजतस्यैव ज्ञानं भ्रमरूपविशिष्टज्ञानं प्रति कारणं वक्तव्यमित्यतः स्यादप्येवं यदि विशिष्टज्ञानं प्रति विशेषणज्ञानं कारणमिति नियमः स्यात्। स एव नास्ति बहुत्र व्यभिचारादित्याह **विशेषणेति। प्रमाऽपि नेति**। प्रमास्थलेऽपि विशेषणज्ञानजन्यत्वनियमो नेति भावः॥ दण्डीति प्रत्यक्षेऽपि विशेष्येन्द्रियसन्निकर्षः विशेषणविशेष्ययोरसंसर्गग्रह एव कारणमिति भावः। **अभावत्वेति**। घटाभाववद्भूतलमिति ज्ञाने अभावत्वविशिष्टोऽभाव एव भूतलांशे विशेषणतया भाति। अभावनिर्विकल्पस्य परैरप्यनङ्गीकारात्। एवं रजतत्वप्रकारकज्ञानवानहमित्यनुव्यवसाये रजतत्वे व्यवसायनिरूपितत्वं यत्प्रकारत्वं तदपूर्वमेव भासते तदुक्तं तर्कताण्डवे

'व्यवसायगतस्य रजतत्ववैशिष्ट्यविषयकत्वस्य असिद्ध्यापाताच्च। न ह्यनुव्यवसादन्येन तत्सिद्धिरि'ति। पूर्वशब्देन निर्विकल्पभङ्गे तर्कताण्डवोक्तानि अन्यानि व्यभिचारस्थलानि ग्राह्याणि। संयुक्ताविमौ समवेताविमौ इत्यादीनि ॥ ॥ ८३१ ॥

अविद्यमानार्थबोधहेतौ दोषे सति भ्रमे।
अप्रतीतार्थबोधाय कुतोऽन्यानुसृतिर्वद ॥ ८३२ ॥

अन्यानुसृतिः विशेषणज्ञानानुसृतिः। **कुत इति**। दोषेणैव अप्रतीतस्य रजतरूपभ्रमविशेषणस्योपस्थितिनिर्वाहादिति भावः ॥ ८३२ ॥

अत्र प्रतीतरजते कुतो देशान्तरस्थता।
इदन्तामुल्लिखन्ती सा प्रतीतिस्सहते न ताम् ॥ ८३३ ॥

"अत्र प्रतीतस्यैवान्यत्र सत्त्वे मानाभावात्। तथा हि। भ्रान्त्यनुभवो वा तत्र प्रमाणम्। बाधानुभवो वा। भ्रान्त्यनुपपत्तिर्वा बाधानुपपत्तिर्वा। नाद्यः। तस्याप्रमाणत्वात्। अत्रैव सत्त्वावेदकत्वाच्च।" इत्यादि सुधोक्तं विवृण्वान आह **कुत इति। कुतः** प्रमाणादित्यर्थः। **सा** भ्रान्तिः। **तां** अन्यत्र सत्ताम् ॥ ८३३ ॥

घटोऽयमिति दृष्टोऽपि घटो नोचेत्स्थलान्तरम्।
गमिष्यति तथा द्रष्टा त्वं चैनमनुयास्यसि ॥ ८३४ ॥

इदंशब्दस्य पुरोदेशसंबन्धार्थकतां विपक्षेऽनुभवविरोधप्रदर्शनेनावधारयति **घटोऽयमिति** ॥ **गमिष्यति** तस्य स्थलान्तरे सत्त्वाङ्गीकारः प्रसज्यते ॥ ८३४ ॥

विशेषणज्ञानजन्यविशिष्टार्थस्य धीरिति।
किमपूर्वघटव्यक्तौ घटत्वाकारधीर्न ते ॥ ८३५ ॥

इतीत्यनन्तरं एतावन्मात्रस्याभ्युपगमेऽपि विशेष्यवृत्तिविशेष्यणस्य ज्ञानमेव विशिष्टज्ञानहेतुरिति वादो निर्निबन्धनः यत्र कुत्रापि विशेषणज्ञानसद्भावेऽपि विशिष्टज्ञानसंभवात्। अन्यथा अपूर्वघटदर्शने अयं घट इति

घटत्वप्रकारकत्वविशिष्टधीः न स्यादिति भावः अनुसन्धेयः । एवं इदं रजतं इति भ्रमेऽपि रजतस्यासत्त्वेऽपि रजतत्वस्य यत्र क्वापि प्रधाने ज्ञानेन निर्वाहे आपणस्थ-रजतवृत्तित्वेन तज्ज्ञाननियमाभ्युपगमोऽयुक्त इति हृदयम् ॥ ८३५ ॥

यथैकस्यां घटव्यक्तौ घटत्वाकारधीबलात् ।
पूर्वादृष्टघटव्यक्तिशतकेऽपि विशिष्टधीः ।
प्राग्दृष्टघटभूनिष्ठास्ते सर्वे किं घटास्तव ॥ ८३६ ॥

अनुभवविरोधप्रदर्शनेन प्रागुक्तमतिप्रसङ्गं प्रपञ्चयति **यथेति**। घटवद्भूतलं इति विशिष्टज्ञानं प्रति तत्तद्भूतलवृत्तिघटज्ञानस्यैव विशेषणज्ञानविधया कारणत्वाङ्गीकारे भिन्नभिन्नाधिकरणेषु द्रक्ष्यमाणघटेषु घटत्वबुद्धिर्या जायते सा न स्यात् अन्यथा तेषामपि पूर्वदृष्टघटाधिकरणताऽङ्गीकार आपद्यते इति भावः ॥ ८३६ ॥

यदि सामान्यतो ज्ञाता सर्वा व्यक्तिस्तदा तव ।
विशेष्यज्ञानजन्यत्वमपि तर्ह्यागतं बलात् ॥ ८३७ ॥

व्यक्तिः घटरूपा । **विशेष्यज्ञानस्यापि इति**। उभयोरपि नियतपूर्ववृत्तित्वेन अन्यतरपरित्यागेन अन्यतरस्य विशेषणज्ञानस्यैव कारणत्वाङ्गीकारे नियामका-भावादिति भावः ॥ ८३७ ॥

एवं च शुक्तिव्यक्तिश्च स्यादापणगता तव ।
रजतत्वप्रकारैव तेन धीः प्रागपेक्षिता ॥ ८३८ ॥

अस्तु तदपीत्यत आह **एवं चेति**। विशेषणस्य रजतस्येव विशेष्यस्य इदंपदार्थस्यापि आपणस्थताऽङ्गीकारापत्तिरिति भावः । तथा च रजतत्वस्य न केवलं पुरतः किन्तु अत्यन्तासत्त्वेऽपि इदं रजतमिति धीर्निर्वहत्येवेत्याह **रजतत्वेति** ॥ ॥ ८३८ ॥

प्राग्दृष्टघटसादृश्यादेवान्यत्र विशिष्टधीः ।
तत्तद्व्यक्तिस्थता धीस्तु घटादावपि नेष्यते ॥ ८३९ ॥

सादृश्यादेवेत्यत्रस्थैवकारव्यवच्छेद्यमाह **तत्तदिति**। तथा च भ्रमविषयस्य रजतस्यात्यन्तासतोऽपि प्रधानभूतरजतानुयोगिकसादृश्यप्रतियोगित्वमस्त्येवेति, किं रजतस्य वस्तुत्वाऽऽग्रहेणेति भावः ॥ ८३९ ॥

एवं च रूप्यसादृश्याच्छुक्तौ रूप्यत्वधीर्भवेत्।
अपूर्वज्ञाततद्व्यक्तेः कुतस्स्यादापणस्थता ॥ ८४० ॥

तथा च रूप्यसदृशत्वात् शुक्तावेव रूप्यभ्रमो न रज्ज्वादौ ॥ **अपूर्वेति**। अत्यन्तासदित्यर्थः ॥ ८४० ॥

अन्यत्राप्यतिसादृश्ये रूप्यधीस्सा प्रमा भवेत्।
अल्पसादृश्यतो धीश्चेद्यमयोरिव स भ्रमः ॥ ८४१ ॥

अतिसादृश्ये रूप्यत्वाद्यसाधारणधर्मेण सादृश्ये। **अल्पसादृश्यतः** चाकचाक्यादिधर्मेण सादृश्यात्। **यमयोरिति**। तत्र बाह्याकारमात्रेण सादृश्येऽपि अन्योन्यसुखाद्यनुसन्धानरूपासाधारणरूपेण सौभर्यादियोगिष्विव सादृश्यस्याभावादिति भावः ॥ ८४१ ॥

प्रत्यभिज्ञाऽप्यन्यकाले वक्ति देशान्तरे स्थितिम्।
तदैव तस्यातिदूरदेशस्थत्वं कुतोऽपतत् ॥ ८४२ ॥

ननु तदिदं रजतमिति प्रत्यभिज्ञायां यथा देशान्तरस्थं अत्रस्थत्वेन भाति तथाऽत्रापि आपणस्थं रजतं पुरोवर्तितया भातीति किं न स्यादित्यत आह **अन्यकाल इति**। तदित्युल्लेखेन प्रत्यभिज्ञा कालान्तरस्थमेव गोचरयति। अत्र तु एकस्मिन्नेव काले इति विषमो दृष्टान्त इति भावः। इदमुपलक्षणम्। तत्र तदेव इदन्त्वेनानुभवामि इतिवत् अत्र आपणस्थमेव रजतं इदंत्वेनानुभवामि इत्यनुव्यवसायाभावात् प्रत्युत पुरोवर्तिनमेव रजतत्वेन जानामीत्येवानुभवादिति च भावः ॥ ८४२ ॥

विशेषणस्य च ज्ञानं यदि स्यात्सविकल्पकम्।
अनवस्था तदा सुस्था यदि तन्निर्विकल्पकम् ॥ ८४३ ॥

**नारिकेलद्वीपवासी तर्हि सामान्यतोऽग्निदृक् ।
द्वितीयक्षण एवाग्निवैशिष्ट्यमपि पश्यति ॥ ८४४ ॥**

विशिष्टज्ञानं विशेषणज्ञानजन्यं इति वदन् प्रष्टव्यः । किं तद्विशेषणज्ञानं सविकल्पकं उत निर्विकल्पकं इति । नाद्यः तत्रापि सविकल्पकविशेषणज्ञानान्तरस्य कारणत्वापातेन अनवस्था स्यादित्याह **अनवस्थेति**। न द्वितीयः । अतिप्रसङ्गादित्याह **नारिकेलेति**। इतःपूर्वं वह्निज्ञानरहित इति यावत् । तेन तस्य वह्निस्मरणरूपं विशेषणज्ञानं न संभावनार्हमिति भावः । सामान्यदृगित्यनेन वह्नित्वप्रकारकत्वं व्यवच्छिनत्ति । तदुक्तं तर्कताण्डवे निर्विकल्पकभङ्गे "वह्निमानित्यादि ज्ञानं प्रति वह्न्यादिज्ञानस्य न विशेषणज्ञानत्वेन कारणत्वम् । द्रव्यत्वादिना वह्न्यज्ञानेऽपि तदभावात् नापि विशेषणतावच्छेदवऽप्रकारकविशेषणज्ञानत्वेन निर्विकल्पकासिद्धेः । गौरवाच्च । किन्तु विशेषणतावच्छेदकप्रकारकज्ञानत्वेन । तथा च न निर्विकल्पकसिद्धिः इति । तथा च नारिकेलद्वीपवासिनः तादृशज्ञानाभावात् न वैशिष्ट्यधीरिति भावः ॥ ८४३ ॥ ८४४ ॥

**सविकल्पकधीपक्षे व्यञ्जकानुसृतिर्भवेत् ।
अनवस्थाभिया व्यञ्जके तु न व्यञ्जकान्तरम् ।
विशेषणज्ञानजत्वनियमस्तद्वृथा तव ॥ ८४५ ॥**

सविकल्पकं विशेषणज्ञानं कारणं इति पक्षे प्रागुक्तामनवस्थां स्फोरयन् विशेषणज्ञानस्य कारणतानियमं त्याजयति **व्यञ्जकेति** । अयं घट इति विशिष्टज्ञानं प्रति विशेषणघटत्वस्य विशेषणतावच्छेदकीभूतजातित्वेन ज्ञानं तावदावश्यकम् । घटत्वजातिव्यञ्जकं च पृथुबुध्नोदराकारादिरूपं विशिष्टम् ॥ तज्ज्ञानार्थं व्यञ्जकान्तरानुसरणेऽनवस्था स्यात् । अतः तज्ज्ञानं युगपदेव इन्द्रियसन्निकर्षेण जायते इति स्वीकर्तव्यम् । तथा च किञ्चिद्दूरं गत्वा तदङ्गीकारापेक्षया प्राथमिकं विशिष्टज्ञानं अयं घट इत्येतदेव इन्द्रियसन्निकर्षेणैव, पूर्वं विशेषणज्ञानं विना जायते इति स्वीकार एवोचित इति भावः ॥ ८४५ ॥

घटे घटत्वमिति धीर्घटत्वज्ञानजा न चेत्।
घटोऽयमिति धीः कस्माद्घटत्वज्ञानजा वद।
तज्जीवति ज्ञानसाम्ये त्वच्छ्राद्धनियमं त्यज ॥ ८४६ ॥

अपि च विशिष्टज्ञानं प्रति विशेषणज्ञानमेव कारणं, न तु पुनः विशेष्यज्ञानत्वेन रूपेण विशेष्यज्ञानमिति परस्य पन्थाः। ज्ञानसाम्येऽपि प्रयोगभेदेन, घटत्वं, 'इह घटत्वं' इति प्रयोगे विशेष्यभूतं, 'अयं घट' इति प्रयोगे विशेषणं च भवति ॥ एवं सति तस्यैव घटत्वज्ञानस्य विशेष्यतादशायां कारणत्वं विशेषणतादशायां कारणत्वाभाव इत्येतर्धजरतीयं साहित्यमुद्रयाऽपहसति तदिति। तस्मात् ज्ञानयोः समानविषयकत्वेऽपि उभयत्र घटत्वज्ञानस्य इन्द्रियसन्निकर्षजन्यत्वे समानेऽपि एकत्र तदपलापदुर्व्यसनं त्यजेति भावः। जीवनवान् पिता, पितुर्जीवनं इत्यनयोर्ज्ञानयोः निर्निबन्धनं अन्यतरमपलप्य जीवत एव पितुः श्राद्धं मा कृथा इति ध्वनिः ॥ ८४६ ॥

घटत्वनिर्विकल्पोत्था न घटत्वविशिष्टधीः।
घटत्वसविकल्पत्वाद्घटत्वेहप्रतीतिवत् ॥ ८४७ ॥

तदेवं विशिष्टज्ञानं विशेषणज्ञानजन्यमिति नियमस्य दूषितत्वात् निर्विकल्पप्रत्यक्षप्रभेदाङ्गीकारो युक्तिविरुद्ध इत्याह **घटत्वेति**। घटत्वविशिष्टधीः अयं घट इति धीः न घटत्वनिर्विकल्पजन्या, घटत्वसविकल्पकत्वात् घटे घटत्वं इति प्रतीतिवत् इति प्रयोगः ॥ ८४७ ॥

असन्निकर्षभङ्गाय यदि तज्ज्ञानमिष्यते।
तत्रैव तर्हि तज्ज्ञानं वाच्यं नान्यत्र कुत्रचित् ॥ ८४८ ॥

चन्दने सौरभज्ञानं तत्र तस्य प्रमातरि।
उपनायकतामेति धीस्सा तत्सन्निकर्षजा ॥ ८४९ ॥

ननु च सुरभि चन्दनखण्डमिति चाक्षुषज्ञाने चक्षुषोऽयोग्यं सौरभं भासते। न चासन्निकृष्टस्य भानम्। अत एव तत्र सुरभिज्ञानाख्यः अलौकिकसन्निकर्ष उपेयते।

तद्वदेव इदं रजतमिति चाक्षुषज्ञाने न रजतस्य चक्षुषा सन्निकर्षः। तस्य पुरतोऽसत्त्वात्। अतो रजतज्ञानाख्यः सन्निकर्ष उपेयः। तन्निर्वाहार्थमेव तस्यान्यत्र सत्त्वकल्पनमित्याशङ्क्य वैषम्यप्रदर्शनेन निराह **तत्रैवेति** सुरभिचन्दनखण्डमिति ज्ञानं प्रमा। चन्दन एव सौरभज्ञानं च तत्र सन्निकर्षः। इदं रजतमिति ज्ञानं त्वप्रमा। रजतज्ञानं च त्वया न शुक्तौ किन्तु अन्यत्रैव स्वीक्रियते। किं केन सङ्गतमिति भावः। तदेतदाह प्रमातरीति तत्रैवेति च ॥ ८४८ ॥ ८४९ ॥

चन्दनत्ववति व्यक्त्यन्तरे सौरभसंयुते।
तज्ज्ञानमेव योगो न चक्षुषाऽत्रापि तद्धियः।
अदर्शनात्तेन योगस्तत्रैव स परत्र न ॥ ८५० ॥

तत्रैवेति नियमं व्यतिरेकमुखेनोपपादयति **व्यक्त्यन्तर** इति। तज्ज्ञानं चन्दनान्तरे सौरभज्ञानम्। **न योगः** सन्निकर्षो न भवति। तत्र हेतुः चक्षुषाऽपीति। फलितमाह **तेनेति** ॥ ८५० ॥

शुक्तिव्यक्तावेव तस्माद्रजतत्वस्य धीर्यदि।
सैवोपस्थापिका भूयाच्चक्षुषो मनसोऽपि वा।
दोषादसन्निकृष्टस्य धीरेवात्रोचिता ततः ॥ ८५१ ॥

शुक्तिकायामेवेति। यदि इदं रजतमिति ज्ञानं सुरभि चन्दनखण्डमिति ज्ञानवत् प्रमा स्यादिति यावत्। मनसो बहिरस्वातन्त्र्यात् मानसज्ञाने बहिरर्थस्य भानाय चक्षुषः सहकारित्वात् चक्षुष इत्युक्तम्। अतः प्रमाऽर्थमेव लौकिको वाऽलौकिको वा सन्निकर्षो अन्वेषणीयः। भ्रमे तु दोष एवात्यन्तासतः प्रतीत्युपपादकः इत्याह **दोषादिति** ॥ ८५१ ॥

असतो यदि न ज्ञानं कथं तत्रासतोऽपि तत्।
दोषाच्चेद्दोष एवास्तु तर्हि सर्वधुरंधरः ॥। ८५२ ॥

कथमिति। सन्निकर्षाभावस्योभयपक्षेऽपि साम्यात्। दोषवशादत्रासतोऽपि प्रतीतिरिति चेत् अत्यन्तासतोऽपि सममित्याह **दोषेति** ॥ ८५२ ॥

विशेषणज्ञानजत्वसिद्ध्यै तस्यापणस्थता।
यदि स्यादक्षसंयोगजत्वात्तर्ह्यस्तु तत्र तत्।
बाधादिदं न चेत्तर्हि बाधादेव भवेन्न सा ॥ ८५३ ॥

सिद्ध्यै त्वत्परिकल्पिताप्रामाणिकप्रक्रियानिर्वाहाय। **तर्हि** त्वत्प्रक्रियानुसारेणैव। विशेषणज्ञानस्य चक्षुःसंयोगजन्यत्वस्य त्वयैवाभ्युपगमात्। **तत्** रजतं **तत्र** पुरोदेश एव। **बाधात्** अत्यन्तासदेव रजतं प्रत्यभादिति बाधानुभवविरोधात्। **इदं** पुरोदेशवृत्तित्वम्। **सा** आपणस्थता। बाधकज्ञानेन सत्त्वमात्रस्य प्रतिषेधादिति भावः ॥ ८५३ ॥

रजतं दृष्टमित्युक्ते किमापणगतं त्विति।
पृष्टस्तत्रैतदन्यच्चेत्याह किं नाखिलो जनः।
सर्वानुभवबाधाय नालं त्वत्प्रक्रियातटित् ॥ ८५४ ॥

भ्रान्त्यनुभवान्यथाऽनुपपत्त्या आपणस्थत्वसिद्धिपक्षं सुधोक्तप्रकारेण निराह **तत्रैतत्** इति। पुरोदेश एव रजतम्। **अन्यत् न** आपणस्थं न इत्येव सार्वजनीनो भ्रान्त्यनुभवः। **प्रक्रियातटिदिति।** चलायां तटिदि स्थिरत्वं यथा बाधितं, तथा अनुभवविरुद्धा प्रक्रियैव बाधितेति हृदयम् ॥ ८५४ ॥

शशशृङ्गं यथा नास्ति नासीन्नापि भविष्यति।
शुक्त्यात्मकं तथा रूप्यं नासीदस्ति भविष्यति।
एवं द्वयोश्च साम्येऽपि कस्मादस्मिंस्ततोऽन्यता ॥ ८५५ ॥

अत्यन्तासदेव रजतं प्रत्यभादिति प्रागुक्तबाधानुभवविरोधं स्मारयति **शशशृङ्गेति।** **अस्मिन्** रजते। **अन्यता** असद्भिन्नता अन्यत्र सत्त्वमिति यावत् ॥ ८५५ ॥

पूर्वाकारविकारश्च कथं स्याद्दृष्टिमात्रतः।
न चेदैक्यं च भेदस्स्याच्चरमे दर्शने तव।
असत्पुरा कथं नोचेद्दृष्टेस्स्यादसतोऽपरम् ॥ ८५६ ॥

अधुना प्रागसदेव शशशृङ्गं प्रतीत्या प्रातिभासिकं संपद्यते इति मायिप्रक्रियां अतिप्रसङ्गोक्त्या पराचष्टे **पूर्वेति । चरमे इति ।** प्राक् वेदैः परोक्षतया प्रतीतं ऐक्यं चरमसाक्षात्कारेण भेद आपद्येतेति भावः। न च प्रमात्वेन वैषम्यम्। निष्प्रकारतयाऽभ्युपगते प्रमात्वासंभवादेवेति ध्येयम् ॥ ८५६ ॥

विमतं शुक्तिरजतं नासतो व्यतिरिच्यते ।
त्रिकाल्यां च निषेध्यत्वान्मायिमस्तकशृङ्गवत् ॥ ८५७ ॥

मायीति । न च दृष्टान्ते साध्यवैकल्यं परेण शङ्कार्हम् । तथा सति स्वस्यैव पशुत्वापत्तेरिति भावः ॥ ८५७ ॥

अनानुभविकं तस्मान्मतमेतद्दुरात्मनाम् ।
नृशृङ्गवच्छुक्तिरूप्यमसदेवेति निर्मलम् ॥ ८५८ ॥

असतश्शशशृङ्गस्य प्रत्यक्षेण भ्रमे सति ।
प्रातिभासिकता स्याच्चेत्प्राग्धीरसत एव सा ॥ ८५९ ॥

दुरात्मनां अवैदिकं शून्यमतमेव वैदिकत्वेन छद्मना वर्णनपराणाम् ॥ ८५८ ॥ ॥ ८५९ ॥

सन्घटस्सन्पटस्स्तम्भस्सन्नित्यादीनि देहिनाम् ।
सत्त्वापरोक्षज्ञानानि वर्तन्ते तत्र तत्र हि ॥ ८६० ॥

कालत्रयाबाध्यता च साक्ष्युपस्कृतचक्षुषा ।
कुतो न गृह्यते नोचेच्चक्षुषेदन्त्वधीः कथम् ।
वर्तमानोऽपि कालोऽयं साक्षिवेद्यो न चाक्षुषः ॥ ८६१ ॥

'सन् घट इत्यादि प्रत्यक्षेण बाधितविषयत्वात् कालात्ययापदिष्टश्च' इति वादावल्युक्तं दृश्यत्वाद्यनुमानानां प्रत्यक्षबाधं समर्थयते **सन्निति ।** ननु कथं वर्तमानकालसंबन्धित्वरूपसत्त्वविषयकत्वम् । कालस्य रूपरहितस्य चक्षुरयोग्यत्वादिति चेन्न । साक्ष्युपनीततया कालभानाङ्गीकारात् । 'तदेतदिति सर्वं

च दृश्यं वा स्मृतिगोचरम्। साक्षिसिद्धेन कालेन खचितं ह्येव वर्तते' इत्यनुव्याख्यानोक्तेः। कालस्योपनीततयाऽपि चाक्षुषप्रत्यक्षाविषयत्वे 'अयं घट' इति प्रत्यक्षमपि दुर्घटं स्यादित्याह **वर्तमान** इति। तथा च साक्ष्युपनीतकालत्रयसंबन्धिबाधाभावविषयकत्वमपि चाक्षुषप्रत्यक्षस्य संभवत्येवेति भावः॥ ८६०॥ ८६१॥

किञ्च त्रिकालबाध्यत्वमेककालेऽप्यबाधने।
न स्यादतश्चक्षुषैव त्रिकालाबाध्यतेयते ॥ ८६२॥

'न च तस्योत्तरकालीनबाधाभावाग्राहकत्वं तदानीमबाध्यताग्रहणेनैव तत्सिद्धेः' इति वादावल्युक्तिमनुरुध्याह **किञ्चेति**। तदुक्तं न्यायामृते "स्वकाले ह्यस्तितां गृह्णन् साक्षाकारस्त्रिकालगं प्रतिषेधं निरुन्धानो गृह्णात्येवात्यबाध्यतामि"ति। कालत्रयस्याधिकरणकोटौ प्रवेशात् साक्षाद्ग्राह्याभावावगाहित्वेनैव विरोध इति भावः॥ ८६२॥

किञ्च ब्रह्मगतं सत्त्वं सन्घटस्त्विति दृश्यते।
इति तेऽपि मतं तच्च त्रिकालाबाध्यता न किम्॥ ८६३॥

परेणाप्येतदङ्गीकृतमित्याह **किञ्चेति**। **ब्रह्मगतमिति** 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते' इति सुरेश्वरवार्तिकोक्तेः॥ ८६३॥

त्रिकालाबाध्यता तस्माच्चक्षुषैव निरीक्ष्यते।
तत्तद्गता मेऽन्यगा ते शक्तिस्तूभयसंमता ॥ ८६४॥

अन्यगा अधिष्ठानब्रह्मगता। **शक्तिः** चक्षुषस्त्रिकालाबाध्यत्वग्रहणशक्तिः॥ ८६४॥

अन्वयव्यतिरेकाख्यसाचिव्ये सति चक्षुषा।
यथा कारणता दण्डे गृह्यते सर्वलौकिकैः ॥ ८६५॥

'सहकारिसामर्थ्येन करणानां शक्त्यन्तराविर्भावस्य बहुलमुपलम्भात्' इति पद्धत्युक्तिं दृष्टान्तकथनपूर्वकं प्रकृते सङ्गमयति **अन्वयेति**। **कारणता** दण्डनिष्ठा घटजननानुकूलाऽतीन्द्रियशक्तिः ॥ ८६५ ॥

दोषाभावस्थलीयत्वयुक्त्युपोद्बलितं तथा।
त्रिकालाबाध्यतां स्वार्थे गृह्णीयाच्चक्षुरेव हि ॥ ८६६ ॥

'प्रकृते तु तादृशाबाधकादर्शनात् त्रिकालाबाध्यतैव निरपवादात्सिध्यति' इति वादावल्युक्तमाह **दोषाभावेति** ॥ ८६६ ॥

यद्यधिष्ठानगं सत्त्वं भा(स)स्यते घटगं न तत्।
नीलो घट इति ज्ञाने नैल्यं ब्रह्मगतं भवेत्।
असद्रजतमित्यत्रासत्त्वं ब्रह्मगतं भवेत् ॥ ८६७ ॥

मतमिति। विवादाध्यासितं, सद्रूपे कल्पितं, प्रत्येकं तदनुविद्धतया प्रतीयमानत्वात् इति ब्रह्मसिद्ध्युक्तम्। **नील इति** स्पष्टं घटादिनिष्ठतया प्रतीयमानमपि सत्त्वं यदि ब्रह्मनिष्ठं इति मतं तर्हि नीलो घटः चलति घटः, इत्यादावपि प्रतीयमानं रूपक्रियादिकमपि ब्रह्मनिष्ठमापद्येत इति भावः। इदमुपलक्षणम्। शब्दैकगम्यस्य ब्रह्मणश्चाक्षुषज्ञानेऽभानाच्चेति बोध्यम्। एतदनुपदमेव वक्ष्यते ॥ ८६७ ॥

त्वया प्रतीतमप्येतदसदित्येव चोदिते।
सदेवेदमिति प्राहुस्सत्त्वं तत्कथमन्यगम्।
आम्रान्पृष्टः कोविदारानाचक्षाणोऽस्ति
कः पुमान् ॥ ८६८ ॥

लोकानुभवबाधाय नालं त्वत्प्रक्रियातटित् ॥ ८६९ ॥

अनुभवविरोधं च परस्याह **त्वयेति**। स्फीतालोकमध्यवर्ती सन्निकृष्टोऽपि, अयं घटः सन्नेति केनचिच्चोदिते प्रतिवक्तारो भवन्ति अयं घटः सत्यो भवत्येवेति।

यदि पुनः न सन् घट इति चोदनं ब्रह्मविषयकं तर्हि उत्तरमपि तद्विषयकमेव स्यात् । ज्ञानानां स्वतः प्रामाण्यसिद्धघटसत्त्वापलापे ब्रह्मणोऽप्यपलापेन शून्यवादापत्तिरिति भावः ॥ ८६८ ॥ ८६९ ॥

अचाक्षुषब्रह्मसत्ता चक्षुषा कथमीक्ष्यते ।
ब्रह्मणोऽचाक्षुषत्वं च सिद्धमुक्तप्रकारतः ॥ ८७० ॥

उक्तेति आसंसारमज्ञानावृतं, रूपादिहीनं, शब्दैकगम्यं इत्याद्युक्तेत्यर्थः ॥ ८७० ॥

न हि कोऽपि पिशाचस्य सत्त्वं पश्यन्प्रदृश्यते ।
वेदैकगम्यादृश्यार्थसत्तां सर्वः किलेक्षते ॥ ८७१ ॥

पिशाचेति । वायवीयदेहवत्त्वेन रूपहीनत्वे दृष्टान्तः । सर्वप्रत्ययवेद्ये चेति परप्रक्रियामपहसति सर्वः किलेति ॥ ८७१ ॥

घटस्सन्भूतले व्योम्नि न सन्रूपं च सद्घटे ।
न व्योम्नीति च विज्ञाते के ते सदसती वद ॥ ८७२ ॥

न ह्यधिष्ठानमाधेयं सच्च तत्सदसन्न हि ॥ ८७३ ॥

अधिष्ठानानुवेधं युक्त्यन्तरेणापाकरोति **घट इति** । भूतले घटः सन्, घटे रूपं सत् इति च सतः आधेयत्वं प्रतीयते ॥ ब्रह्म च नाधेयम् । अतः नात्र सच्छब्दार्थः । एवं व्योम्नि घटः सन्नेति एवं रूपं सन्नेति च प्रतीयते । सदेकस्वभावस्य ब्रह्मणः न असद्रूपता । अतः अत्र उभयत्र सदसच्छब्दाभ्यां घटरूपे एव त्वयाऽपि बोध्यत्वेन स्वीकरणीय इत्याह **न हीति** । अत्र उभयत्र रूपघटयोः व्योमसंसर्गनिषेध एव, न रूपघटयोः, तयोः प्रामाणिकत्वात् । अन्यथा प्रामाणिकप्रतियोगिकात्यन्ताभावाङ्गीकारेण अपसिद्धान्तः स्यादित्यवधेयम् ॥ ८७२ ॥ ८७३ ॥

यदध्यस्तं घटे सत्त्वं भाति तद्ब्रह्म हि तद्भवेत्।
न त्वन्यगामि न ह्यावामन्यथाख्यातिवादिनौ।
सत्त्वप्रत्यक्षमेतस्मादबाधितमभूदिदम् ॥ ८७४ ॥

अस्तु वा घटे सत्त्वमध्यस्तम्। तथाऽपि न तद् ब्रह्मगतमिति त्वया वक्तुं शक्यम्। अन्यत्र सतः अन्यत्र भानं इति तार्किकमतप्रमोषापत्तेरित्याह **यदिति**। **आवामिति**। मम मते अध्यस्तं असदेव। तव तु अनिर्वचनीयख्यातिवादिनः तत्सदेव। असद्वैलक्षण्याख्यस्वरूपाङ्गीकारात्। सर्वथा नान्यगतमिति भावः॥ **अबाधितमिति** श्रुतिस्तु प्रत्यक्षसिद्धं न बाधितुमीष्टे। अतीन्द्रियार्थ-विषयकत्वात्तत्प्राबल्यस्येति भावः ॥ ८७४ ॥

किञ्चाधिष्ठानगा सत्ता घटाद्यनुगतेति सा।
घटेऽपि दृश्यते किं वा तन्निष्ठाऽऽरोप्यते घटे ॥ ८७५ ॥

उत तत्रैव सा दृष्टा घटो घटतयेक्ष्यते।
किं वा घटे पृथक्सत्त्वं तत्स्थमेव निरीक्ष्यते ॥ ८७६ ॥

आद्ये चैतन्यवत्सत्तासिद्धेस्सिद्धं समीहितम्।
द्वितीये तु चिदैक्यस्यारोपे स स्यान्न चान्यथा ॥ ८७७ ॥

'प्रत्यक्षबाधितं च जगन्मिथ्यात्वम्। सदिति प्रतीयमानत्वात्' इति तत्त्वोद्योतं समर्थयमानः परपक्षे सत्त्वं विकल्प्य दूषणेन, प्रत्यक्षस्य त्रिकालाबाध्यताग्राहकत्वं व्यवस्थापयति **किञ्चेत्यादिभिः**॥ प्रत्यक्षेण प्रतीयमाना सत्ता ब्रह्मगतैवेति वा, ब्रह्मगता प्रपञ्चे आरोपितेति वा, घट इत्येव प्रात्यक्षिकी प्रतीतिः न तु घटः सन्निति वा, पृथक् घटगतैव सत्ता प्रत्यक्षगोचर इति वा इति चतुर्धा विकल्प्य आद्ये दोषमाह **आद्य इति**। **सिद्धमिति** 'यादृशं ब्रह्मणः सत्त्वं तादृशं स्याज्जगत्यपि' इति अस्माभिरपि ब्रह्मगतपारमार्थिकसत्त्वस्यैव प्रपञ्चस्याप्याशासनात्। तदुक्तं परेणापि 'सत्वाच्चावरस्य' इति सूत्रभाष्ये 'यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति एवं कार्यमपि जगत् त्रिषु कालेषु सत्वं न व्यभिचरती'ति। द्वितीयं निराह

चिदैक्यस्येति । सत्ता हि ब्रह्मणः सद्रूपस्य स्वरूपमेव । अतः तदारोपः चिदैक्यारोपं विना न घटते । अतः चिदैक्यारोपोऽपि जगति अङ्गीकार्य इत्याह **सः इति** सत्तारोपः ॥ ॥ ८७५ ॥ ८७६ ॥ ८७७ ॥

उक्तरीत्या चिदैक्यस्यारोपस्स्यात्प्रातिभासिकः ।
न चेतनो घट इति बाधस्याद्यैव दर्शनात् ॥ ८७८ ॥

अस्तु चिदैक्यारोपोऽपि इति तत्राह **नेति** । 'दृश्यते च जगदिदानीं आत्मनो भिन्नत्वेन' इति वादावल्युक्तेः ब्रह्मज्ञानात्प्रागेव चिदैक्यस्य बाधदर्शनात् चिदैक्यं प्रातिभासिकं स्यात् इत्याशयः ॥ ८७८ ॥

प्रातिभासिकसत्ता भूद्घटसत्ताऽपि ते मते ।
अर्थक्रियाया घटकं सत्त्वं नेत्यफलो घटः ॥ ८७९ ॥

अस्तु तदपि इति चेदर्थक्रियाविलोपप्रसङ्ग इत्याह **सफल इति** ॥ ८७९ ॥

घटे चेदुल्लिखेत्सा धीः पारमार्थिकसत्यताम् ।
क्षिपेदसत्यतां तस्य भाविबाधश्च बाध्यते ॥ ८८० ॥

आरोपितत्ववार्ता तु बाधदृष्टेर्न शोभते ॥ ८८१ ॥

अतो जगतो ब्रह्मणो भिन्नत्वेन दृश्यमानत्वेन पारमार्थिकसत्यत्वमेव सेत्स्यति । 'यद्यतो भिन्नत्वेन दृश्यते न तत्तत्रारोपितं, यथा शुक्तिकाया भिन्नत्वेन दृश्यमानं रूप्यं न शुक्तिकायामारोपितं' इति वादावल्याम् उक्तेः । तथा चासत्यतायाः प्रतिक्षेपः, भाविबाधकशङ्काया उन्मूलनं चेत्याह **क्षिपेदिति** ॥ भाविबाधः न प्रत्यक्षेण । अननुभवात् । सत्यः स्तम्भो भवत्येवेति सत्यत्वस्यैव तेनावधारणात् । नानुमानेन । प्रत्यक्षविरोधेन प्राप्तमरणावस्थस्य प्रत्यक्षविरोधेऽक्षमत्वात् । अन्यथा दहनशैत्यानुमानमपि तदुष्णताऽवगाहिप्रत्यक्षबाधेन प्रमाणं प्रसज्येत । नाप्यागमेन । 'न ह्यनुभवविरोधे आगमप्रामाण्यम् । आगमप्रामाण्यानुभवस्यैवाप्रामाण्यप्राप्तेः" इति भगवत्पादोक्तेः । प्रत्यक्षविरोधे

आगमस्यान्यार्थकल्पनाया एव न्याय्यत्वात्। तदुक्तं 'न च प्रत्यक्षसिद्धं अन्येन केनापि बाध्यं दृष्टमि'ति ॥ ८८० ॥ ८८१ ॥

चिद्भिन्नत्वेनैव दृष्टघटादौ जडवस्तुनि।
यत्सत्त्वं दृश्यते तच्च तद्गं स्यान्न तु चिद्गतम् ॥ ८८२ ॥

चिदिति। चिद्भिन्ने जगति चिद्गतासाधारणधर्मस्य तत्सत्त्वस्याप्यभाव आवश्यकः। अतः प्रतीयमानं सत्त्वं जगद्गतमेवेत्याह **तद्गमिति** ॥ ८८२ ॥

चिदसाधारणो धर्मस्सत्ता किल भवन्मते।
चिदन्यत्वग्राहिणी चित्किं तां तत्र न बाधते ॥ ८८३ ॥

न चेत्स्वगतचित्त्वं च कुतो नारोपयेद्घटे।
जातिक्षयो वा गर्भस्य स्रावो वा तद्भवेद्ध्रुवम् ॥ ८८४ ॥

तदेव विपक्षे बाधकोक्त्या स्थिरीकरोति **चिदसाधारणेति न चेदिति च**। चित्त्वस्य जडे आरोपे चित्त्वरूपजातिक्षयः। अनारोपे सत्त्वस्य अनारोपितत्वप्राप्त्या भाविबाधशङ्काया गर्भस्राव इति विवेकः ॥ ८८३ ॥ ८८४ ॥

घटस्थां कुरु तत्सत्तामन्यथाख्यातिरन्यथा ॥ ८८५ ॥

यदि जगति अविद्यमाना सत्ता तत्र विद्यमानत्वेन प्रतीयते, तर्हि असतः सत्त्वेन प्रतीत्यङ्गीकारादनिर्वचनीयख्यातिवादो दत्तजलाञ्जलिः स्यादित्याह **अन्यथेति**। अतः प्रतीयमाना सत्ता जगद्गतैवेति फलितम् ॥ ८८५ ॥

सन्निकर्षाय तत्सत्तां चितिस्साक्षात्कृतिश्च ते।
प्राक्सतीमेव गर्भे स्वे कथमारोपयेद्वद।
अतश्चतुर्थपक्षोऽपि प्रथमं पक्षमन्वगात् ॥ ८८६ ॥

सत्ताया अनारोपितत्वे युक्त्यन्तरमाह **सन्निकर्षायेति**॥ चितिः आवरणनिवृत्त्यर्थं साक्षात्कृतिं अपरोक्षवृत्तिमपेक्षते। अपरोक्षवृत्तिश्च सन्निकर्षार्थं प्राक्सत्तामपेक्षते। अत उभययाऽप्युपजीव्यत्वेन प्रागेवारोपात् सन्निकर्षघटकतया

सिद्धं सत्त्वं कथं पश्चात्तनारोपविषय इति भावः । **गर्भे आरोपयेत्** प्रसुवीत ॥ 'न हि भार्यैव भर्तारं सूते यद्वशतैरपि' इतिं ध्वनिः ॥ **चतुर्थपक्षः** जगति पृथक् ब्रह्मसत्ताभिन्नं व्यावहारिकं सत्त्वमस्तीतिपक्षः । **प्रथमं पक्षं** ब्रह्मण इव प्रपञ्चस्य पारमार्थिकसत्त्वमिति पक्षम् । प्रत्यक्षसिद्धस्य व्यावहारिकस्य अबाध्यताया उपपादितत्वादिति भावः ॥ ८८६ ॥

तृतीये तु घटाद्यर्थे सत्त्वस्यादर्शने जनः ।
तमादत्ते शुक्तिरूप्यं नादत्ते केन हेतुना ।
अप्रसक्तनिषेधश्च कथमन्ते भवेत्तव ॥ ८८७ ॥

तृतीये सत्तात्रैविध्यमते तृतीये प्रातिभासिकत्वे, **अर्थस्य** अर्थक्रियाकारित्वस्य । केन हेतुना आदत्ते इत्यन्वयः । शुक्तिरूप्यं च केन हेतुना नादत्ते इति च । निष्प्रयोजनत्वस्योभयत्र साम्यादिति भावः । **कथमिति ।** अर्थक्रियाऽभावेन शशविषाणायितस्य सत्त्वाप्रसक्तेः तन्निषेधः चरमज्ञानेन अन्ते क्रियमाणः असङ्गत एव स्यादिति भावः ॥ ८८७ ॥

चतुर्थे न तृतीयं तत्सत्त्वं नापि द्वितीयकम् ।
बाधस्य बोधे यल्लोको निश्शङ्कं न प्रवर्तते ॥ ८८८ ॥

ब्रह्मसत्तायाः पृथक्सत्ता जगत्यस्तीति चतुर्थपक्षं पुनः दोषान्तरोक्त्या प्रत्याह **चतुर्थे इति ।** न इति भिन्नं पदम् । तत् प्रतीयमानं तृतीयं सत्त्वं न, एवं द्वितीयमपि सत्त्वं न इति योजना । तत्र हेतुः **बाधेति ॥** उभयत्र सत्त्वस्य परिभाषामात्रत्वादिति भावः ॥ ८८८ ॥

कथं च तन्निषेधोऽन्ते बाध्यसत्त्वोररीकृतेः ॥ ८८९ ॥

कथमिति । "स किं प्रत्यक्षाद्याकलितोऽन्यो वा यो निराक्रियते । आद्ये कथमङ्गीकृतस्य निराकरणम् । अन्यश्चेन्निषिध्यतां न नो हानिः" इति वादावल्युक्तमत्रानुसन्धेयम् ॥ ८८९ ॥

बाध्यसत्त्वनिषेधश्चाबाध्यसत्त्वसम(र्प)र्थकः ।
तादृक्सत्त्वनिषेधेऽपि न सत्किं ब्रह्म ते मते ॥ ८९० ॥

समर्थकः इति। द्वौ नञाविति न्यायेनेति भावः। तत्र निदर्शनं **ब्रह्मेति॥** ८९० ॥

अर्थेन्द्रियाभियोगार्थमारोपद्वितये मते ।
या सत्ताऽऽवश्यकी पूर्वं सा सर्वा पारमार्थिकी ॥ ८९१ ॥

आरोपद्वितये इति व्यावहारिकत्वप्रतिभासकरूपे । प्रातिभासिकत्वपक्षेऽपि अधिष्ठानेन्द्रियसन्निकर्षस्यावश्यकत्वादिति भावः ॥ ८९१ ॥

सदित्येव प्रतीतेश्च व्यावहारिकता कुतः ।
बाधाद्बोध्यो हि तद्भावो बाधश्चाक्षेण बाधितः ॥ ८९२ ॥

व्यावहारिकता बाध्यता । **कुत इति ।** स्वतः प्रामाण्यनिश्चलत्वादिति भावः । तद्भावः बाध्यत्वम् । बाधाभिमतः स्वयं बाधितः उताबाधितः । नाद्यः । तस्य ब्रह्मण इव सत्यत्वस्थापकत्वादित्युक्तम् । न द्वितीयः । असिद्धेः । प्रत्यक्षेण जात्यादिना प्रबलेनैव तस्य बाधात् ॥ ८९२ ॥

प्रत्यक्षबाधे वाक्यस्यैवान्यार्थस्सर्वसंमतः ।
आगमादक्षबाधे स्याल्लक्षणाया बहिष्कृतिः ।
अक्षादागमबाधे तु मिथ्यात्वोक्तिर्वनं गता ॥ ८९३ ॥

लक्षणाया बहिष्कृतिः। तत्त्वमसिवाक्ये, प्रत्यक्षविरोधेनैव हि परेण जहदजहल्लक्षणोक्ता । 'कथमेकत्वमनयोर्घटते विपरीतयोः । प्रत्यक्षेण विरोधोऽयमुभयोरुपलभ्यते' इति। 'ऐक्यं तयोर्लक्षितयोर्न वाच्ययोर्निगद्यतेऽन्योन्यविरुद्धधर्मिणोः" इति च। **वनं गतेति।** मिथ्यात्वमर्थं विहाय प्रत्यक्षानुगुणमर्थान्तरमेव बोधयेदिति भावः ॥ ८९३ ॥

परेण बाध्यं पूर्वं चेत्स्मृत्यबाध्या श्रुतिर्भवेत्।
विधिर्निषेधबाध्यश्चेदहिंसोक्त्या हतः क्रतुः।
वैयाकरणशास्त्रादौ मर्यादा तत्कृता तथा ॥ ८९४ ॥

परेण बाध्यमिति। यथोक्तं न्यायामृते 'परत्वं तु प्रमानन्तरभ्रमे व्यभिचारि' इति। 'तत्परत्वमसिद्धत्वात्परत्वं व्यभिचारतः। निर्दोषताऽन्यथासिद्धेः प्राबल्यं नैव साधयेदि'ति च ॥ [१/१४–११८] **हत इति।** अग्नीषोमीयं पशुमालभेतेति श्रुतेः क्रतुविधायकत्वं न स्यादिति भावः। **तत्कृतेति।** पाणिन्यादिकृता परिभाषा तच्छास्त्रमात्रसंबन्धिनीति भावः ॥ ८९४ ॥

अतः प्राबल्यदौर्बल्ये बाध्यताबाध्यतार्पके।
सर्वोपजीव्यं प्रत्यक्षं सर्वतः प्रबलं महत्।
तद्बाधादनुमा बाध्या शब्दोऽप्यन्यार्थतां व्रजेत् ॥ ८९५ ॥

सर्वोपजीव्यमिति। यत्प्रामाण्यं स्वस्वरूपसिद्ध्यर्थं अपवादनिरासार्थं वा यत्प्रामाण्यायत्तं तत्तस्योपजीव्यम्। तथाविधं च साक्षिप्रत्यक्षमिति भावः। एवं पक्षहेतुसाध्यव्याप्त्यादिग्राहकत्वेन अनुमानं प्रति, शब्दस्वरूपस्य तद्धर्मस्य योग्यतादेः, उपक्रमोपसंहारैकरूप्यादेः ग्राहकत्वेन आगमं च प्रति बाह्यप्रत्यक्षस्याप्युपजीव्यत्वं न्यायामृतोक्तं अनुसन्धेयम् ॥ ८९५ ॥

किञ्च श्रुतिरनादित्वात्पूर्वाऽक्षं तु परं नृणाम्।
अतस्त्वन्यायतोऽप्यक्षमागमस्यैव बाधकम् ॥ ८९६ ॥

पूर्वा अक्षमिति पदच्छेदः। तथा च परेणोक्तं, प्राबल्यहेतुः परत्वं, प्रत्यक्षस्यैवेति भावः ॥ ८९६ ॥

तत्त्वमस्यादिवाक्यं च विधिरूपं कथं महत्।
सत्त्वप्रत्यक्षतस्सत्त्वं यन्निषेधनिषेधनम् ॥ ८९७ ॥

निषेधाप्रतियोगित्वं यतस्सत्त्वं विदो विदुः।
तत्सत्त्वश्रुतितो मिथ्याश्रुतिरासीद्धि दुर्बला ॥ ८९८ ॥

त्रैकालिकनिषेधो हि मिथ्यात्वमिति ते मतम्।
तदभावश्च सत्यत्वं प्राबल्यं कस्य कथ्यताम्॥ ८९९ ॥

निषेद्धृत्वमपि प्रत्यक्षस्यैवेत्याह **तत्त्वमसीति**। निषेधत्वं उपपादयति **निषेधेति**। अनेनैव सत्त्वग्राहिश्रुतेरपि मिथ्याश्रुतेः प्राबल्यं सिद्धमित्याह **तदिति**॥ ॥८९७ ॥ ८९८ ॥ ८९९ ॥

निषेधत्वं परत्वं च द्वयं सत्यत्व एव हि।
प्रतियोगिप्रसक्तौ प्राग्यतः पश्चान्निषेधनम्।
तस्मात्त्वत्प्रक्रिया व्याघ्री स्वतन्तूनेव कृन्तति॥ ९०० ॥

अतः प्राबल्यमेवैकं बाधकत्वे प्रयोजकम्।
तच्चोक्तरीत्या प्रत्यक्षे जितं सत्यत्ववादिभिः॥ ९०१ ॥

प्रकारान्तरेण प्रत्यक्षस्य श्रुत्युपजीव्यत्वमाह **प्रतियोगीति**। येन विना यस्यानुत्थितिः तत्तस्योपजीव्यमिति लक्षणान्तरमाश्रित्येदमिति ज्ञातव्यम्। अस्मिन्पक्षे परीक्षितत्वे सति उपजीव्यत्वं प्राबल्यहेतुरिति ध्येयम्। अनेन प्रतिषेध्यसमर्पकत्वेनोपजीव्यत्वे इदं रूप्यमित्यस्यैव नेदं रूप्यमिति बाधकज्ञानं प्रत्युपजीव्यं स्यादिति वाचस्पत्युक्तातिप्रसङ्गस्य नावकाशः। तदुक्तं 'यावच्छक्तिपरीक्षायामुपजीव्यस्य बाधने। दोषो नाशोधिते दोष उपजीव्यत्वमस्त्वलमि'ति ॥ ९०० ॥ ९०१ ॥

अतो घटादिरर्थोऽयं प्रत्यक्षेण प्रदृश्यते।
तद्दृष्टं पारमार्थ्यं च तत्स्थमेवेति सुस्थितम् ॥ ९०२ ॥

अतः प्रत्यक्षे क्लृप्तदोषाणामभावात्। अज्ञाननिवर्तकत्वेनाङ्गीकृते अज्ञानाख्यदोषस्यापि शंकाऽनास्पदत्वात्। तदुक्तं तत्वोद्योते 'चन्द्रप्रादेशादि-

विषयं तु दूरस्थत्वादिदोषयुक्तत्वादपटु । न च जगत्प्रत्यक्षस्यापटुत्वे किञ्चिन्मानम्' इति ॥ ९०२ ॥

जडे नाज्ञानदोषोऽस्ति न च काचादि दृश्यते ।
अज्ञानोन्मूलनं सत्त्वप्रत्यक्षं प्रबलं हि तत् ॥ ९०३ ॥

अप्रामाण्यस्वतस्त्वं तु तवापि न ममापि न ।
दोषाभावे प्रमाणस्य प्रामाण्यं सुस्थमेव तत् ॥ ९०४ ॥

जड इति 'अप्रकाशस्वरूपत्वाज्जडेऽज्ञानं न मन्यते' इत्युक्तदिशा जडेऽज्ञानानङ्गीकारात् प्रामाण्यं सुस्थमेव । तस्य च अर्थसत्ताघटितत्वेन विषयस्य त्रिकालाबाध्यत्वमेव सिध्यतीति भावः ॥ ९०३ ॥ ९०४ ॥

अज्ञानेनावृतब्रह्मगोचरात्स्वैरिणीसुतात् ।
तेऽन्त्यप्रत्यक्षतो विश्वप्रत्यक्षं प्रबलं हि नः ॥ ९०५ ॥

अज्ञानेनावृतेति । सर्वशब्दावाच्यस्य अत एवालक्ष्यस्य च शुद्धस्य शब्दाविषयत्वात् । प्रत्यक्षसामग्री प्रत्यक्षस्य माता । तां विहाय शब्दसामग्री—रूपान्यसामग्रीजन्यत्वस्य परेणोक्तत्वात् चरमप्रत्यक्षस्य स्वैरिणीसुतत्वमुक्तम् ॥ सुतादिति मुखत उक्तम् । श्रुतिरूपस्वैरिण्याः प्रत्यक्षजनकत्वस्यैवासंभवेन वन्ध्यासुतादित्याशयः ॥ ९०५ ॥

अज्ञाननाशिनी साक्षात्कारवृत्तिस्तवैव हि ।
सैव प्रमा मम मते दोषोऽस्यास्तेन तच्च न ।
न ह्यन्धकारो दोषस्स्यात्क्रूरभास्करतेजसः ॥ ९०६ ॥

पररीत्यैव घटविषयकापरोक्षवृत्तेः निर्दोषत्वं प्रामाण्यं च साधयति **अज्ञाननाशिनीति** । अपरोक्षज्ञानं जडत्वादज्ञानानावृतमिति, प्रतिकर्मव्यवस्था-निर्वाहार्थं अज्ञाननाशकमिति च त्वयैवाङ्गीकृतम् । तस्मात्तत् निर्दोषं प्रमाणम् । तत्र दृष्टान्तः **भास्करेति** अन्धकारानावृतत्वात् अन्धकारनाशकत्वाच्च भास्करतेजसो यथा प्रकाशकत्वं तथेति भावः ॥ ९०६ ॥

त्वयाऽप्यज्ञाननाशे हि दृशो भ्रान्तित्वमुच्यते ।
तस्मादज्ञानतो दोषो न वृत्तौ नापि ते दृशि ॥ १०७ ॥

काचादिर्नाक्षदोषोऽस्ति दूरत्वाणुत्वपूर्वकः ।
नार्थदोषोऽपि वृत्तौ मे सन्निकृष्टार्थदर्शने ॥ १०८ ॥

भ्रान्तित्वं ज्ञातो मया घट इत्येवं भ्रमात्मकत्वम् । **तस्मात्** वृत्तेरज्ञाननिवर्तकत्वात्, ज्ञानदशायां अधिष्ठानदृशः अज्ञानानावृतत्वात् ॥ १०७ ॥ ॥१०८॥

वृत्तिनाश्यं च तेऽज्ञानं त्वद्रीत्यैव न दूषणम् ।
नावृणीते जडं विश्वं तद्वृत्तिरकुतोभया ॥ १०९ ॥

यत् यन्निवर्तकं न तस्य तद्दोषः यथा अन्धकारः भास्करतेजस इति व्याप्तिं सूचयति **वृत्तिनाश्यमिति** । अज्ञानं इत्यनुकर्षः । जडं विश्वं नावृणीते इति योजना । अप्रकाशस्वरूपत्वादिति तत्प्रक्रिया । **तत्** तस्मात् अज्ञाननाशकत्वात्, अज्ञानानावृतत्वाच्च ॥ १०९ ॥

दोषादारोपवादे तु हता त्वत्प्रक्रियातटित् ।
दोषं विनापि चारोपे हता त्वत्प्रक्रियातटित् ॥ ११० ॥

दोषादिति । अयं घटः इति वृत्तेरज्ञाननिवृत्युत्तरकालीनत्वात् न भ्रमत्वम् । **दोषं विनेति ।** प्रामाण्यस्य परतस्त्वापत्तेरिति भावः ॥ ११० ॥

उपजीव्यं तु सर्वस्य विश्वप्रत्यक्षमेव ते ।
सर्वोपकारि तद्बाधं कस्सुधीरभिधित्सति ॥ १११ ॥

उपजीव्यं इति । तत्प्रकारः प्रागुक्तः । अथवा सर्वेषां प्राणिनां अन्नपानाद्यर्थक्रियाकारिपदार्थज्ञापनेन उपजीव्यम् । तदुक्तं तत्त्वोद्योते 'न हि युक्तिपराजितः क्षुधितो नान्नमत्ति । न ह्यन्नत्वे दुर्घटे तस्यानन्नत्वं भवती'ति । 'न

चानुभवविरोधे आगमप्रामाण्यम् । आगमप्रामाण्यानुभवस्यैवाप्रामाण्यप्राप्तेरि'ति च तत्त्वनिर्णये ॥ ९११ ॥

निष्प्रकारं तवाध्यक्षमखण्डार्था च ते श्रुतिः ।
कस्य वा बाधके स्यातां साधके वा विचारय ॥ ९१२ ॥

सत्त्वस्याप्रतिषेधेन त्रिकालास्पर्शनादपि ।
अखण्डार्थपरत्वाच्च त्रेधा वाक्यं न बाधकम् ।
निष्प्रकारकरूपं ते प्रत्यक्षं च न बाधकम् ॥ ९१३ ॥

बाधकाभिमतयोः चरमसाक्षात्काराद्वैतश्रुत्योः बाधकत्वव्यापकधर्मविकलत्वाद्बाधकत्वमेव न संभवतीत्याह **निष्प्रकारमित्यादिभिः**। यथोक्तं न्यायामृते [१-१४/१३१] 'अपि च भ्रमकालीनापरोक्षबुद्ध्यविषयविशेषविषयैव धीर्वायिका न च तव विश्ववाधिका धीस्तद्विषया। किञ्च सप्रकारैव धीर्वाधिका। निर्विकल्पकायाः सप्रकारकभ्रमाविरोधित्वात् । न च ते विश्वबाधिका धीः सप्रकारिका इत्यादि । **त्रिकालास्पर्शनादिति** । नेह नानास्तीति लटा वर्तमानकालमात्रस्पर्शादिति भावः। इदमुपलक्षणम्। अद्वैतवाक्यानामबोधकत्वस्यैव परैरङ्गीकाराच्चेति बोध्यम्। तथाहि तद्वाक्यं "ज्ञानं च तस्मिन्परात्मभावनिवृत्तिरेव। ——— । तज्ज्ञानं नैव जायते ।केवलं अज्ञाननिवृत्तिरेव भवति" इत्यादि। [भे. प. ब्र. सू. पु. ७६] ॥ ९१२ ॥ ९१३ ॥

भग्नदन्ताऽभवत्पूर्वं द्विधा ते श्रुतिपन्नगी ।
अन्ते दन्तोन्मूलनेन सा भूदप्रतिवादिनी ॥ ९१४ ॥

भग्नदन्ता। निषेधः कालत्रयस्पर्शः इति दन्तयोः भङ्गवती। **उन्मूलनेनेति**। बोधकत्वस्यैवाभावात्। इदमित्थमिति हि सकारकमेव सर्वज्ञानम्। एवं वाक्यत्वस्यैवाभावाच्च। न्यायामृतोक्तरीत्या आकांक्षासन्निधियोग्यतानां प्रत्येकं अन्वयघटितलक्षणत्वेन अखण्डार्थपरत्वे संसर्गासङ्गित्वेन वाक्यलक्षणस्यैवाभावादित्यपि ध्येयम् ॥ ९१४ ॥

सन्दिग्धमूला सन्दिग्धरूपा तेऽध्यक्षपन्नगी ।
दन्तात्यन्ताभावचिन्ताक्रान्तस्वान्ता बिलेऽपतत् ॥ ९१५ ॥

बाध्यत्वव्यापकधर्माभावात् सत्त्वग्राहिप्रत्यक्षस्य बाध्यत्वमपि न संभवति । तदुक्तं न्यायामृते "किञ्च दोषजन्यमेव ज्ञानं बाध्यम् । न साक्षिप्रत्यक्षं तज्जन्यम् । अद्वैतज्ञाने तु श्रुतितात्पर्यभ्रमो दोषः । किञ्च बाधकतुल्यमानसंवादि न बाध्यम् । द्वैतप्रत्यक्षं चाद्वैतश्रुतितुल्यद्वैतश्रुतिसंवादि । किञ्च बाधकधीबोध्यं न बाध्यम् । भेदश्च बाधकधीबोध्यः इत्यादि । तदेतदभिप्रेत्याह **सन्दिग्धमूलेत्यादिना** । मूलं आरोपस्य अधिष्ठानतत्त्वाज्ञानं । तच्चात्र नास्ति । 'अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत् । सर्वापरोक्षविद्विष्णुः विश्वदृक् तन्न तन्मृषे'ति भगवत्पादोक्तेः । निष्प्रकारकस्यासंभवात् सन्दिग्धरूपा । उभयत्रापि सन्दिग्धशब्दः अत्यन्तासदर्थको ज्ञेयः । **अध्यक्षं** चरमसाक्षात्कारः । **बिलेऽपतदिति** । 'मा दर्पं मायिसर्पा भजत भजत तास्ता गुहा द्वाग्द्विजिह्वा' इति वचनात् ॥ ९१५ ॥

विश्वप्रत्यक्षनागेन्द्रो द्विजिह्वमुखकोटिभिः ।
अर्थाननन्तांस्तत्सत्तामप्यास्वाद्य दिने दिने ॥ ९१६ ॥

विश्वप्रत्यक्षं शेषौपम्येन स्तौति **विश्वेति** ।घटः सन्निति पदार्थस्य तत्सत्तायाश्चेति प्रत्येकं द्वयविषयीकरणात् द्विजिह्वेत्युक्तम् । अनन्तजीवराशिसंबन्धितया **कोटिभिरिति** ॥ ९१६ ॥

अच्छेद्यक्रूरदंष्ट्रोग्रो रिपुपक्षभयङ्करः ।
दाधर्ति जगतीमेतां योऽधस्तात्फणिशायिनः ॥ ९१७ ॥

अन्येन विजातीयेनाबाध्यत्वादच्छेद्येत्युक्तम् । 'न हि प्रत्यक्षसिद्धमन्येन केनापि बाध्यमि'त्युक्तेः । **दाधर्ति** जगतः सत्यत्वं स्थापयति । **अधस्तादिति** सदागमैकवेद्यस्य प्रत्यक्षाविषयत्वादिति भावः ॥ ९१७ ॥

भक्तानुकम्पया स्वान्तस्सूपविष्टं निशाऽत्यये ।
छत्रीभूतफणारत्नशोभोद्भूतदृशेक्षते ॥ ९१८ ॥

स्वयमव्यक्तस्वभावोऽपि भगवान् श्रुतिमतिनियतध्यानयोगात् प्रसन्न आत्मानं व्यक्तीकुरुत इत्याह **भक्तेति**। स्वान्तःसंस्थितहृदयकमलकर्णिकानिहितम्। **निशाऽत्यये** 'अथान्ये प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते' इत्युक्तावरणद्वयापगमे। **छत्रीभूतेति** अतीन्द्रियार्थे प्रत्यक्षस्योपजीव्यभूतेत्यर्थः। **फणाः** वेदविविधशाखाः। 'बहुशाखाफणसूनरत्नकं' इति सुमध्वविजयोक्तेः। **रत्नानि** तत्प्रतिपाद्य वैराग्यभक्त्यादिसाधनानि। **शोभा** परिपाकः। शेषविषये निशा प्रलयः। उपविष्टं सृष्टेरुन्मुखम् ॥ ११८ ॥

किञ्च ते ब्रह्मदृक्चैकविज्ञानेनाखिलस्य च।
विज्ञानं किल तद्ब्रह्म विज्ञानं सर्वसाधकम्।
अतोऽप्यबाधितं विश्वमिदमासीदनाकुलम् ॥ ११९ ॥

'येनाश्रुतं श्रुतं भवति' इति एकविज्ञानेन सर्वविज्ञानं भवतीति श्रौतप्रतिज्ञाऽन्यथानुपपत्त्या ब्रह्मजगतोरभेदः सिध्यतीति परैर्व्याख्यातम्। तथा च तद्रीत्यैव ब्रह्माभिन्नस्य जगतः सत्त्वसिद्धिरित्याह **किञ्चेति** ॥ ११९ ॥

अन्त्यप्रमायां तद्ब्रह्मसमबोध्यत्वतो जगत्।
तस्यामबाध्यत्वतो वा निष्प्रकारकतामते।
ब्रह्मवत्परमार्थं स्यादिति सर्वं मनोरमम् ॥ १२० ॥

तत्र हेतुः **समबोध्यत्वत इति**। तत्रैव हेत्वन्तरं **तस्यामिति** ॥ सप्रकारकमेव बाधकं दृष्टम्। न च निष्प्रकारकजन्येन सप्रकारेण बाधः। तस्य चरमत्वाङ्गीकारात् ॥ ॥१२० ॥

प्रत्यक्षसाधितार्थस्य नानुमा बाधिका भवेत्।
कालत्ययापदिष्टत्वं दोषो यत्सर्ववादिनाम्।
महादण्डप्रहाराग्रे किं मृद्भाण्डशतेन ते ॥ १२१ ॥

'अस्त्वनुमानमेव बाधकं प्रत्यक्षस्येति चेन्न। प्रत्यक्षविरोधेन प्राप्तमरणावस्थस्य प्रत्यक्षविरोधेऽक्षमत्वात्' इति वादावल्युक्तमाह **प्रत्यक्षेति**॥ ॥१२१॥

धर्मिग्राहि ममाध्यक्षमुपजीव्यतया महत्।
तद्विरोधेऽनुमानानां कोटिः कीटायते तव।
न चेत्कालान्तरे वह्निश्शीतस्स्यादनुमानतः ॥ १२२ ॥

प्रत्यक्षस्य स्वतःप्रामाण्यमभ्युपगम्य तस्योत्तरकालीनबाधाभावाग्राहकत्वं वदतोऽतिप्रसङ्गमाह **न चेदिति**॥ १२२ ॥

दृढप्रत्यक्षसिद्धार्थमागमो न तु बाधते।
तथा सति वृथैव स्याद्वृत्त्यन्तरकथाऽऽगमे ॥ १२३ ॥

वृत्यन्तरकथा। 'पूर्वायोगे परिग्रहः' इति कथा। आश्रितं च वृत्त्यन्तरं परेणापि लक्षणादिकं तत्र तत्र प्रत्यक्षविरोधभिया 'अहं ब्रह्म' इति बृहदारण्ये 'मत्कर्तृकं वेदाध्ययनं' इति अर्थान्तरं भाषमाणेन॥ १२३ ॥

आदित्यस्यैव यूपत्वे द्युमणिर्भूमणिर्भवेत्।
अनुमानममानं ते वाक्यमन्यार्थगामि तत् ॥ १२४ ॥

'क्व च प्रत्यक्षतः प्राप्तमनुमागमबाधितम्' इति अनुव्याख्यानोक्तमाह **आदित्यस्येति**॥ १२४ ॥

निर्दोषाक्षोद्भवं ज्ञानं तत्त्ववेदनमेव हि।
काचादिदोषाभावस्तु तवापि च ममापि च।
जडमात्रेऽपि नाज्ञानं चक्षुश्चाज्ञानवैरि ते ॥ १२५ ॥

वेदनं ज्ञापकं ॥ **चक्षुः** अपरोक्षवृत्तिः॥ १२५ ॥

अतत्त्वावेदकत्वोक्तिः प्रत्यक्षादौ ततस्तव ।
सत्त्वग्राहित्ववैरेण केवलं निर्निमित्ततः ॥ १२६ ॥

निर्निमित्ततः अपरतत्त्वप्रद्वेषनिमित्ततः ॥ १२६ ॥

घटेऽप्यज्ञाननाशाय साक्षात्कारमपेक्षसे ।
परोक्षज्ञानमस्पष्टमयं स्पष्टतरः किल ॥ १२७ ॥

अपेक्षसे अपरोक्षवृत्तावेव चैतन्यप्रतिफलनस्य तत एवावरणनिवृत्तेरङ्गीकारात् । **किलेति** तदगृहीतरेखोपरेखादिग्राहकत्वेन तदनिवर्त्यदिङ्मोहादिनिवर्तकत्वेन च प्रसिद्धं इति भावः ॥ १२७ ॥

अनुमानस्यागमस्य तत्र दौर्बल्यमब्रवीः ।
इदानीं कथमाशास्से दुर्बलात्प्रबलक्षयम् ॥ १२८ ॥

तत्र अनुमानागमजन्यपरोक्षवृत्तेः अज्ञानानिवर्तकत्वं अपरोक्षवृत्तेरेव च तन्निवर्तकत्वं वदन् प्रतिकर्मव्यवस्थां निरूपयन् । **इदानीं** नेहनानेत्यादिश्रुत्यर्थकथनावसरे । शशशावकः पंचास्यं बाधते इति तव दुराशामात्रं इति भावः ॥
॥१२८ ॥

निर्विकल्पकरूपं तु ज्ञानमत्यन्तदुर्बलम् ।
प्रवृत्तेश्च निवृत्तेश्च निमित्तं नैव तत्किल ॥ १२९ ॥

विवदन्ते यत्स्वरूपे वादिनस्तत्त्ववादिनः ।
विशिष्टज्ञानगम्योऽसौ तदभावेऽष्टमो रसः ॥ १३० ॥

निर्विकल्पस्य प्रत्यक्षस्य शब्दजन्यत्वासंभवात् सप्तमो रसः । स्वयं चरमत्वेन तज्जन्यस्य तदनुमापकस्य सविकल्पकस्याभावादष्टमो रसः । न तादृशेन पीनतासाधनं वा कृशताबाधनं वा संबोभवीतीति भावः ॥ १२९ ॥ १३० ॥

दशमस्त्वमसीत्यस्मिन्दशमत्वविशिष्टधीः ।
दृष्टा दृष्टान्तवाक्ये ते तन्महोदरमातरि ॥ १३१ ॥

गर्भमाशङ्कसेऽन्ध त्वं नात्र पुत्रो विचारणे ।
परोक्षज्ञानकरणान्न प्राहुर्निर्विकल्पकम् ॥ १३२ ॥

दृष्टा शब्दानां संसर्गसंसर्गिधीजननस्वाभाव्यात् । **महोदरः** विशिष्टज्ञानम् । तस्य **मातरि** जनके । **गर्भं** अपरोक्षज्ञानजननहेतुत्वम् ॥ **न प्राहुरिति।** यथोक्तं वादावल्यां 'न ह्यनुत्पादकादुत्पद्यत इति संभवति । नाप्यन्योत्पादकादि'ति ॥ ॥ १३१ ॥ १३२ ॥

वन्ध्यासुतादेडमूकात्का भीतिः प्रतिवादिनाम् ।
अतस्त्वत्प्रक्रिया सर्वा व्याहतेति मतिर्मम ॥ १३३ ॥

वन्ध्या शब्दः **एडमूकः** साधनबाधनासमर्थः । **सर्वा** शब्दः अखण्डार्थपर इति प्रत्यक्षं निर्विकल्पकं इत्यादिरूपा ॥ १३३ ॥

सत्त्वप्रत्यक्षपार्थस्तदपार्थीकुरुते रिपुम् ।
अखण्डार्थमते निर्विकल्पकत्वमते न च ।
मिथ्यात्वोल्लेखि मानस्य श्रोता कर्णो न यद्भुवि ॥ १३४ ॥

पार्थः तत्त्वनिर्णयः । 'उपजीव्यविरोधे तु न प्रामाण्यममुष्य च'। इति ब्रह्मतर्कवचनेन उपजीव्यप्रत्यक्षविरोधे आगमस्य न तदर्थे प्रामाण्यं इति प्रत्यक्षस्य प्राबल्यं समर्थयमानः ॥ **रिपुं** अखण्डार्थादिकुवादम् । **अपार्थीकुरुते** साधनासमर्थं तनुते ।यथा अर्जुनः कर्णं भग्नसंकल्पं कृतवांस्तथेति ध्वनिः ॥ **कर्णः श्रोता न** तादृशशब्दस्यैवाभावात् पुरुषः श्रवणेन्द्रियेण वन्ध्यासुतवाक्यमिव न जातु शृणोतीति भावः । करणे कर्तृत्वोपचारः विषयस्यैवाभावरूपातिशयद्योतनार्थः । तदुक्तं द्वैतद्युमणौ 'यो यादृशफलमुख्यकर्तृतुल्यतया तदवान्तरकारणनिर्देशकर्ता प्रेक्षावान् स प्रकृतकार्यानुकूलातिशयबोधतात्पर्यवानि'ति ॥ १३४ ॥

अतिदूरत्वादिदोषग्राहिणा साक्षिणैव वा।
परीक्षायुक्तसुदृढप्रत्यक्षान्तरतोऽपि वा।
बाधे तु लब्धावसरस्तत्राऽन्योऽप्यवतिष्ठते ॥ १३५ ॥

ननु चन्द्रः प्रादेशपरिमित इति प्रत्यक्षं आगमेन, नभोनैल्यग्राहिप्रत्यक्षं च अमूर्तानुमानेन बाधितं दृष्टम्। तत्कथं 'न हि प्रत्यक्षसिद्धं अन्येन केनापि बाध्यं दृष्टमि'त्युक्तिरित्यत आह **अतिदूरस्थत्वादीति**। **साक्षिणा** यद्दूरस्थवस्तुविषयकं तत्परिमाणादौ अयथार्थं इति व्याप्तिग्राहकेण। **सुदृढप्रत्यक्षत इति** समीपं गत्वा परीक्षायां तत्रैव नैल्याभावग्राहकेणेत्यर्थः। तदुक्तं 'चन्द्रप्रादेशत्वादि विषयं तु दूरस्थत्वादि दोषयुक्तत्वादपटु' इति। अपटु प्रवृत्तिजननासमर्थम्। 'नभोनैल्यग्राहिप्रत्यक्षममूर्तानुमानेन बाधितं दृष्टमिति चेन्न। तत्राप्याप्तवाक्यादिनैव बाधाभ्युपगमेनासंप्रतिपत्तेरि'ति। दृढप्रत्यक्षानुगृहीतागमेन इत्येव तत्राप्यभिप्रायः। भूताकाशे नैल्यग्राहियोगिप्रत्यक्षं तु प्रमाणमेवेति बोध्यम्। तदुक्तं तत्त्वोद्योतटीकायां 'ततः परं प्रवर्तमानौ अनुमानागमौ प्रागेव तेन दत्तावकाशौ बाधकाविवोच्येते' इत्यादि ॥ १३५ ॥

दृढप्रत्यक्षबाधाय नालं मानसहस्रकम्।
प्रत्यक्षस्य पृथङ्मानं किमित्याभाणकं स्मर॥ १३६ ॥

पृथङ्मानं स्वभावतः जात्यादिना च प्रबलादन्यदनुमानादिकम्। तदुक्तं ब्रह्मतर्के 'बल्येवाऽनुभवस्तत' इति ॥ १३६ ॥

सर्वापलापी चार्वाकोऽप्याह प्रत्यक्षमानताम्।
तस्याप्यमानतां यस्तु ब्रूते सोऽत्यन्तगर्हितः ॥ १३७ ॥

दूरस्थदीर्घवृक्षस्य ह्रस्वता दृश्यतेऽखिलैः।
अतः प्रमाणग्रहणे सिद्धो दोषोऽतिदूरता ॥ १३८ ॥

अत्यन्तगर्हितः नास्तिकनास्तिकः। तदुक्तं 'प्रत्यक्षेक्षाऽक्षमः पक्षं कमेवात्राभिवीक्षते' इति ॥ १३७ ॥ १३८ ॥

देशस्य विप्रकर्षश्च दूरता नाम नापरा।
देशस्य साक्षिवेद्यत्वाद्दोषोऽसौ साक्षिगोचरः॥ १३९ ॥

अतिदूरत्वदोषस्य ग्राहिणा साक्षिणैव तत्।
दत्तेऽवकाशे चन्द्रस्य प्रादेशत्वादि बाध्यते ॥ १४० ॥

देशस्य अव्याकृताकाशस्य ।साक्षीति ।अरूपिद्रव्येषु चक्षुर्व्यापारायोगादिति भावः ॥ १३९ ॥ १४० ॥

तत्रापि वाक्यमात्रेण प्रत्यक्षस्य न बाधनम्।
बलिना साक्षिणाध्यक्षमुत्पत्तावेव शिक्ष्यते ॥ १४१ ॥

अध्यक्षं बाह्यप्रत्यक्षं उत्पत्तावेव बाधितप्रायमेव जायते ॥ १४१ ॥

दृढप्रत्यक्षबाधाय वाक्यं क्वापि न शक्नुते।
न चेत्सिंहो देवदत्तो यज्वा स्यात्प्रस्तरोऽपि च॥ १४२ ॥

लक्षणावृत्तिभङ्गात्तद्वाक्यं नाक्षस्य बाधकम्।
नानुमाऽप्यस्य कालात्ययापदिष्टस्य नष्टितः ॥ १४३ ॥

यज्वा यजमानः। तथा च प्रस्तरं जुहुयादिति वाक्यशेषेण यजमानस्यैव हवनप्रसङ्गः ॥ १४२ ॥ १४३ ॥

विस्तरोऽस्य प्रमेयस्य मूलग्रन्थामृतार्णवे।
बुद्धावारोहसिद्ध्यर्थं संग्रहोऽयं ततस्ततः ॥ १४४ ॥

सत्त्वप्रत्यक्षबाधे हि मिथ्यात्वार्था श्रुतिर्भवेत्।
बाधितोऽर्थस्तु वाक्यस्य तवापि न ममापि न॥ १४५ ॥

बुद्धौ शिष्याणामिति शेषः। आरोहः स्थिरीकरणम्॥ १४४ ॥ १४५ ॥

मिथ्यात्वार्थश्रुतिबलादेवाक्षस्यास्य बाधनम्।
न हि सार्वजनीनेऽस्मिन्प्रत्यक्षे बाधकान्तरम्।
एवं चान्योन्याश्रयाख्यदोषो न स्यात्कथं वद ॥ १४६ ॥

न चेन्माणवकादेव गृहदाहो भवेत्तव।
अग्निर्माणवकस्येति यतो वागस्ति वैदिकी ॥ १४७ ॥

अन्योन्याश्रयेति। न च वैपरीत्यम् शंक्यं। प्रत्यक्षस्य प्राबल्येन, तत्रागमविरोधस्याकिञ्चित्करत्वादिति ध्येयम् ॥ १४६ ॥ १४७ ॥

सर्वमाननिषेद्धाऽपि न प्रत्यक्षं निषेधति।
सत्त्वप्रत्यक्षमेतस्मात्तत्त्वप्रत्यक्षमेव हि ॥ १४८ ॥

निषेद्धा चार्वाकः। एतस्मात् सर्ववादिसंप्रतिपन्नत्वात् ॥ त्वयाऽपि अर्थक्रियाकारित्वरूपव्यावहारिकसत्वाङ्गीकारात् तस्यैव च तात्त्विकसत्त्वरूपत्वात् ॥ १४८ ॥

तस्माद्दृष्टव्यवस्थाया वाक्यमात्रेण वारणम्।
निवारणं स्वकीयस्य पाण्डित्यस्यैव केवलम्।
अन्योन्याश्रयदोषाज्ञे कथं दोषज्ञता भवेत् ॥ १४९ ॥

यदि दृष्टं समस्तं च वाक्यं शक्नोति बाधितुम्।
महावाक्यशतैस्तर्हि विशिष्टैक्यं कुतो न ते।
मुख्यं जडाजडैक्यं च वाक्यैस्तैः किं न साध्यते ॥ १५० ॥

'दुःखादेर्यदि मिथ्यात्वं तद्वाक्यस्याग्रतो भवेत्' इति व्युत्पादितं अन्योन्याश्रयमपि दोषमजानानः कथं दोषज्ञः पण्डितो भवेत्। 'दोषज्ञः पण्डितः कविः' इत्यमरः ॥ महावाक्येति। अयं भावः। विवरणरीत्या जीवब्रह्मैक्यमेव विषयोऽस्तु। चिन्मात्रे लक्षणा तु माऽस्तु। न च प्रत्यक्षानुमानविरोधः। आगमार्थविरोधेन तयोरेवातत्त्वावेदकत्वोपपत्तेः। तथा चाध्यासवादानुपपत्तिः

इति ॥ वाक्यैः सर्वं खल्विदं ब्रह्म इति जडाजडस्य सर्वस्य ब्रह्मैक्यवादिभिः ॥ ॥ १४९ ॥ १५० ॥

सर्वं ब्रह्मेति वाचो हि सर्वस्य ब्रह्मरूपता ।
मुख्यार्थस्स तु जीवेऽपि नैवाङ्गीक्रियते त्वया ।
प्रत्यक्षबाधने शक्तेरभावो ह्यत्र कारणम् ॥ १५१ ॥

ननु सर्वशब्दे सङ्कोचेन न जडग्रहणमिति चेन्न । इदंशब्दसमभिव्याहारेण दृश्यमानजडग्रहणावश्यंभावात् । अस्तु वा सङ्कोचः । तथाऽपि जीवैक्यस्याप्यर्थस्य त्वयाऽनङ्गीकाराच्च इत्याह जीवेऽपीति ॥ १५१ ॥

जहती सर्वधर्मांश्च पदार्थद्वितयेऽपि हि ।
विशेष्यमात्रमजहत्यप्रसिद्धैव लक्षणा ।
तत्राङ्गीक्रियते श्रुत्या प्रत्यक्षस्य विरोधतः ॥ १५२ ॥

प्रत्यक्षस्येति । 'कथमेकत्वमनयोर्घटते विपरीतयोः । प्रत्यक्षेण विरोधोऽयमुभयोरुपलभ्यते' इति परेणैवोक्तेः ॥ १५२ ॥

दृढप्रत्यक्षबाधायाप्यलं वाग्यदि वैदिकी ।
कुतस्स्वोक्तार्थसङ्कोचं महावाक्सहते तव ॥ १५३ ॥

महेति मुख्यार्थासहत्वे हेतुगर्भं विशेषणम् । तादृशमपि चेत् प्रत्यक्षविरोधाद् बिभेति तदितरेषां का कथा इति ध्वनितम् ॥ १५२ ॥ १५३ ॥

जडाजडे तु प्रत्यक्षबाधात्सापि न गृह्यते ।
तत्र तद्व्यतिरेकेणासत्त्वमेव निगद्यते ।
भीता विरोधिप्रत्यक्षात्तद्बाधे त्वक्षमैव सा ॥ १५४ ॥

श्रुतिस्स कृच्छ्रुताऽपि त्रीनर्थान्भेजे त्वदाज्ञया ।
विरम्य व्यापृतिश्शब्दे दोषो भूषायते तव ॥ १५५ ॥

'सर्वं खल्विदं ब्रह्म' इति वाक्ये सर्वपदार्थं जडाजडत्वेन भित्त्वा, जडस्य असत्त्वं जीवानां अभेद इति अर्थद्वयं परेणोच्यते। एवं अर्थभेदनेऽपि न प्रत्यक्षविरोधान्निमित्तान्तरमित्याह **जडेति। विरम्य व्यापृतिः** स्थित्वा स्थित्वा व्यापारः। स च बुद्धिपूर्वा नाचेतने शब्दे संभवतीत्याह **दोष इति** ॥ १५४ ॥ १५५ ॥

प्रत्यक्षतो जडे जाड्यमज्ञताऽऽद्यं च चेतने।
सिद्धं यथाश्रुतैक्यस्य तद्विरोध्यक्षमेव हि ॥ १५६ ॥

अतोऽध्यक्षभयान्मुख्यमैक्यं वाक्यार्थमुत्सृजन्।
सत्त्वाध्यक्षभयान्मिथ्यात्वार्थत्वं च त्यजोदितम् ॥ १५७ ॥

प्रत्यक्षविरोधो जडैक्यस्य तन्मिथ्यात्वस्य चाविशिष्टः। तत्र ऐक्यमर्थं परित्यज्य मिथ्यात्वार्थस्य स्वीकारे अर्धजरतीयन्याय इत्याह **प्रत्यक्षत इति** ॥ ॥ १५६ ॥ १५७ ॥

एकं सन्धित्सतोऽन्यत्ते च्यवते तत्र संशयः।
तस्मात्त्वमुष्ट्रलगुडन्यायाद्धन्त हतोऽस्यहो ॥ १५८ ॥

उष्ट्रलगुडन्यायादिति ॥ उपर्युपविष्टेन ताडने दीर्घत्वाद्ग्रीवाया एव ताडनं कृतं भवति इति यः न्यायस्तेनेति भावः। मिथ्याश्रुतेः यथाश्रुतार्थेन दण्डेन सत्त्वरूपार्थस्य ताडनोद्योगे त्वदभिमतमुख्यार्थपरित्यागरूपग्रीवाया एव बाधः। तथा च विशिष्टैक्यस्य जडैक्यस्य चाङ्गीकारापत्तिरिति भावः ॥ १५८ ॥

एवं प्रत्यक्षहर्यक्षभयेन श्रुतिभिस्सह।
पलायमानो हित्वार्थान्दोषपङ्काऽऽविलस्थले ॥ १५९ ॥

पतितोऽसि तथाऽप्यक्षं श्रुत्या बाधितुमिच्छसि।
पूर्वोत्तरविरोधाख्यदोषोऽगाधह्रदो हि ते ॥ १६० ॥

अर्थान् जीवैक्यं जडमिथ्यात्वं इत्यादिकान्। हित्वा श्रुतिभिः सह पलायमानः शङ्काविले पतितोऽसि इति उत्तरश्लोकेनान्वयः। शङ्का पूर्वोत्तरविरोधभयेन किमैक्यं

परित्याज्यं उत मिथ्यात्वं इत्येवंरूपा। प्रत्यक्षविरोधावधीरणेऽपि पूर्वोत्तरविरोधो वज्रलेप इति भावः ॥ ९५९ ॥ ९६० ॥

अतः प्रत्यक्षबाधाऽऽशां मुञ्च शक्तिं विचारय।
शक्तप्रत्यक्षशरणः श्रुतिमर्थान्तरे नय ॥ ९६१ ॥

शक्तिं जात्यादिभिः उपजीव्यतश्च प्राबल्यम्। **अर्थान्तरे** सर्वव्यापकत्व-सर्वनियामकत्वादिरूपे ॥ ९६१ ॥

पतिं त्यक्त्वा गतायास्तु जारेषु नियमः कुतः।
अस्माकं त्वनुशिष्टार्थपरा न स्वैरिणी श्रुतिः ॥ ९६२ ॥

पतिं मुख्यार्थः। **जारः** अमुख्यार्थः। जाराश्रयणेऽपि जडैक्यं वा स्वीकार्यं उत जडवत् जीवानामेव मिथ्यात्वं स्वीकार्यं इति दोषो नापगत इति भावः। सिद्धान्ते तु न कोऽपि दोष इत्याह **अस्माकमिति** ॥ ९६२ ॥

सप्तसु प्रथमा षट्सु द्वितीयेत्यनुशासनम्।
सर्वं समाप्नोषि ततस्सर्वोऽसीत्यनुशासनम्।
मुख्या गौणी लक्षणेति लक्षणज्ञानुशासनम् ॥ ९६३ ॥

'सता सौम्य तदा संपन्नो भवति' इति 'सत आगम्य न विदुः' 'सति संपद्य न विदुः', परं ज्योतिरुपसंपद्य, सन्मूलाः सोम्येमाः प्रजाः, सदायतनाः, सत्प्रतिष्ठाः, इत्यादिप्रमाणानुसारेण द्वितीयादिविभक्त्यर्थाश्रयणस्य अनुशिष्टत्वात् 'सप्तसु प्रथमे'त्युक्तम्। एवं 'सुपां सुलुगि'त्यनुशासनमपि ध्येयम्। **लक्षणज्ञानुशासनं** 'तस्मात्परममुख्यत्वं विष्णावन्यत्र मुख्यता। उपलक्षणा च गौणी च तिस्रः शब्दस्य वृत्तयः' इति भगवत्पादीयं वचनम्। **सर्वं समाप्नोषि** सम्यग्व्याप्नोषि ॥ ९६३ ॥

असतश्च सतश्चैव सर्वस्य प्रभवाप्ययम्।
सर्वस्य च परिज्ञानात्सर्वमेनं प्रचक्षते।
इति भारतवाक्योक्तमस्ति शिष्टानुशासनम् ॥ ९६४ ॥

असतः अमूर्तस्य **सवः** मूर्तस्य । 'मूर्तं सदिति संप्रोक्तं अमूर्तमसदुच्यते' इति श्रुतिः ॥ ९६४ ॥

मुख्यार्थबाधे शिष्टार्थं शास्ति शिष्टपरम्परा ।
अतः श्रुतिर्द्रौपदीयमुपयेमे बहून्पतीन् ॥ ९६५ ॥

शिष्टार्थं अमुख्यार्थम् । 'पूर्वायोगे परिग्रहः' इत्युक्तेः । **उपयेमे इति।** बहुवृत्तिसमाश्रयणेनापि विष्णोः सर्वोत्तमत्वमेव प्रतिपादितवती इति भावः ॥ ॥ ९६५ ॥

न स्वैरिणी यत्र योग्यो योऽर्थस्स्यात्तत्र तं भजेत् ।
सर्वमानविरुद्धार्थं दुश्शासनमिव त्यजेत् ॥ ९६६ ॥

न स्वैरिणी इति । इयं द्रौपदीश्रुतिः इति पूर्वेण संबन्धः । अत इति मध्ये अध्याहार्यम् ॥ ९६६ ॥

किञ्च श्रुतिस्वरूपस्य ग्राहि प्रत्यक्षमेव हि ।
तत्प्रामाण्यस्य निर्णेतृ साक्षिप्रत्यक्षमावयोः ॥ ९६७ ॥

प्रत्यक्षस्याप्रमाणत्वे तद्गृहीतं भवच्छ्रुतेः ।
प्रामाण्यं च मृषैव स्यादप्रामाण्यं बलाद्भवेत् ॥ ९६८ ॥

प्रत्यक्षं श्रोत्रम् । तदुक्तं तत्त्वनिर्णये 'प्रत्यक्षेण चागमः' इति । **तत्प्रामाण्यस्येति।** तदुक्तं तत्रैव 'न चानुभवविरोधे आगमप्रामाण्यम् । आगमप्रामाण्यानुभवस्यैवाप्रामाण्यप्राप्तेः' इति ॥ ९६७ ॥ ९६८ ॥

अतस्तदर्थस्यैक्यस्याप्यभावस्सर्वथा भवेत् ।
तदभाववति ह्यर्थे तत्प्रकारत्वमेव हि ।
अप्रामाण्यं यतः शिष्टा लक्षणज्ञाः प्रचक्षते ॥ ९६९ ॥

अतः प्रामाण्यस्यार्थसत्ताघटितत्वात् ॥ ९६९ ॥

व्यावहारिकसत्त्वं च प्रामाण्यस्य यदुच्यते।
तच्च बाधस्य सत्त्वे तु प्रामाण्यस्य त्रिकालगा।
नास्तितैवेति किं तेन सर्वथाऽभाव एव सः ॥ १७० ॥

व्यावहारिकेति यथोक्तं परैरेव कल्पतरुपरिमळे 'बाध्यविषये च व्यावहारिकप्रामाण्यमित्यस्याद्वैतिपरिभाषामात्रसिद्धत्वादि'ति ॥ १७० ॥

बाधाभावे तु सत्त्वस्य प्रत्यक्षं नस्तदैव हि।
श्रुतिस्वरूपसिद्धिश्च न स्यात्प्रत्यक्षबाधने ॥ १७१ ॥

व्यावहारिकेत्यस्याबाध्येत्यर्थाङ्गीकारे विश्वसत्यत्वं निराबाधमवस्थितमित्याह **सदैवेति।** प्रामाण्यस्य कालतो मर्यादाऽभावात्। **न स्यादिति** 'तद्वाक्यस्याग्रतो भवेदि'त्युक्तेः ॥ १७१ ॥

अतः केनैक्यसिद्धिः स्यान्न ह्यसत्साधनं भवेत्।
उपसर्पति सर्पन्तं रज्जुसर्पः किमध्वनि ॥ १७२ ॥

अतः असतः साधकत्वाभावात्। **सर्पंतं** सत्त्वग्राहि प्रमाणम्। **रज्जुसर्पः** स्वरूपत एवासती मिथ्याश्रुतिः। **अध्वनि** वैदिकार्थमीमांसामार्गे। उपसर्पणस्यैवासंभवे बाधनं दूरतोऽपास्तमिति भावः ॥ १७२ ॥

को वाऽन्तेऽवीविशत्सूर्यसुषावृषिपरंपरा।
कस्तप्तशुक्तिरूप्येण कृत्वास्ते करकङ्कणम् ॥ १७३ ॥

सुषिः छिद्रः। **सूर्यसुषौ** मिथ्याभूतसवितृसुषिरे। तदुक्तं 'मिथ्यायाः साधकत्वं च न सिद्धं प्रतिवादिनः 'इति ॥ १७३ ॥

अर्थासाधारणं कार्यं मिथ्यात्वादेव नात्र यत्।
तद्वाग्वाचा प्रतीतिर्वा सत्या वाच्याऽर्थकामुकैः ॥ १७४ ॥

भयकम्पादिकं सुप्तौ सर्पसत्त्वेऽप्यसत्त्वतः ।
सर्पासत्त्वेऽप्यत्र सत्त्वाज्ज्ञप्तेरेव फलं किल ॥ १७५ ॥

तदिति तदुक्तं 'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम् । तदेवार्थक्रियाकारि तत्सदेवार्थकारकम्' इत्यनुव्याख्यानानुसारेणाह **भयकम्पादिकं इति ।** असत्त्वतः ज्ञप्तेरित्युत्कृष्यते । भयकम्पादेः असत्त्वतः इत्यस्यावृत्तिः । अत्र जागरितस्य । **ज्ञप्तिः** भ्रमप्रमासाधारणं ज्ञानम् ॥ १७४ ॥ १७५ ॥

ज्ञप्तिश्च सत्या सर्वत्र मिथ्यार्थस्यैव बाधनात् ।
इत्थं विविक्तता नोचेदर्थकार्यं कुतो न तत् ॥ १७६ ॥

सर्वत्र सुप्तौ जागरिते च । **सत्येति** 'ज्ञानमस्त्येव तादृशं' इत्युक्तेः । एवकारेण भ्रमव्यवच्छेदः । एतावन्तं कालं दोषवशात् रज्जुमेवात्यन्तासत्सर्पात्मना प्रतिपन्नोऽस्मि इत्युत्तरकालीनानुभवात् प्रतिपत्तेरधिष्ठानवत्सत्त्वस्यैवावधारणात् । **विविक्तता** ज्ञानस्यार्थक्रियाहेतुत्वम् । अर्थस्यासत्त्वेन तदभाव इत्येवंरूपविवेकः ॥ ॥ १७६ ॥

स यदीत्यत्र पश्येदित्युक्त्या स्वाप्नार्थदर्शनात् ।
इष्टानिष्टफलप्राप्तिः श्रुत्या प्रोक्ता मयैव न ॥ १७७ ॥

'सयदीत्यनेन' सयद्येतेषु किञ्चित्पश्यति इत्यैतरेयसंग्रहः । 'पुरुषं कृष्णं कृष्णदन्तं पश्यति' 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेऽभिपश्यति' इत्यादिकमपि ध्येयम् । 'समृद्धिं तत्र जानीयात्' इति इष्टं 'स एनं हन्ति' इत्यनिष्टं इत्यादि ग्राह्यम् ॥ ॥ १७७ ॥

स्वाप्नार्थोऽपि यथार्थो हि सन्ध्ये सृष्टिरिति स्मृतेः ॥ १७८ ॥

स्मृतेः 'सन्ध्ये सृष्टिराह हि' इति सूत्रात् ।सृष्टिः यथार्थस्यैवेति नियमात् । उक्तं हि परेणापि 'सतो ह्युत्पत्तिर्विनाशो वा दृष्ट' इति ॥ १७८ ॥

**यत्कार्त्स्न्येनानभिव्यक्तस्वरूपत्वमसूत्रयत्।
सत्यतां सूक्ष्मतां चासौ वक्ति नानृततां प्रभुः ॥ १७९ ॥**

ॐ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् इति सूत्रस्यायमर्थः। सन्ध्यं मायामात्रं निमित्तकारणभूतेश्वरेच्छाया उपादानकारणभूतवासनया च निर्मितम्। तुरेवार्थे। न तु बाह्यकारणाभ्याम्। बाह्यवत्सम्यगनभिव्यक्तस्वरूपत्वात् इति। प्रधानसूत्रे सृष्टेरुक्तत्वेन सत्यत्वावधारणात्तदनुसारेणेदं गुणसूत्रं नेयम्। कार्त्स्न्येनाभिव्यक्तिविशिष्टस्वरूपनिषेधे विशिष्यनिषेधः शेषविधिमनुज्ञापयति इति न्यायेन स्वरूपविधिरनुज्ञायते। अन्यथा निःस्वरूपत्वादित्येवासूत्रयिष्यत्। तदुक्तं अनुव्याख्याने 'मनोविकारा विषयाः स्वाप्ना यद्बाह्यवन्न ते। स्थूला भवन्त्यतस्त्वेषां स्पष्टता न तथा क्वचिदि'ति ॥ १७९ ॥

**अतो मायामात्रतोक्त्या वासनामयतोच्यते।
न चेद्विरुद्धो हेतुः स्याच्छ्रुतिश्च कुपिता भवेत्।
परस्परविरुद्धे च सूत्रे स्यातां ततोऽपि न ॥ १८० ॥**

वासनामयतेति 'वासनामयी सृष्टिः श्लिष्टा' इति परेणाप्युक्तेः। **विरुद्ध इति** यत्र सूक्ष्मत्वं अनभिव्यक्तत्वं च तत्र सत्यत्वं यथा ब्रह्मणि इत्येव व्याप्तेः। **श्रुतिः** अथ रथान् रथयोगान्पथः सृजते इति सृष्टिप्रतिपादिका। **सूत्रे** प्रधानगुणसूत्रे। **अतोऽपि न** ।मायामात्रमित्यस्य अज्ञानोपादानकं अनिर्वचनीयमित्यर्थो न ॥ १८० ॥

**नेदानीं स्वप्न इत्येव यतोऽनित्यत्वधीर्नृणाम्।
नासौ स्वप्न इति क्वापि बाधबोधो न दृश्यते।
अतोऽपि सत्यतैवैषां युक्ता नान्येति मे मतिः॥ १८१ ॥**

**मिथ्याभूतोऽर्थकारी चेत्युक्तिस्तद्व्याहतैव ते।
सूत्रं च नासतो दृष्टत्वादित्याह श्रुतिश्च नः।
असतस्सत्कथं जायेतेत्येवाह ततोऽपि न ॥ १८२ ॥**

'न तत्र रथा' इति श्रुतौ प्रागभाव एवोच्यते। 'उत्तरत्र सृजते' इत्युक्तेः बाधानुभवश्च, बाह्या नेत्येव न तु पुनः पदार्था एव नेति। **व्याहतेति।** कालत्रयेऽवृत्ति इति नियतपूर्ववृत्ति इति च व्याहता सूत्रश्रुतिविरुद्धा चेत्याह **नासत इति। कथं असतः सदिति** च। अत्र विस्तरः तदनन्यत्वनयीये भे.प.ब्र.सूत्राणि इति ग्रन्थे ९[पु. १८६-१९८९] ॥ ९८१ ॥ ९८२ ॥

चिच्चापरोक्षव्यवहारार्हा मुक्तौ च यत्तव।
सत्यस्यैवार्थकृत्त्वं तत्सिद्धमज्ञानसाक्षिणः ॥ ९८३ ॥

'साधकत्वं सतस्तेन साक्षिणा सिद्धिमिच्छता। स्वीकृतं' इति अनुव्याख्यानोक्तं समर्थयमान आह **चिदिति** मुक्तावपि स्वप्रकाशत्वं तावत्परेणाङ्गीकृतं। व्यवहारश्च व्यवहर्तव्य ज्ञानसाध्यः। अतोऽर्थक्रियाऽर्हत्वं चितोऽवश्यमभ्युपगमनीयम्। तेन सिद्धिमित्यस्य अपरोक्षव्यवहारसिद्धिं इति भावान्तरमुक्तं ध्येयम् ॥ ९८३ ॥

किञ्चाज्ञानारोपमूलमधिष्ठानचिदेव ते।
तदाधारा च सत्यस्यैवार्थकृत्त्वं कथं न तत् ॥ ९८४ ॥

सिद्धिमित्यस्य आरोपद्धिसिद्धिं आश्रयसिद्धिमित्यप्यर्थमुपेत्य योजयति **किञ्चेति** ॥ ९८४ ॥

रज्जुः करोति स्वं कार्यं सर्पस्तु न करोत्यसौ ॥
शुक्तिः करोति स्वं कार्यं रूप्यं तत्र करोति न।
अतो यत्राधिका सत्ता कार्याधिक्यं न तत्र किम् ॥ ९८५ ॥

तत्सदेवार्थकारकं इत्यनुव्याख्यानोक्तं अन्वयव्यतिरेकाभ्यां समर्थयते **रज्जुरिति। आधिक्यं** इति।परेण प्रातिभासिके अर्थक्रियायाः सर्वथाऽनङ्गीकारात् आधिक्यमित्यनुपपत्तेः प्रातिभासिके नैवार्थक्रिया व्यावहारिके एव सा इत्यत्रैव तात्पर्यम्। यद्वा आधिक्यं अधिकदेशकालेषु विद्यमानत्वम्। सत्ताप्रभेदाभावात्। उत्तरत्र कालाकाशदृष्टान्तेन अस्यैवार्थस्य विशदीकरणात् ॥ ९८५ ॥

कारणं पूर्वभाव्येव सर्वेऽप्याहुर्मनीषिणः ।
भूतिश्च सत्ता तत्कस्य कारणत्वमभूद्वद ॥ ९८६ ॥

अतः श्रुत्या च युक्त्या च लोकानुभवतोऽपि च ।
सदेव कारणं मन्ये मिथ्याभूतमकारणम् ॥ ९८७ ॥

पूर्वभावित्वरूपलक्षणव्याघातादपि असतः कारणत्वं निराह कारणत्वमिति । श्रुत्या कथमसतः सज्जायेतेति असतः कारणत्वनिषेधिकया ॥ ९८६ ॥ ९८७ ॥

सदा सर्वत्र सद्ब्रह्म सदा सर्वत्र चार्थकृत् ।
आकाशवत्कालवच्च त्रिकालासत्कदापि न ॥ ९८८ ॥

सदा सर्वत्रेति स हि सर्वस्य कर्ता इति श्रुतेः ॥ ९८८ ॥

भ्रान्तस्य वाग्भ्रान्तमेव स्वार्थं वक्ति न चापरम् ।
मणिप्रभायां मणिधीः प्रभाऽध्यस्तमणेर्हि धीः॥ ९८९ ॥

असन्मणेर्हि तज्ज्ञानं मणिप्राप्तिर्यदृच्छया ॥ ९९० ॥

- भ्रमस्य तज्जन्यवाग्व्यवहारस्य सत्यत्वेऽपि न विषयस्य सत्त्वसिद्धिरित्याह भ्रान्तस्येति । भ्रान्तं भ्रमविषयं असत्यमेव । यदृच्छयेति । तथा च विषयसत्त्वस्योत्तेजकत्वात् दोषो न प्रतिबन्धक इति भावः ॥ ९९० ॥

प्रभाव्याप्तत्वतो वा स्यान्मणिप्राप्तिर्न धीबलात् ।
काचे नीलमणिभ्रान्त्या नीलप्राप्तिः कुतो न चेत् ॥ ९९१ ॥

न धीबलादिति । प्रमात्मकानुमितिरेव तत्र सफलप्रवृत्तिहेतुः । उभयत्रापि सत्यमेव ज्ञानं अर्थक्रियाकारीति निष्टङ्कितम् ॥ ९९१ ॥

शाखाचन्द्रोक्तितश्चैव शाखायां चन्द्रधीर्भवेत् ।
स च नास्ति यतो वाक्यममानं नापि चार्थवत् ॥ ९९२ ॥

असत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मैकत्वस्य प्रतिपत्तिरिति परप्रक्रियां तदभिमतदृष्टान्तदूषणेन दूषयति शाखेत्यादिभिः ॥ १९२ ॥

आभिमुख्याय तद्वाक्यं वदन्त्यज्ञेषु केवलम् ।
चन्द्रप्राप्तिः स्वदृष्ट्यैव भवेत्तेनाध्वना शनैः ॥ १९३ ॥

शाखामपि द्वारत्वेनैवोपदिशन्ति न तु शाखैव चन्द्र इति । **आभिमुख्याय** अज्ञानां दृष्टिं चन्द्रं प्रत्यभिमुखीकर्तुम् । **प्राप्तिः** ज्ञानम् । **दृष्ट्या** चक्षुषा, न केवलं वाक्येन ॥ १९३ ॥

मिथ्यावाक्यस्य यो ह्यर्थस्स सत्यः कुत्र भण्यताम् ।
यस्स्थूलारुन्धतीन्यायः सोऽप्येवमभिसंहितः॥ १९४ ॥

मिथ्यावाक्यस्येति 'दुःखादेर्यदि मिथ्यात्वं तद्वाक्यस्याग्रतो भवेत्' इत्युक्तरीत्या स्वरूपत एवासतः वन्ध्यासुतवचस इव बोधकत्वमेव न, दूरे यथार्थबोधकत्वं इति भावः । यद्वा प्रत्यक्षविरोधेन योग्यताशून्यस्य शाखैव चन्द्र इति वाक्यस्य यः अर्थः शाखाचन्द्रैक्यरूपः स कथं सत्य इत्यर्थः । एवं द्वारतया उपदेश इत्यनङ्गीकृत्य स्थूलनक्षत्रमेवारुन्धतीत्युपदेशस्थलेऽपि अयमेव प्रकार इत्याह **य इति** ॥ १९४ ॥

अतो भ्रान्तेन बोध्योऽर्थो नैवाभ्रान्तः क्वचिद्भवेत् ।
अतो मिथ्याश्रुतेरर्थस्त्वैक्यं च मृषा भवेत् ॥ १९५ ॥

भ्रान्तेन योग्यताशून्येन । **अभ्रान्तः** सत्यः । प्रकृते सङ्गमयति **अत इति** । मिथ्याश्रुतेरित्यस्य पूर्ववदर्थद्वयम् । असत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मैक्यस्य प्रतिपत्तिर्न संभवतीति फलितम् ॥ १९५ ॥

उपजीव्यविरोधेन ह्युपजीवकनाशनम् ।
वदन्ति शिष्टास्तस्येदं स्पष्टमासीन्निदर्शनम् ॥ १९६ ॥

शिष्टाः 'उपजीव्यविरोधे तु नास्यास्तन्मानता भवेत्' इति ब्रह्मतर्कशासनानुसारिणः। नाशनं बाधनम् ॥ ९९६ ॥

यतो मानस्य मिथ्यात्वे मेयं मिथ्येति निश्चितम्।
ते ब्रह्मणि तदद्वैते तस्मादाशा वृथा तव ॥ ९९७ ॥

ब्रह्मणि सत्यज्ञानादिकस्य पदार्थपरवाक्यस्य ऐक्ये तत्त्वमसीत्यादिवाक्यार्थपरवाक्यस्य इत्युपस्कर्तव्यम् ॥ ९९७ ॥

स्वतस्सिद्धिस्त्ववेद्यत्वरूपत्वान्नार्थसाधिका।
न विवादिनि सा वक्तुं शक्यते या त्वयोदिता ॥ ९९८ ॥

स्वत इति प्रमाणाभावे सत्त्वं न स्यादित्यस्य प्रमाणेन विना ब्रह्म सिध्यतीत्यस्यानुत्तरत्वादिति वादावल्युक्तदिशा इति भावः ॥ ९९८ ॥

अन्यथा स्वप्रकाशत्वाद्घटसिद्धिर्भवेन्मम।
स्वपराविषयज्ञानं घटोऽपि न कथं वद ॥ ९९९ ॥

अन्यथेति विषयवर्जितः प्रकाश एव न भवति घटवत् इति तत्त्वोद्योतमनुरुध्याह स्वपरेति। तथा हि तज्ज्ञानं स्वविषयं परविषयं वा। नाद्यः स्ववृत्तिविरोधात्। न द्वितीयः मोक्षे ज्ञानाभावप्रसङ्गात्। निर्विषयज्ञानरूपत्वे अस्तु प्रपञ्चेऽपि तादृशज्ञानरूपत्वं इति वादावल्युक्तेः ॥ ९९९ ॥

मुक्तौ ते यादृशं ब्रह्म तादृशं मे जडं न किम्।
सङ्केतस्सर्वशब्दानां कुत्र कुत्र न शक्यते ॥ १००० ॥

यादृशं निर्विषयज्ञानरूप्। सङ्केतः प्रमाणामूला स्वकपोलकल्पिता परिभाषा ॥ १००० ॥

अश्रौतं ब्रह्म तत्तेऽस्तु श्रुत्युक्तब्रह्मणा वयम्।
कृतार्थः स्याम भूमासौ नः क्लेशात्तारयिष्यति ॥ १००१ ॥

अश्रौतमिति । अवेद्यत्वाङ्गीकारात् ब्रह्मणः । तेऽस्त्विति । 'निर्गुणत्वं तदा च स्यादासुरत्वं न चान्यथा' इत्यनुव्याख्यानसुधायां 'गुणशब्दोदितशुभगुण-राहित्यमासुरत्वमेवोक्तं स्यात् । तेनैक्यं च मायावादिनामनुमन्यामहे' इति उक्तेः । भूमा पूर्णसुखः ॥ १००१ ॥

अतः श्रौतेन बाधेन सत्त्वप्रत्यक्षबाधनम् ।
ज्वलज्ज्वलनवैरेण पतङ्गस्येव नाशनम् ॥ १००२ ॥

ज्वलत्वं उपजीव्यत्वादिना प्राबल्यम् । ज्वलनं रेखोपरेखाग्राहकं प्रत्यक्षम् । पतङ्गः आपातार्थप्रलोभी मायावादी । प्रलोभितात्मनः नाशनं तमःप्राप्तिः ॥ ॥ १००२ ॥

तस्मान्निर्दोषमानेन वेद्यसत्ताश्रयत्वतः ।
अबाधितं जगदिदं सर्वं ब्रह्मवदेव हि ॥ १००३ ॥

तस्मादिति जगत् सत्यं प्रमाणदृष्टत्वात् ब्रह्मवत् व्यतिरेकेण शशशृङ्गवत् । इति प्रयोगोऽभिप्रेतः । निर्दोषेति स्वरूपसङ्कीर्तनम् । अतत्त्वावेदकं प्रमाणं चेति व्याघातः इति वादावल्युक्तेः ॥ १००३ ॥

अर्थः परोक्तवाक्यानामुक्तोऽस्माभिः पुरैव हि ।
भाविबाधापनोदार्थमेतावच्चर्चितं पुनः ॥ १००४ ॥

पुरा भेदसौरभे अत्रापि । चर्चितम् । 'स्वकाले ह्यस्तितां गृह्णन् साक्षात्कारस्त्रिकालगम् । प्रतिषेधं निरुन्धानो गृह्णात्येवात्यबाध्यताम्' इत्युक्तरीत्या समर्थितम् ॥ १००४ ॥

किञ्च दृश्यत्वजडतापरिच्छेदादयोऽखिलाः ।
हेतवस्सन्तु जगति मिथ्यात्वं माऽस्तु का क्षतिः ॥ १००५ ॥

'न च जगतो मिथ्यात्वाभावे बाधकं पश्यामः' इति वादावलीमनुरुध्य मिथ्यात्वहेतूनां अप्रयोजकतामाह किञ्चेत्यादिभिः ॥ १००५ ॥

यतो दर्शनयोग्यत्वं दृश्यत्वं निरुपाख्यताम्।
क्षिपेज्ज्ञानेन हीनत्वं जडत्वं ज्ञातृतां क्षिपेत्   ॥ १००६ ॥

दर्शनयोग्यत्वमिति ज्ञानजन्याभिलपनरूपव्यवहारविषयत्वायोग्यत्वरूपं निरुपाख्यत्वमेव क्षिपेत् निराकुर्यात्। **ज्ञानेन हीनत्वं** अज्ञातृत्वम्। 'अस्माभिस्तु ज्ञातृत्वानाधारत्वस्य जडत्वेनाभिलापान्नास्मत्प्रतिबन्दी' इति वादावल्युक्तेः॥ ॥ १००६ ॥

परिच्छेदश्च गुणतो देशतः कालतोऽवधिः।
अनन्तगुणतां देशव्याप्ततां नित्यतां क्षिपेत्   ॥ १००७ ॥

'अन्तशब्दस्य वस्तुतः परिच्छेदे अव्युत्पन्नत्वादि'ति वादावलीमनुरुध्याह **परिच्छेदश्चेति**। देशकालयोरवधिरूपमर्थमभिधाय तृतीये वस्तुतो भेदरूपार्थोक्तौ पंक्तिभेददोषापत्तेरिति भावः। विवृतमेतत्सविस्तरं भेदसौरभे ॥ १००७ ॥

सत्यत्वोपप्लवे नैते हेतवो धूमकेतवः।
अतोऽप्रयोजकास्सर्वे मिथ्यात्वे हेतवस्तव।
प्रयोजकस्तु बाधो यो न द्वयोस्स मतेऽभवत् ॥ १००८ ॥

उपप्लवे निराकरणे। साहित्यमुद्रयाऽऽह **धूमकेतव इति** ॥ १००८ ॥

घटोऽस्ति नास्ति वेत्युक्ते दृष्ट्वोच्यत इति प्रजाः।
प्रतिब्रुवन्ति दृष्टश्चेदस्तित्वमनुजानते।
यदि दृष्टो न, नास्तित्वं तस्य लोकोऽनुमन्यते ॥ १००९ ॥

दृढप्रत्यक्षसिद्धेऽर्थे सार्वजनीनं संप्रत्ययमभिनीय दर्शयति **घट इति**। अङ्गीकृतं चैतत्परेणापि। तथा हि भामत्यां 'लौकिकानि हि प्रमाणानि सदसत्त्वगोचराणि। तैः खलु सदिति गृह्यमाणं सदित्येव वस्तु व्यवस्थाप्यते

असदिति च गृह्यमाणमसदित्येव व्यवस्थाप्यते' इति [भे.प.ब्र.सू. १/९३] ॥ ॥ १००९ ॥

तस्माद्यो लोकमर्यादामनुसृत्य प्रवर्तते ।
सत्यत्व एव दृश्यत्वं हेतुं कुर्यात्स पण्डितः ।
मिथ्यात्वे तु विरुद्धं तत्को हेतुं कुरुते बुधः ॥ १०१० ॥

'दृश्यत्वस्य सन्मात्रवृत्तित्वाद्विरुद्धता च' इति वादावलीमनुरुध्याह तस्मादिति ॥ १०१० ॥

ज्ञानोपनीतो भातोऽपि गन्धो योग्यो न चक्षुषः ।
घ्राणस्यैव स योग्योऽर्थो
रूपाद्याः किल चक्षुषः ॥ १०११ ॥

सपक्षे शुक्तिरूप्येऽपि विद्यमानत्वात्कथं विरुद्धता इति शङ्कासमाधानाय शुक्तिरूप्यस्य मिथ्याभूतस्य रूपरहितस्य चक्षुरयोग्यत्वं दृष्टान्तोक्त्या साधयति ज्ञानोपनीत इत्यादिभिः । गन्धः घ्राणेन्द्रिययोग्यः अनुपनीततया स्वसामग्रीवशेनैव तज्जन्यज्ञानविषयत्वादिति भावः ॥ १०११ ॥

अन्तरेव स्वतन्त्रस्य बाह्यार्थो घटपूर्वकः ।
ज्ञानोपनीतो भातोऽपि तद्वद्योग्यो न साक्षिणः ॥ १०१२ ॥

भातः घटज्ञानवानहं इति साक्षिज्ञाने ज्ञानविशेषणतया विषयः ॥ १०१२ ॥

सुखाद्या एव तद्योग्याः क्वाचित्कं कारणं विना ।
क्लृप्तया स्वस्वसामग्र्या दृष्टिः स्यात्पदे पदे ।
स एव तत्तद्योग्योऽर्थो नान्यः कृत्रिमपुत्रवत् ॥ १०१३ ॥

सुखाद्याः कालाकाशादयः । **काचित्कं कारणं विना** उपनायकादिकं विना । यद्दृष्टिरित्युत्तरेण संबन्धः । यस्य दृष्टिः स एवेति योजना । **पदे पदे** उत्सर्गतः ॥ ॥ १०१३ ॥

सहकार्यन्तरबलात्प्रतीतिः स्यात्क्वचित्क्वचित् ।
योग्यता तूक्तमार्गेण स्वारस्यात्प्रत्यये किल ॥ १०१४ ॥

क्वचित् क्वचित् अपवादस्थले । **स्वारस्यात्** स्वरसतो जायमाने ॥ ॥ १०१४ ॥

इमां हि शास्त्रमर्यादां सर्वेऽङ्गीकुर्वते बुधाः ।
अतो दोषात्प्रतीतेऽपि मिथ्यार्थे नास्ति योग्यता ॥ १०१५ ॥

इमां करणानां स्वकारणासादिता या ज्ञानजननशक्तिः तद्वत्सहजा वा तदभिन्ना वा या प्रमाजननशक्तिः तद्वत्त्वं करणप्रमाणानामुत्पत्तौ स्वतःप्रामाण्यं इत्येवंरूपाम् । **दोषात्** विपरीतशक्त्याधायकात् । **प्रतीते** शुक्तिरजते । **योग्यता** चक्षुष इति शेषः ॥ दोषोऽप्युपनायकवत् सहकारिविशेष एवेति भावः ॥ १०१५ ॥

किञ्च प्रत्यक्षयोग्यं स्याद्बहिर्द्रव्यं तदेव हि ।
महत्त्वे सति यद्रूपमुद्भूतं च भवेत्सदा ।
तस्माद्दर्शनयोग्यत्वं मिथ्यार्थेष्वस्ति न क्वचित् ॥ १०१६ ॥

प्रत्यक्षेति चाक्षुषप्रत्यक्षेत्यर्थः । **मिथ्यार्थे** रूपादिहीने । **यद्रूपं** यस्य रूपम् । **तस्मात्** महत्त्वसमानाधिकरणोद्भूतरूपस्य चाक्षुषताप्रयोजकत्वात् ॥ १०१६ ॥

शब्दाच्चायोग्यतादोषे सति मिथ्यार्थधीर्नृणाम् ।
अप्रमा परतो यस्य दोषाभावे स दोषभाक् ॥ १०१७ ॥

परत इति । तदुक्तं तर्कताण्डवे 'अप्रमायां त्वनन्यथासिद्धान्वयव्यतिरेकित्वाद्दोषः कारणमि'ति । यस्येत्यस्य स इत्यनेनान्वयः । दोषाभावेऽप्यप्रमोत्पद्यत इत्यङ्गीकारे सः परतस्त्ववादी अपसिद्धान्तरूपदोषभाक् इति भावः ॥ १०१७ ॥

तस्माद्दृश्यत्वसत्यत्वे सत्ये ब्रह्मणि वर्तनात् ।
मिथ्यार्थतो निवृत्तेश्च नित्यं व्याप्ते परस्परम् ॥ १०१८ ॥

तस्मात् सपक्षे शुक्तिरूप्ये दृश्यत्वाभावात् । एवं च वादावल्युक्ता विरुद्धता सुस्थेत्याह **ब्रह्मणीति** । विपक्ष एव वर्तमानत्वात् ॥ १०१८ ॥

तत्तत्करणसंबन्धो यत्सत्यत्वैकहेतुकः ।
अप्रयोजकताशङ्का तस्मान्नात्र विवेकिनाम् ॥ १०१९ ॥

तज्ज्ञानासाधारणकारणासाधारणकारणसन्निकर्षानुयोगित्वं विषयत्वं इति लक्षणपर्यालोचनयाऽपि सन्निकर्षसापेक्षं विषयत्वं सन्निकर्षायोग्यस्य असदर्थस्य न संभवतीत्याह **तत्तदिति** । **अप्रयोजकता** । दोषाभावेऽपि अप्रमात्वं स्यादित्येवंरूपा । प्रत्यासत्तिप्रतिनिधेर्दोषस्यावश्यकत्वादिति भावः ॥ १०१९ ॥

विवादविषयो विश्वं दृश्यत्वात्परमार्थसत् ।
ब्रह्मवद्व्यतिरेकेण शुक्तिरूप्यवदेव वा ॥ १०२० ॥

दृश्यत्वात् प्रमाणदृष्टत्वात् । एतच्च समर्थितमिति भावः ॥ १०२० ॥

रणाङ्कणाद्गृहीतोऽयं भटो वीरशिरोमणिः ।
चित्रं युक्तिधनैस्तुष्टो हन्ति शत्रोरनीकिनीम् ॥ १०२१ ॥

निरवकाशतया सत्यत्वसाधकं हेतुं मिथ्यात्वे उपन्यस्यतः परस्याहो अविवेकितेत्याह **रणेति** । युक्तिः दृश्यत्वस्य सन्मात्रवृत्तित्वरूपयुक्तिः ॥ १०२१ ॥

अस्य प्रकरणे साम्यं ये प्रोचुः पूर्वसूरयः ।
तेषां तु न रणे साम्यं केनापीति मतिर्मम ॥ १०२२ ॥

प्रोचुः मिथ्यात्वानुमानखण्डने । **पूर्वसूरयः** श्रीभगवत्पादाः । 'रजतं दृष्टमिति भ्रममात्रत्वात् विमतं सत्यं दृश्यत्वादात्मवदित्यपि योज्यत्वात्प्रकरणसमः ।' इदं चोपलक्षणम् । वस्तुतस्तु प्रबलप्रमाणविरोध एव । 'प्रत्यक्षादिविरुद्धत्वाद्विश्वं

सत्यमित्यादिवाक्यविरुद्धत्वात् कालात्ययापदिष्ट' इति तत्रैवोक्तेः। तदेतदभिप्रेत्याह **न साम्यमिति**। किन्तु तदुक्तयुक्तेः प्राबल्यमेवेति हृदयम् ॥ १०२२ ॥

किञ्च दृश्यध्यस्ततैव दृश्यत्वं भवतो मते।
विषयत्वपरित्यागाद्वृत्तौ वृत्त्याकृतिस्तव।
दृश्यत्वं किल तत्सर्वं प्रतिवादी न मन्यते ॥ १०२३ ॥

'दृश्यत्वाभावादसिद्धो हेतुः। अनिर्वचनीयासिद्धेरेव' इति भगवत्पादोक्तिं समर्थयते **किञ्चेत्यादिना**। **भवतः** 'नियामकं न संवेद्यं पश्यामो नीलतद्धियोः' इति विज्ञानवादिनां ग्राह्यलक्षणाभावाख्यं तर्कं भिक्षित्वा विषयत्वसंबन्धस्य दुर्निरूपत्वं वदतो मायिभिक्षोः। **अध्यस्ततैवेति** असत्त्वे तु चित्प्रकाशारोपितस्य अधिष्ठानाध्यस्तत्वसंबन्धेन प्रकाशोपपत्तिरिति त्वत्सिद्धान्तादिति भावः। **परित्यागात्** विकल्पासहत्वेन खण्डनात्। तथा हि। **वृत्त्याकृतिरिति**। वृत्तिसमानाकारत्वं तच्च प्रतिवाद्यसिद्धम्। नापि ज्ञानजन्यफलाश्रयत्वम्। फलं ज्ञातता व्यवहारो वा। नाद्यः ज्ञाततताया अप्रामाणिकत्वेन परस्य स्वरूपासिद्धिः। अतीतानागतनित्यानुमेयेषु वादिनोऽपि भागासिद्धिः। न द्वितीयः। व्यवहाराश्रयत्वस्य पुरुष एव संभवेन विषये तदभावात्। नापि वृत्तिप्रतिफलितचैतन्यादिकं परस्यासिद्धेरेव। तदेतदभिप्रेत्योक्तं **तत्सर्वमिति**॥ ॥ १०२३ ॥

तस्मादन्यतरासिद्धो हेतुः स्यादप्रबुद्ध ते।
सर्वेषामपि सिद्धो मे हेतुर्नारदसिद्धवत् ॥ १०२४ ॥

प्रमाणतो दृग्विषयत्वं वाद्यसिद्धम्। फलितमाह **तस्मादिति**। मिथ्यात्वं चाध्यस्तत्वमेवेति साध्याविशिष्टता च। सिद्धान्ते तु न कोऽपि दोष इत्याह **सर्वेषामपि इति**। विषयत्वरूपस्वरूपसंबन्धस्य अभावादिषु सर्वत्र संभवात्। **नारदसिद्धवदिति**। यथा नारदो दैत्यानां देवानां च संमतः तथा चैतन्यविषयत्वस्य वृत्तिविषयत्वस्य चोपपत्तेः। तदुक्तं वादावल्यां 'चैतन्याविषयत्वेऽपि

बाधकाभावात्। वृत्तिविषयत्वेनैव व्यवहारोपपत्तेः। चैतन्यस्यापि स्वाभाविकं भविष्यतीति को दोष' इति ॥ १०२४ ॥

यतो दुष्टं च करणं स्वयं सदपि तात्त्विकम्।
अर्थं न साधयेत्तस्मान्मिथ्यार्थः क्वार्थसाधकः ॥ १०२५ ॥

परः प्रमाणानां मिथ्यात्वं मनुते। अतस्तेषां साधकत्वमेव न घटत इत्याह **यत इति** दुष्टमपि करणं स्वरूपतः सदपि दोषग्रस्ततया न तात्त्विकमर्थं साधयति यदा तदा परमते स्वरूपत एवासन्ति प्रमाणानि कथंकारं तात्त्विकार्थं साधयेयुरिति भावः। तदुक्तं भगवत्पादैः 'अनङ्गीकुर्वतां विश्वसत्यतां तत्र वादिता। तस्माद्व्यवहृतिः सर्वा सत्येत्येव व्यवस्थिते'ति ॥ १०२५ ॥

सिद्धिर्हि विद्यमानत्वनिर्णयस्संमता सताम्।
सा प्रमाणेन यस्यासीत्तद्धि प्रामाणिकं विदुः ॥ १०२६ ॥

निर्णयस्तदभावस्य व्यावृत्त्या तस्य सत्त्वधीः।
उद्दिष्टा तत्कुचोद्यस्य नावकाशोऽत्र विद्यते।
घटस्य नास्तिताज्ञानं घटज्ञानं हि को वदेत् ॥ १०२७ ॥

ननु प्रामाणिकत्वं सत्यत्वसाधकम्। असदेव रजतं प्रत्यभादिति भ्रान्त्युत्थितस्यानुव्यवसायरूपं प्रमाणं प्रति तथा नेदं रजतं इति बाधकानुभवरूपप्रमाणं प्रति च रजतस्य विषयत्वात्तस्यापि प्रामाणिकत्वावगमात्तेन रजतस्यापि सत्त्वं इति परस्य कुचोद्यं प्रामाणिकत्वस्वरूपनिर्धारणेन निराह **सिद्धिरित्यादिना**। प्रमां प्रति अनिषेध्यत्वेन साक्षाद्विषयत्वमेव प्रामाणिकत्वम्। तदेव सत्त्वसाधकतयोपन्यस्तम्। अनुव्यवसायं प्रति परंपरया विषये बाधकानुभवं प्रति निषेध्यत्वेन विषये रजतें तत्रास्तीति कुतस्तस्य सत्त्वसाधनप्रत्याशेत्याह **विदुः इति**। लौकिका वैदिकाश्चेति शेषः। अनुव्यवसायेन भ्रमस्य सत्त्वसिद्धिः, बाधानुभवेन च रजताभावस्यैव सिद्धिर्नत्वेव रजतस्येति भावः। तदुक्तं वादावल्यां

'अन्यथा भ्रमो ममासीदिति विशिष्टविषयज्ञानस्य प्रमाणत्वात्तद्विशेषणतया-ऽर्थस्यापि प्रामाणिकत्वापात' इति ॥ १०२२६ ॥ १०२७ ॥

यद्वा प्रमाणं यत्सत्तामङ्गीकारयति स्फुटम् ।
सोऽर्थः प्रामाणिकोऽन्योऽर्थ-
स्त्वप्रामाणिक उच्यते ॥ १०२८ ॥

प्रमाणता च करणे प्रमाकरणता मता ।
प्रमा यथार्थधीस्तत्त्वं लोकोक्त्या न दुराग्रहात् ॥ १०२९ ॥

प्रमाणशब्दनिरुक्त्याऽपि प्रामाणिकत्वहेतोः सत्यत्वसाधकता सिध्यतीत्याह यद्वेत्यादिभिः । **स्फुटमिति** तच्चानिषेध्यत्वेन साक्षात्तद्विषयकप्रमाजनकमेव नान्यदिति भावः ॥ १०२८ ॥ १०२९ ॥

अतो यद्विद्यमानत्वं प्रत्यक्षेणेतरेण वा ।
निर्णीयते प्रमाणेन तत्प्रामाणिकशब्दवत् ॥ १०३० ॥

प्रामाणिकशब्दवत् प्रामाणिकशब्दप्रतिपाद्यताऽर्हम् । प्रामाणिकत्वं प्रति सत्त्वस्य प्रयोजकत्वात् । तदुक्तं वादावल्यां 'ब्रह्मणश्चाप्रामाणिकत्वे शशविषाणवदसत्त्वप्रसङ्ग' इति ॥ १०३० ॥

प्रयोगस्यानुसारेण शब्दस्यार्थो भवेत्किल ।
प्रयोगमूलं यत्प्राहुस्सर्वे व्याकरणं बुधाः ॥ १०३१ ॥

किल 'प्रयोगमात्रबाहुल्यं रुढिरित्यभिधीयते' इति अनुव्याख्यानोक्तलक्षणेन प्रसिद्धम् ॥ १०३१ ॥

प्रयुञ्जते न तच्छब्दं प्रजा रज्जुभुजङ्गमे ।
निषेध्यत्वेन बाधाख्यमानसंबन्धवत्यपि ॥ १०३२ ॥

तच्छब्दं भुजङ्गमशब्दम्। **संबन्धवत्यपि** निषेध्यत्वेन विषयत्वरूपसंबन्धवत्यपि ॥ १०३२ ॥

ततः प्रमाणसंबन्धमात्रार्थः प्रत्ययोऽत्र न।
तत्संबन्धविशेषार्थ इत्याहुः शब्दकोविदाः ॥ १०३३ ॥

प्रत्ययः प्रामाणिकशब्दे प्रमाणपदोत्तरः विषयत्वरूपसंबन्धवाचकः ॥ ॥ १०३३ ॥

विशेषश्च स एव स्यान्मिथ्यार्थाद्विशिनष्टि यः।
अतोऽस्मदुक्तमेवार्थं शब्दोऽसौ वक्ति नापरम्॥ १०३४ ॥

विशेषः अनिषेध्यत्वेनेत्युक्तरूपः ॥ १०३४ ॥

माने तव महावाक्ये यदि तत्पदमर्थवत्।
तदा प्रामाणिकं ब्रह्म न चेदैक्यं न वाक्यतः ॥ १०३५ ॥

सिद्ध्येद्विध्येदतो ब्रह्म तत्पदेषुर्न संशयः।
ऐक्यं तव यतोऽवश्यं मुख्यतत्त्वच्युतिर्न चेत्॥ १०३६ ॥

महावाक्ये तत्त्वमसि इति वाक्ये **तत्पदं** तदिति पदम्। **अर्थवत्** शक्त्या लक्षणया वा ब्रह्मरूपार्थप्रतिपादकं तदा प्रामाणिकत्वहेतुः सत्त्वसाधनायोपन्यस्तो न साधनविकलः। न चेत् ब्रह्मण एवानुपस्थितेः वाक्यात् ऐक्यं न सिध्यति इति योजना। अत ऐक्यसिद्धिमभीप्सताऽवश्यं तत्पदप्रतिपाद्यत्वं उररीकरणीयमिति साहित्यमुद्रयाऽऽह। तत्पदेषुः तदितिपदरूपः शरः, ब्रह्म विध्येत् अवश्यं प्रतिपादयेदेव इति। मुख्यतत्त्वं त्वत्सिद्धान्तरहस्यं ऐक्यम्। तस्य च्युतिः अभावसिद्धिः ॥ १०३५ ॥ १०३६ ॥

तदा त्वैक्याभावरूपहेतोरेव प्रसिद्ध्यति।
अनेकं जगदेतन्मे बाधेषावप्ययो गतम् ॥ १०३७ ॥

इदं प्रमाणप्रमितम् । **जगत्** जीवजडात्मकम् । **अनेकं** परस्परप्रतियोगिकपारमार्थिकभेदोपेतस्वैकदेशप्रतियोगिकपारमार्थिकभेदोपेतम् । **प्रकर्षेण** परस्परविरुद्धयोरन्यतरनिषेधे अन्यतरविधिरिति व्याप्तिबलेन **सिध्यति** । तदुक्तं वादावल्यां 'स्वरूपैक्यस्य बाधितत्वे भेदोन्मज्जनप्रसङ्गात् । न ह्युभयोदासीनतत्त्वसिद्धिः । उभयात्मकवस्तुवत्तस्यापि व्याहतत्वेनासंभवित्वादि'ति । तथा च **बाधेषौ** भेदबाधकत्वेन त्वदभिमते एकमेवाद्वितीयमित्यादिवाक्यबाणे **अयः** बाधोपयुक्तं ऐक्यविषयकत्वं **गतं** अपगतम् ॥ १०३७ ॥

अतः प्रामाणिकं ब्रह्म तवापि च ममापि च ।
परमार्थसदेव स्याद्ब्रह्मवत्तेन मे जगत् ॥ १०३८ ॥

ब्रह्मवदिति । दृष्टान्ते साधनवैकल्यस्य परिहृतत्वादिति भावः ॥ १०३८ ॥

प्रमितं विश्वसत्यत्वं सच्चेन्नोपाधिरात्मता ।
अत्रैव साध्यस्याव्यात्प्या भवेन्नोपाधिरात्मता ।
न्यायसाम्याद्ब्रह्मणि ते साध्याव्याप्तिप्रसङ्गतः ॥ १०३९ ॥

न चेत्प्रमापि जगति साधनाव्याप्ततागता ।
आत्मत्वोपाधिरेतस्मात्स्वात्मानं हन्ति नापरम् ॥ १०४० ॥

सत्यत्वसाधकप्रामाणिकत्वहेतोः, यदि सत्त्वं न स्यात्प्रामाणिकत्वमेव न स्यादित्यनुकूलतर्कसनाथत्वेन पक्ष एव साध्यव्यापकताभङ्गात् न आत्मत्वरूपोपाधिसंभव इत्याह **प्रमितमिति** । अनुकूलतर्केण पक्षे सिद्धं इत्यर्थः । यथोक्तं 'अनुकूलेण तर्केण सनाथे सति साधने । साध्यव्यापकताभङ्गात्पक्षे नोपाधिसंभव' इति । सत्यत्वस्य प्रामाणिकत्वं प्रति प्रयोजकत्वेन हेतूच्छित्तिरेव विपक्षे बाधिकेति ध्येयम् । **न चेत्** प्रामाणिकत्वहेतुना जगति सत्यत्वसिद्धिं नाङ्गीकरोषि चेत् ब्रह्मण्यपि सत्यत्वासिद्धिः । उभयत्र प्रामाणिकत्वाविशेषेण एकत्र साधकत्वं अपरत्रासाधकत्वं इति अर्धजरतीयानुपपत्तेः । **स्वात्मानं हन्ति** । आत्मन्यपि आत्मत्वाभावं प्रसञ्जयति ।

तदुक्तं वादावल्यां 'आत्मत्वमुपाधिरिति चेन्न। अबाध्यत्वादेरात्मत्वस्य पक्षे संभवात्। अन्यथाऽऽत्मत्वस्याप्यभावः स्याद्ब्रह्मणी'ति ॥ १०३९ ॥ १०४० ॥

प्रामाणिकं च बाध्यं चेत्येतमर्थमनर्थदम्।
व्याघातो जितनिर्घातस्तर्कोऽप्याक्रोशयेद्ध्रुवम्॥ १०४१ ॥

यद्बाधोऽर्थायथार्थत्वं तद्याथार्थ्यं च यत्प्रमा।
वन्ध्यासुतो वदेदेवं न तु पुत्रवतीसुतः ॥ १०४२ ॥

व्याघात इति तदुक्तं तत्रैव 'अतत्त्वावेदकं प्रमाणं चेति व्याघातः। अतत्त्वावेदकं प्रमाणं चेच्छुक्तिरजतज्ञानमपि प्रमाणं किं न स्यात्। प्रमाणं चेन्नातत्वावेदकं अद्वैतवाक्यवत्' इति। **जितनिर्घातः** अशनेरपि बलवत्तरः ॥ ॥ १०४१ ॥ १०४२ ॥

यद्येकमानमानत्वहीनतायां रतिस्तव।
तर्हि बाधप्रमाणेऽस्तु सा जगत्कण्टकोपमे ॥ १०४३ ॥

बाधप्रमाणे बाधकत्वेन त्वदभिमत-नेहनानास्तीति वाक्ये। **बाधः** अन्यार्थता। सत्यत्वसाधकप्रमाणानां बहुत्वनिरवकाशत्वादिना बलवत्त्वात् ॥ ॥ १०४३ ॥

रक्षो घ्नन्ति हि शान्त्यर्थं कं घ्नन्ति जगतीपतिम्।
बाधकत्वेन बलिताऽप्येतेनैव बहिर्गता ॥ १०४४ ॥

तव मिथ्यात्वसाधकाभिमतं वाक्यं जगतः अत एव जगतीपतेश्च हननाय प्रवृत्तं रक्षःसदृशमेव बाधार्हम्। बहिर्गतेति। हीनबलताया अत एव बाधार्हत्वस्योपपादितत्वादिति भावः ॥ १०४४ ॥

साधकस्य सदोषत्वे बाधकं प्रबलं भवेत्।
विदोषसाधकस्याग्रे किं बाधकशतेन ते ॥ १०४५ ॥

विदोषसाधकस्येति 'निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः। सर्वशक्त्यल्पशक्तित्वे मिथ्येति च न युज्यते' इत्युक्तेः। **बाधकशतेन** विरोधिशतेन। **ते इति**। तव तेषां बाधकत्वं दुराग्रहदुर्विलासमात्रमूलमिति हृदयम्॥ १०४५॥

न ह्यापणस्थरूप्यस्य बह्वाघातेऽप्यरूप्यता।
रसयोगेऽपि तद्रूपनाशादभिभवेन वा।
रूपान्तरस्य चोत्पत्तौ तस्यैव स्यात्सुवर्णता ॥ १०४६ ॥

आपणस्थरूप्यं वास्तवं निर्दोषं नेहनानेति वाक्यम्। **बह्वाघातः** जगदपलापरूपो मायावादिकल्पितोऽर्थः। न ह्यरूप्यता। जगतो वा तदन्तःपातिनः स्वस्य वा मिथ्यात्वं नैव प्रतिपादयति। **रसयोगे** तात्पर्यविमर्शे **रूपान्तरं** मानान्तरानुगुणमर्थान्तरम्। **सुवर्णता** ब्रह्मणः स्वगतभेदनिषेधरूपमहिम–प्रतिपादकता॥ १०४६॥

फलस्य पीतपक्वत्वमिव बाधो न कस्यचित्।
तस्यैवावस्थान्तरत्वान्मिथ्यात्वापादनं न तत् ॥ १०४७ ॥

कस्यचित् न बाधः फलस्य अवस्थाऽन्तरापत्तिः पूर्वरूपस्य नाशः। न तु मिथ्यात्वम्। एवं वेदस्य अर्थान्तरम्। पूर्वार्थस्य परित्याग एव। न कस्यापि बाधः। 'वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना' इति व्यासस्मृतेः॥ १०४७॥

ततः काचादिदोषोत्थो बाध्योऽस्तु रजतभ्रमः।
तद्दोषहीनमानोत्था विश्वधीर्नैव बाध्यते ॥ १०४८ ॥

दोषहीनं अपौरुषेयत्वेनानाशङ्कितदोषं॥ १०४८॥

काचादिदोषतोऽन्योऽपि यस्तु दोषो मतस्तव।
अविद्यावद्विषयतासंज्ञो भाष्यकृतोदितः ॥ १०४९ ॥

दोषस्स तूष्णीं किमुत प्रमायाः प्रतिरोधतः।
भ्रमस्योत्पादकत्वाद्वा कं पक्षमवलम्बसे ॥ १०५० ॥

अविद्यावद्विषयता अतत्त्वावेदकता। य इत्यस्य उत्तरश्लोकस्थेन स इत्यनेनान्वयः। **तूष्णीं** स्वसमयदुराग्रहमात्रेण। तदुक्तं वादावल्यां 'दोषश्चाविद्यैव परस्येष्टा। सा च यदि वेदान्तानामपि मूलं तर्हि प्रत्यक्षे प्रद्वेषः किंनिबन्धनः' इति। अतः आविद्यकत्वस्य प्रत्यक्षे एव दोषत्वोक्तिर्दुराग्रहनिबन्धनैव। प्रमायाः प्रबलप्रमाणस्य **प्रतिरोधतः** विरोधात्। **उत्पादकत्वादिति** अप्रामाण्यस्योत्पत्तौ परतस्त्वादिति भावः ॥ १०५० ॥

आद्ये गुणोऽपि दोषः स्याद् द्वितीये ते मते प्रमा।
ब्रह्मचिन्मात्रविषया तद्रोधात्तत्र केवलम्।
दोषोऽस्त्वसौ घटाद्यर्थे दोषता तस्य किंकृता ॥ १०५१ ॥

आद्ये स्वपरिभाषामात्रत्वेन दोषत्वं इति पक्षे। **गुणोऽपीति।** त्वन्मतेऽधिष्ठानसत्यत्वं गुणोऽपि शून्यसमयपरिभाषया दोषः स्यात्। **द्वितीये** प्रबलप्रमाणविरोधेन दोष इति पक्षे। **प्रमा** चरमसाक्षात्कारः। **तत्र केवलं** चित्येव ॥ **किंकृतेति।** तस्या अचेतनघटाद्यविषयकत्वादेवेत्यर्थः ॥ १०५१ ॥

मम जीवगताविद्या तस्येशविषयप्रमाम्।
रूणद्धि तस्य दोषोऽसौ तत्रैव न परात्मनि ॥ १०५२ ॥

स्वमते तु नायं दोष इत्याह **ममेति।** जीवाश्रितो दोषो जीव एव परमात्मविषयकप्रमाप्रतिबन्धक इत्यङ्गीकारात् दोषोऽन्यत्र तत्कार्यं तु अपरत्र इत्येवंरूपदोषाभावः। तदुक्तं भगवत्पादैः 'स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्भवेदि'ति ॥ १०५२ ॥

घटादिषु प्रमारोधस्तवापि न ममापि न।
तत्प्रत्यक्षादिमानेषु का हानिस्स्यादविद्यया ॥ १०५३ ॥

घटादिषु जडेषु। मतद्वयेऽपि अज्ञानस्य जडाश्रितत्वानङ्गीकारात्। तव मते 'अप्रकाशस्वरूपत्वाज्जडेऽज्ञानं न मन्यते' इत्युक्तेः। मम मते अज्ञानस्य

जीवाश्रितत्वमात्रस्य स्वीकारात्। **का हानिरिति**॥ **मानेषु** जडविषयकेष्विति शेषः ॥ १०५३ ॥

चक्षुर्दोषस्य काचस्य किं घ्राणादौ च दोषता।
क्वचित्कश्चिद्दोष इति यत्प्राहुः पूर्वसूरयः ॥ १०५४ ॥

यो दोषो यत्रानाश्रितो न स तत्र स्वकार्यकर इत्यत्र दृष्टान्तमाह **चक्षुरिति**। **क्वचित्** स्वाश्रय एव ॥ १०५४ ॥

तृतीयेऽपि भ्रमः कस्ते यद्धेतुत्वेन दोषता।
न हि कुड्यघटाद्यर्थधीरेषा भ्रमरूपिणी।
कुड्यत्वादियुतेष्वेव कुड्यत्वादिप्रकारिका ॥ १०५५ ॥

भ्रमोत्पादकत्वादज्ञानं दोष इति तृतीयं निराह **तृतीय इति**। **क इति** घटकुड्यादिविषयकः उत ब्रह्मविषयकः। नाद्यः कुड्यादिधियां तद्वति तत्प्रकारकत्वेन प्रमात्वादेवेति भावः ॥ १०५५ ॥

भ्रमो हि ब्रह्मणि तव तद्वाविद्यापि तद्भ्रमम्।
संपादयन्ती तत्रैव दोषः स्याच्छक्तिशोधने ॥ १०५६ ॥

द्वितीयस्तु स्यादित्याह **भ्रम इति**। **तत्रैव** न घटादिविषये इयं च अभ्युपगमोक्तिः। वस्तुतस्तु ब्रह्मणोऽपि प्रमितेऽर्थे न भ्रम इति भावः ॥ १०५६ ॥

प्रत्यक्षादिप्रमाणानां जडानां जीववर्तिनाम्।
कथं सा भ्रमहेतुः स्याच्चक्षुर्दोषोऽपि को भवेत्॥ १०५७ ॥

प्रत्यक्षादिप्रमाणानामपि जडत्वेन नाज्ञानाश्रयत्वम्। **सा** अविद्या। **को दोषो भवेत्** चाक्षुषवृत्तेः भूतले घटः, घटे घटत्वं इत्यादेः तद्वति तत्प्रकारकत्वेन प्रमात्वात् तत्र दोषकल्पनाया एवानवकाशादिति भावः ॥ १०५७ ॥

किञ्चित्प्रमासाधकश्च बहुतद्रोधकश्च यः ।
स दोषो भ्रमदो दृष्टः प्रमाऽभावे भ्रमः कुतः ॥ १०५८ ॥

चाक्षुषादिवृत्तीनां सर्वथा प्रमात्वमेवेति सिषाधयिषुर्भिक्षुपादप्रसरणन्यायेन तासां विशेष्यांशे तावत्प्रमात्वं परीत्याप्यङ्गीकार्यमेवेत्याह **किञ्चिदिति** । अधिष्ठानांशे प्रमा । तदंशे बाधकाभावात् । **बहुतद्रोधकः** प्रकाराणामंशे प्रमात्वविघटकः । **प्रमाऽभावे** अधिष्ठानांशे प्रमाऽभावे ॥ १०५८ ॥

सर्वं ज्ञानं यतो धर्मिण्यभ्रान्तं सर्वदेहिनाम् ।
घटे घटत्वमिति धीः कथं स्यात्केवलं भ्रमः ॥ १०५९ ॥

केवलं भ्रमः कथं स्यात् इति । भ्रमस्यापि उक्तरीत्या भ्रमप्रमोभयरूपत्वादिति भावः ॥ १०५९ ॥

कल्प्यादधिकसत्ताकमधिष्ठानं तवैव हि ।
यतोऽवश्यं ततो व्यक्तिस्सत्यैवासीत्परात्मवत् ॥ १०६० ॥

ननु भूतले घटः, घटे घटत्वं, इत्यादि प्रतीत्या अधिष्ठानतया न भूतलघटादीनां सत्त्वसिद्धिः । तत्र मया भूतलघटाद्यवच्छिन्नचैतन्यानामेवाधिष्ठानत्वाङ्गीकारादिति चेन्न । भूतलादिशब्दानां तत्तदवच्छिन्नचैतन्ये लक्षणाश्रयणस्य सार्वजनीनानुभवविरोधात् । तथाऽपि भूतलघटादिव्यक्तीनां पारमार्थिकत्वं कुत इति चेत्त्वदभ्युपगत- न्यायेनैवेत्याह **कल्प्यादिति** । **तवैव** सत्तात्रयवादिन एव । भूतले घट इत्यत्र भूतलस्य, घटे घटत्वमित्यत्र घटस्य एवं चालनीन्यायेन सर्वासां व्यक्तीनां अधिष्ठानत्वेन पारमार्थिकत्वमेव सिध्यति । व्यावहारिकत्वेन त्वदभिमतघटपटत्वाद्यधिष्ठानत्वादेवेति भावः ॥ १०६० ॥

तद्व्यक्त्यंशे प्रमैवेयं भवेद्युक्तिबलेन धीः ।
जात्यंशेऽपि प्रमा सा स्यात्तासां
चास्वेव संस्थितेः ॥ १०६१ ॥

इदानीं वृत्तीनां प्रकारांशेऽपि प्रमात्वमेवेत्याह **जात्यंशेऽपीति**। **तासां** घटत्वादिजातीनां **तास्वेव** घटादिव्यक्तिष्वेव। तथा च विशेष्यवृत्तिप्रकारकत्वात् सर्वांशेन प्रमात्वमेवेति भावः ॥ १०६१ ॥

घटावच्छिन्नचैतन्ये घटत्वमिति कस्य धीः।
घटाधिष्ठानचैतन्ये घटोऽध्यस्तः परं तव ॥ १०६२ ॥

घटाधिष्ठानचैतन्ये घटत्वारोप इत्येतत्सार्वजनीनानुभवविरोधेनापाकृतम्। परप्रक्रिययाऽपि तन्निराह। घटाधिष्ठानचैतन्ये घट आरोपित इति प्रक्रियामुल्लंघ्य, इदानीं तत्र घटत्वारोपाङ्गीकृतिः कथं न व्याहतेति भावः ॥ १०६२ ॥

घटत्वं तु घटे नोचेत्सा धीः स्यात्प्रातिभासिकी। १०६३ ॥

घटे नोचेदिति किन्तु घटावच्छिन्ने चैतन्ये एव स्याच्चेदिति पूरणीयम्। **सा धीः** घटावच्छिन्ने चैतन्ये घटत्वमिति धीः। **प्रातिभासिकी**। इदानीमेव ब्रह्मप्रमाऽन्येन 'घट एव घटत्वं, न घटावच्छिन्नचैतन्ये इति' ज्ञानेन बाधदर्शनादि'ति भावः। एवं प्रतिभासमात्रशरीरत्वेन घटत्वस्यापि प्रातिभासिकत्वं स्यात्। तथा चापसिद्धान्त इति भावः ॥ १०६३ ॥

पृथुबुध्नोदराकारव्यक्तावेव घटत्वधीः।
व्यंजको ह्ययमाकारो व्यंग्या जातिश्च सा किल।
तस्मादनन्तव्यक्तीनां सत्यता युक्तितोऽभवत् ॥ १०६४ ॥

व्यंग्यव्यंजकयोः सामानाधिकरण्यनियमादपि घट एव घटत्वधीः न तदवच्छिन्नचैतन्य इति सिध्यतीत्याह **व्यञ्जक इति**। घटत्वजातेर्व्यञ्जको हि पृथुबुध्नोद्याकारः। स च घटनिष्ठ एव न चैतन्यनिष्ठः। तस्य निराकारत्वात्। अतो व्यंग्यजातिरपि घटनिष्ठतयैव भातीति भावः॥ **अनन्तव्यक्तीनामिति** पूर्वोक्तचालनीन्यायेनेति भावः ॥ १०६४ ॥

तद्विशेषविदो धीत्वाज्जातिधीरपि न भ्रमः ।
तत्रैव विद्यमानार्थधीत्वादपि न स भ्रमः ॥ १०६५ ॥

विशेषविदः आकारव्यंग्यजातिः आकाराश्रयघटवृत्तिरेवेति विशेषविदः । तत्रैवेति न तु चैतन्ये । तस्य निराकारत्वेन जातिव्यञ्जकत्वासंभवादिति भावः । तथा च विशेष्यवृत्तिधर्मप्रकारकत्वात्, घटे न घटत्वं इति बाधकप्रत्ययाभावादिति च । उक्तं च भामत्यां 'लौकिकानि हि प्रमाणानि सदसत्त्वगोचराणि । तैः खलु सदिति गृह्यमाणं सदित्येव यथाभूतं अविपरीतमेव तत्त्वं व्यवस्थाप्यते । अतात्त्विकत्वं तु तेषामन्यतो बाधकादवगन्तव्यं इति [भे. प. ब्र. सू. १/९१] ॥ १०६५ ॥

तस्मादरजतव्यक्तौ दोषाद्या रजतत्वधीः ।
स भ्रमः स्यान्निजव्यक्तौ जातिधीस्तु न विभ्रमः ॥ १०६६ ॥

निजव्यक्तौ घटत्वाश्रये घटे । घटत्वधीः घटत्वमस्ति धीः । न विभ्रमः तद्वति तत्प्रकारकत्वात् ॥ १०६६ ॥

तद्ब्रह्मभ्रमसृष्टार्थदर्शनाद्भ्रान्तिताऽपि न ।
जातिभ्रमे धर्मिभूतव्यक्तिः सत्या यतो ध्रुवा ॥ १०६७ ॥

घटस्य ब्रह्मभ्रमसृष्टत्वे हि तद्विषया वृत्तिः भ्रान्तिः स्यात् । तदेव नास्ति । चालनीन्यायेन अधिष्ठानतया सर्वपदार्थानां सत्यत्वस्य व्यवस्थापितत्वादित्याह तदिति । तत् तस्मात् ॥ १०६७ ॥

कथं च ब्रह्मणोऽन्यत्र योगायोगाद्भ्रमस्तव ।
सत्यो घटोऽन्यसृष्टोऽपि यदन्यैः परमीक्ष्यते ।
अन्यदृष्टे तु मिथ्यार्थे क्वास्त्यन्यस्यापि दर्शनम् ॥ १०६८ ॥

एकस्य रजतभ्रान्तौ किमन्येषां च तद्भ्रमः ।
स्वरूपैक्यात्समाधानमपि तेन न शोभते ॥ १०६९ ॥

योगायोगात् अध्यासासंभवात्। एकभ्रमदृष्टे अन्यस्य कस्यापि प्रमा न संभवति। प्रमाभ्रमयोरेकविषयकत्वायोगात्। इत्याह **अन्येति**॥ १०६८॥
॥ १०६९॥

अन्यत्रादृष्टपदवी कथमत्रैव कल्प्यते।
अदृष्टकल्पनादोषो रुन्धे त्वद्दोषदोषताम्   ॥ १०७०॥

अन्यत्र शुक्तिरजतादौ। **अत्र** घटादौ। शुक्तिरजतज्ञानस्य वस्तुतो भ्रमत्वे सर्वेषां च तथाविधं ज्ञानं भ्रम एव। अन्यथा व्यक्तिभेदेन प्रमाभ्रमसाङ्कर्ये वस्तुनो द्वैरूप्यापत्तिः। दोषदोषतां काचादीनामिन्द्रियदोषताम्। **अदृष्टकल्पना** तस्यैव दोषस्य इन्द्रियान्तरे विद्यमानत्वेऽपि तदिन्द्रियस्य दुष्टत्वानापादकत्वकल्पना॥
॥ १०७०॥

अज्ञानोपादानकत्वमर्थदोषस्तु यस्तव।
कुंभकारकुविन्दाद्याः सद्यो दद्युस्तदुत्तरम्।
न तैस्सह वयं ब्रूमः कृतग्रन्थपरिश्रमाः   ॥ १०७१॥

घटादिप्रत्यक्षवृत्तेरतत्वावेदकत्वं इन्द्रियदोषाभावेऽपि अर्थदोषादेवेति पक्षं निराह **अज्ञानोपादानकत्वमिति**। मिथ्यात्वं चेत् तस्य उत्पत्तेरेवाभावेन तदर्थं कुलालादीनां कारणकलापोपादानस्य निरर्थकत्वापातात्। तदुक्तं 'न निरोधो न चोत्पत्तिः' इति गौडपादकारिकां व्याकुर्वता परेणैव 'सतो हि घटस्योत्पत्तिर्विनाशो वा दृष्टः नासतः शशविषाणादेरि'ति। तथा चैवमीदृशासंबद्धभाषणशीलः विद्वत्कर्तृकविचारगोचरवाक्यप्रबन्धात्मककथाया बहिष्कारस्यैवार्ह इत्याह **नेति**॥
॥ १०७१॥

कथं च वृत्तिनाश्यं तदज्ञानं तत्र दूषणम्।
अविद्यावत्त्वचर्चायां वक्ष्यामस्तत्र चोत्तरम्   ॥ १०७२॥

अज्ञानापगमे तत्तद्वस्तु ब्रह्म तवोल्लिखेत् ।
तद्भ्रान्तिसृष्टत्वकथाऽप्येषां तस्माद्वृथा भवेत् ॥ १०७३ ॥

चैतन्यावरकाज्ञानाख्यदोषस्य वृत्त्या नाशोत्तरं जायमानस्य 'ज्ञातं मयेदं त्वि'ति ज्ञानस्य कथं तद्दोषजन्यत्वं । कथंतरां च भ्रमत्वमित्याह **कथमिति** ॥ ॥ १०७२ ॥ १०७३ ॥

तस्मान्नात्राक्षदोषोऽस्ति नार्थदोषोऽपि दृश्यते ।
चित्रं पित्रोरभावेऽपि भ्रमसूनुरयं तव ।
तस्मात्सत्यं जगत्सर्वमभ्रान्तेरपि दर्शनात् ॥ १०७४ ॥

तस्मात् सत्यमिति निर्दोषार्थेन्द्रियसन्निकर्षजन्यप्रत्यक्षादिदृष्टत्वात् । तदुक्तं वादावल्यां 'प्रत्यक्षादेरतत्वावेदकत्वे मानाभावात् । विषयस्यासत्त्वादेव तत्सिद्धिरिति चेत्तदेव कुत' इति ॥ पिता काचादिरिन्द्रियदोषः । माता अविद्याऽऽख्यार्थदोषः । सूनुः भ्रमः ॥ १०७४ ॥

पृथुबुध्नोदराकारे घट एव घटत्वधीः ।
तस्यापि स्याज्जडाकारव्यंग्यधीर्न निराकृतौ ।
तदा पूर्वोक्तयुक्त्यैव तत्रापि भ्रान्तिता गता ॥ १०७५ ॥

निराकृतौ निराकारे चैतन्ये । तत्रापि जातिरूपप्रकारांशोऽपि ॥ १०७५ ॥

यस्मात्सार्वजनीनोऽयं न स्यादनुभवो भ्रमः ।
अतोऽत्र दोषचिन्तां च नदोषज्ञोऽनुमन्यते ॥ १०७६ ॥

अतः 'बल्येवानुभवः सदा' इति ब्रह्मतर्कोक्तेः 'न चानुभवविरोधे आगमप्रामाण्यं' इति तत्त्वनिर्णयोक्तेश्च ॥ १०७६ ॥

ब्रह्मण्यविद्यमानांस्तान्यदि ब्रह्मणि दर्शयेत्।
तदा भ्रमोऽपि सा धीस्स्याद्घटादिस्वस्वधर्मिषु।
तांस्तान्धर्मान्दर्शयन्ती केन वा हेतुना भ्रमः ॥ १०७७ ॥

अनुभवो घट एव घटत्वं गोचरयति न तु घटत्वानाश्रये ब्रह्मणि अतो निरवकाश इत्याह ब्रह्मणीति ॥ १०७७ ॥

अथ धर्मा न सन्त्येव तेषु तेषु च धर्मिषु।
अतस्तेष्वेव तत्तद्धीर्यदि भ्रान्तिरितीर्यते ॥ १०७८ ॥

तर्हि कुड्येऽपि घटधीर्घटादौ पटधीरपि।
कुतो न तेन ते धर्मास्सन्त्येव
स्वस्व(भूमि) धर्मिषु ॥ १०७९ ॥

कुड्ये घटत्वमिति धीवत् यदि ब्रह्मणि घटत्वमिति धीः स्यात् तदैव परं सा भ्रमः स्यात्। सा नास्त्येव। ब्रह्मणि घट इति धीस्तु तस्य विश्वाधारतोपपादकत्वात् प्रमैवेति भावः ॥ १०७८ ॥ १०७९ ॥

न चेत्कुतो न सन्तीति प्रश्ने किं स्यात्तवोत्तरम्।
बाधादिति वदंश्चापि प्रष्टव्यः प्रतिवादिना ॥ १०८० ॥

घटे घटत्वबाधश्चेत्स नास्ति मरणेऽपि ते।
ब्रह्मण्यखिलबाधस्तु न बाधस्तेषु तद्धियाम् ॥ १०८१ ॥

बाधाभावाच्च घटे घटत्वं इति धीः प्रमैवेत्याह न चेदित्यादिना ॥ मरणेऽपि कालत्रयेऽपि। तेषु तद्धियां विशेष्यवृत्तिधर्मप्रकारकधियाम् ॥ १०८० ॥ ॥ १०८१ ॥

किन्त्वेषां जडधर्माणां ब्रह्मणि प्रतिषेधने।
जडधर्मत्वदार्ढ्यं स्यात्तदभावः कुतो वद ॥ १०८२ ॥

ब्रह्मणि चैतन्ये। **दार्ढ्याय** घटत्वादिः जडमात्रवृत्तिधर्म इति निर्णयाय॥ ॥१०८२॥

व्यावहारिकताऽप्येषां बाधादेव भवेत्तव।
स च नैतेषु ते धर्मास्सन्तीत्याकारकोऽस्ति न॥ १०८३॥

भावी च नासौ बाधस्तद्व्यावहारिकता कुतः।
न ब्रह्मणीदमिति तु बाधो नैतान्प्रबाधते ॥ १०८४॥

एषां घटत्वादीनाम्। **बाधादेवेति** 'बाध्यविषये व्यावहारिकमित्यस्य अद्वैतिपरिभाषामात्रसिद्धत्वादि'ति कल्पतरूक्तेः। **स च** बाध **एतेषु** घटादिषु। **ते धर्माः** घटत्वादिधर्माः न सन्तीत्येवंरूपः नास्ति। तत् तस्माद्बाधाभावात्। **कुतः इति** अतात्त्विकत्वं तु तेषामन्यतो बाधकादवगन्तव्यमि'ति भामत्युक्तेः। 'न ह्ययं सर्वप्रमाणसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुं इति परभाष्याच्च। [भे. प. ब्र. सू. १/९३] ॥ **न प्रबाधते** भिन्नविषयत्वादिति शेषः॥ ॥१०८३॥१०८४॥

अतो जडस्थरूपादिगुणानां कर्मणामपि।
जात्यादीनां च सर्वेषामबाध्यत्वेन सर्वदा ॥ १०८५॥

व्यावहारिकताऽयोगात्तत्सत्त्वं ब्रह्मसत्त्ववत्।
पारमार्थ्येनैव सत्त्वमभूत्सद्युक्तिसत्त्वतः ॥ १०८६॥

सद्युक्तिसत्त्वतः अबाध्यत्वरूपयुक्तिसामर्थ्यात्॥ १०८५॥ १०८६॥

घटोऽपि ब्रह्मणि न चेन्मृत्कपाले भविष्यति।
ब्रह्मण्यखिलबाधस्तु कस्य वा बाधको वद ॥ १०८७॥

कपाले नेति बाधस्तु नास्ति नापि भविष्यति।
तद्धर्मिणां च सर्वेषामबाधात्स्वस्वधर्मवत् ॥ १०८८॥

व्यावहारिकताऽयोगात्पारमार्थ्यमभूद्बलात् ।
आपणस्थस्य रूप्यस्य
शुक्तौ बाधेऽपि का क्षतिः ॥ १०८९ ॥

अतो घटाद्यर्थधीषु भ्रमत्वं नैव शोभते ।
तद्धेतुभूतधर्माणां दोषत्वाऽऽशापि ते वृथा ॥ १०९० ॥

ब्रह्मणि घटो–नेति धीः, कपाले घटोऽस्तीति धियः कथं बाधकं भिन्नविषयकत्वादिति भावः । तथा च, धर्मिणः सत्याः अबाधात् स्वस्वधर्मवत् इति प्रयोगमाह **तदिति** ॥ १०८७ ॥ १०८८ ॥ १०८९ ॥ १०९० ॥

तस्मादाविद्यकत्वं च मृदुपादानकत्ववत् ।
प्रमात्वाप्रतिरोधित्वाद्दोषो नाभूद्विचारणे ॥ १०९१ ॥

तस्मात् निर्दोषप्रमाणेन घटादानां पारमार्थिकत्वस्य व्यवस्थापितत्वात् । अज्ञानस्य मिथ्यात्वं तु कफोणिगुडायितमिति भावः ॥ १०९१ ॥

प्रत्यक्षादिप्रमाणानां व्यावहारिकमानता ।
या परैरुदिता तां च युक्तिरेषा निषेधति ॥ १०९२ ॥

एषा युक्तिः प्रमाणदृष्टत्वयुक्तिः ॥ १०९२ ॥

अतस्साधकमानस्यैवादोषत्वमभूद्बलात् ।
बाधके वैयधिकरण्याख्यदोषेण दुष्टता ।
अतो बाधकमानस्य मानतैवापहीयताम् ॥ १०९३ ॥

बाधकमानस्य 'नेहनानास्ति' इत्यादिकस्य । **वैयधिकरण्येति** इह ब्रह्मणि नास्तीति विशिष्य निषेधस्य स्वस्वाधिकरणेष्वस्तीति शेषविध्यनुज्ञापकत्वे-नाविरोधात् । मानहीनता जगतो मिथ्यात्वप्रतिपादनेऽसामर्थ्यादन्यार्थपरता ॥ ॥ १०९३ ॥

अथ मानाभावतोऽर्थाभावस्तेन च धीर्भ्रमः ।
भ्रमाच्च दोषो दोषेण मानताहीनतेति तु ।
अन्योन्याश्रयतस्तस्य कुरुते बोधहीनताम् ॥ १०९४ ॥

मानाभावात: प्रत्यक्षादीनां सत्त्वग्राहिणां अतत्त्वावेदकत्वादप्रमात्वादित्याशयः । चतुर्णामितरेतराश्रयत्वेऽपि विषयस्यासत्त्वात्प्रत्यक्षादीनां अतत्त्वावेदकत्वं तत एव विषयासत्त्वं इति अन्योन्याश्रय एव पर्यवसानम् । न च तर्हि भवतामप्यन्योन्याश्रयता । विषयसत्त्वे प्रामाण्यसिद्धिः तत्सिद्धौ तत्सिद्धिरिति चेन्न । विषयसत्त्वस्य प्रमाणप्रवृत्तेः प्रागेव तत्प्रयोजकत्वेन सिद्धेः । तदुक्तं वादावल्यां 'अन्यथा शशविषाणवत् प्रमाणप्रवृत्त्ययोगात्' इति । विषयसत्त्वस्य प्रामाण्यं प्रत्यजनकत्वात् च । तदुक्तं तर्कताण्डवे 'तस्य (विषयसत्त्वस्य) अतीतादिविषयकानुमित्यादिसाधारण्येन प्रामाण्यशरीरान्तर्गतत्वेन च तदजनकत्वादि'ति । प्रत्यक्षस्य स्वभावतः प्रबलत्वेन मिथ्यात्वसाधनाय परोपन्यस्तप्रमाणानि बाधित्वा विषयसत्त्वव्यवस्थापनादित्यादिकमूह्यम् ॥ १०९४ ॥

ऐक्यायोगेन मिथ्यात्वं तत्त्वमर्थगतार्थयोः ।
विरुद्धयोः कथञ्चित्स्याद्विश्वाभावस्तु किंकृतः ॥ १०९५ ॥

ननु तत्त्वमसिवाक्यं तावदैक्यं बोधयति । न च तत् तत्त्वं—पदबोध्यविरुद्धधर्माणां सत्यत्वे संभवति । तदर्थं विरुद्धधर्ममिथ्यात्वमास्थेयमिति चेदस्तु तावत् । न तावताऽपि सर्वजगन्मिथ्यात्वसिद्धिरित्याह **ऐक्येति** । कथञ्चिदित्यनास्था । वस्तुतो निर्दोषश्रुतिसाक्षिसिद्धधर्माणां मिथ्यात्वायोग एवेति भावः ॥ १०९५ ॥

सर्वं मिथ्येति सर्वस्य मिथ्यात्वप्रतिपादिका ।
न हि वागस्ति तेनायं विश्वाभावः कुतोऽपतत् ॥ १०९६ ॥

तेन अप्रामाणिकत्वेन प्रमाणविरुद्धत्वेन च ॥ १०९६ ॥

वाक्यं च नाक्षसिद्धस्य बाधकं स्यादितीरितम् ।
अन्यथा लक्षणावृत्तेः शिक्षणं स्याद्विचारय ॥ १०९७ ॥

ईरितं 'न हि प्रत्यक्षसिद्धमन्येन केनापि बाध्यं दृष्टं' इति तत्त्वोद्योते समर्थितम् ॥ १०९७ ॥

यदा ब्रह्मणि नेत्यद्या वाग्वा धीर्वा तदुद्भवा ।
सखण्डा सप्रकारापि सोपादानस्थधर्मिणाम् ।
धर्मिस्थानां च धर्माणां बाधिका नाभवत्तदा ॥ १०९८ ॥

न बाधिका भिन्नविषयत्वादेव ॥ १०९८ ॥

अखण्डार्थानि वाक्यानि निष्प्रकारकधीश्च ते ।
कं बोधयेत्कं कमर्थं बाधयेद्वा विचारय ॥ १०९९ ॥

वाक्यत्वं प्रति संसर्गविषयकत्वस्य, ज्ञानत्वं प्रति सप्रकारकत्वस्य च व्यापकत्वेन वाक्यस्य वाक्यत्वं ज्ञानस्य च ज्ञानत्वं दुर्घटं इति दूरे तयोर्बाधकत्वमित्याशयः । बाधकत्वे भ्रमकालीनापरोक्षबुध्यविषयविशेष-विषयकत्वस्य तन्त्रत्वादिति भावः ॥ १०९९ ॥

तस्मात्साधकमानस्य हीनता मरणेऽपि न ।
अविद्यावद्विषयता नाभूदेवं विचारणे ॥ ११०० ॥

तथाऽक्षादिप्रमाणानां जडानां हीनताऽपि न ।
अविद्यावद्विषयता चेयं दोषः कथं वद ॥ ११०१ ॥

मरणेऽपि कालत्रयेऽपि । प्रत्यक्षस्य निरपवादेन त्रिकालाबाध्यता-ग्राहकत्वात् ॥ ११०० ॥ ११०१ ॥

अविद्यावद्धि ते ब्रह्म नान्यद्घटपटादिकम् ।
महावाक्यान्यमानस्य न तद्विषयतेष्यते ॥ ११०२ ॥

अविद्यावद्विषयकं महावाक्यं हि केवलम् ।
प्रत्यक्षादिप्रमाणस्य मानता केन हीयते ॥ ११०३ ॥

प्रत्यक्षादीनां स्वयं जडत्वेनाविद्याऽनाश्रयत्वात् अविद्यावद्विषयकत्वाभावाच्च तेषामप्रामाण्यमशक्यशङ्कमित्याह ते न इति ॥ बाधकमेव विविच्यताम् । तत्किं महावाक्यं तदन्यद्वा । नाद्यः चिन्मात्रविषयकत्वात् । न द्वितीयः तेषामतत्त्वावेदकत्वोपगमादित्याह अविद्यावदिति ॥ ११०२ ॥ ११०३ ॥

अविद्योपादानकत्वं यदि तद्वत्त्वमीर्यते ।
तदाऽज्ञाने स दोषो न तन्माने हीनताऽपि न ॥ ११०४ ॥

न हि स्वयं स्वस्य हेतुरनादिश्च न हेतुमान् ।
तस्मात्प्रामाणिकत्वेन स्यादज्ञानमबाधितम् ॥ ११०५ ॥

नेति । तदेवोपपादयति न हीति ॥ ११०४ ॥ ११०५ ॥

न ब्रह्मणीदमिति तु बाधे जीवे भवेद्धि तत् ।
अबाधितस्य यत्कार्यं तच्चावश्यमबाधितम् ॥ ११०६ ॥

जीव इति स्वस्वधर्मिषु जडानां सद्भावस्य समर्थितत्वादिति भावः ॥ ॥ ११०६ ॥

अज्ञानोपादानतयाऽप्येवं सति किमागतम् ।
अज्ञानोपादानता चाध्यक्षे दोषस्तवैव हि ।
किं कुम्भकारशालाग्नेः स्यादामघटतो भयम् ॥ ११०७ ॥

अज्ञानस्यामघटवत्सत्यत्वेन अज्ञानं न स्वकार्यसत्त्वभञ्जकमित्याह अज्ञानेति ॥ ११०७ ॥

अज्ञानेऽज्ञानत्वमेव यदि दोषो मतस्तव ।
सदा सदोषविषयं तन्मानं तन्न साधयेत् ॥ ११०८ ॥

तन्मानं अज्ञानविषयकं परोपन्यस्तं मानाभिमतम्। तत् अज्ञानम्। न साधयेदिति। सदोषविषयकत्वादिति भावः ॥ ११०८ ॥

एवं च मृण्मये बाह्यप्रत्यक्षविषये घटे।
अज्ञानमयतावादो युक्त्यज्ञानात्परं तव ॥ ११०९ ॥

युक्त्यज्ञानात् यत्स्वयमप्रामाणिकं शशविषाणादिवत् न तदन्योपादनं इति युक्त्यज्ञानात् ॥ ११०९ ॥

अनाद्यज्ञानपिहितमैक्यमैक्यत्वतो न चेत्।
दुष्टं स्याद्दुष्टसंसर्गान्मानेषु स्यादमानता ॥ १११० ॥

ऐक्यमिति अज्ञानस्य चिदावरकत्वादैक्यस्य च चिदनतिरेकात्। तदुक्तं 'अद्वैतहानिः स्वरूपातिरेके' इति। तथा च न्यायसाम्येन ऐक्ये ऐक्यत्वमेव दोष इति ऐक्यविषयकमानानामप्याभासताऽपत्तिः ॥ १११० ॥

अतोऽतिदूरता सौक्ष्म्यं व्यवधानादियुक्तता।
अर्थे दोषो भवेल्लोकसंमत्या न त्वलौकिकः॥ ११११ ॥

तमसा पिहितत्वं हि महान्दोषो घटादिषु।
तदैक्याध्यक्षविषये विषबिन्दोर्न गारुडम् ॥ १११२ ॥

हिशब्देन न तु पुनः अन्धकारोपादानकत्वम्। खण्डाण्धकारोपादानके महान्धकारे प्रमादर्शनात्। एवं चैक्यविषयकचरमसाक्षात्कारस्यैव दुष्टतोचिता न त्वेव अज्ञानोपादानकघटादिविषयकप्रत्यक्षस्य। गारुडं परिहारोपायः ॥ ११११ ॥ ॥ १११२ ॥

अयोग्यता महान्दोषः शब्दस्यार्थे सतां मतः।
तद्ब्रह्मल्पज्ञयोरैक्यं वाक्यार्थत्वेऽपि दोषवत् ॥ १११३ ॥

अयोग्यता प्रबलप्रमाणविरोधः । **महान् दोषः इति** । योग्यताया आगमप्रमाणलक्षणशरीरान्तर्गतत्वादिति भावः । **वाक्यार्थत्वेऽपि** तात्पर्यभ्रमरूपदोषेण तथा प्रतीयमानत्वेऽपि । **दोषवत्** अग्नौ आभासमानेन जलेन प्रतीयमानैक्यवद् बाधितम् । तदुक्तं परभाष्यकारेणैव । 'कथमेकत्वमनयोर्घटते विपरीतयोः । प्रत्यक्षेण विरोधोऽयमुभयोरुपलभ्यते इति ॥ १११३ ॥

अविद्यावद्विषयतां दोषमाह गुरुस्तव ।
तदर्थमन्यथीकृत्य न चार्थीकुरु तद्वचः ॥ १११४ ॥

परभाष्यसंमत्यैवाविद्योपादानकत्वं कथंचित्सदपि न घटाद्यर्थदोष इत्याह **अविद्यावदिति** ॥ १११४ ॥

न चेद्दुष्टाज्ञानजं ते तत्त्वज्ञानं कथं शुभम् ।
तज्ज्ञानजनकं मानं कथं मानमभूद्वद ॥ १११५ ॥

तत्त्वार्थविषयत्वेन ज्ञानस्य शुभता यदि ।
दुर्ज्ञानविषयत्वेन तस्यैवातत्त्वता न किम् ॥ १११६ ॥

न चेत् अज्ञानावृतत्वं न दोषा किन्तु तदुपादानकत्वमेवेत्यङ्गीक्रियते चेत् । तत्त्वज्ञानं चरमसाक्षात्कारः । तस्यापि स्वबाध्यत्वेनाज्ञानजन्यत्वावश्यंभावात् ॥ ॥ १११५ ॥ १११६ ॥

अर्थायाथार्थ्ययाथार्थ्ये ज्ञानैकशरणे किल ।
ज्ञानस्यैव प्रदुष्टत्वे कथमर्थस्य तत्त्वता ॥ १११७ ॥

वैपरीत्यमेवोचितमित्याह **अर्थेति** । किलेत्यनेन 'संविदेव हि भगवती विषयसत्त्वोपगमे नः शरणमि'ति प्रसिद्धिं द्योतयति ॥ १११७ ॥

तत्त्वसत्त्वात्तवाज्ञानकार्यता दूषणं न चेत् ।
मृत्त्वसत्त्वान्ममाज्ञानकार्यताऽपि न दूषणम् ॥ १११८ ॥

तत्त्वेति ऐक्येत्यर्थः। **मृत्त्वसत्वात्** मृदि मृत्त्वमिति प्रतीतेर्बाधाभावस्य समर्थितत्त्वात्। अपीति अरुचिसूचकेन वस्तुतोऽज्ञानकार्यता नास्त्येवेति ध्वनयति ॥ १११८ ॥

त्वन्मात्रसंगृहीतैक्ये दोषघ्नी यदि तत्त्वता।
सर्वोपकारके सर्वदोषघ्नी किन्न तत्त्वता ॥ १११९ ॥

दोषघ्नी अज्ञानजन्यत्वरूपदोषनिवारणी। **सर्वोपकारके** जगति। **सर्वेति**। प्रमाकरणेषु क्लृप्तकाचदूरस्थत्वादिसकलपरिहारिणी। **तत्त्वतेति**। अबाधिततायाः प्रागेव समर्थितत्वादिति भावः ॥ १११९ ॥

अथेहाज्ञानकार्यत्वं यदि दोषाय नेष्यते।
कुतोऽन्यत्र स दोषस्स्यात्तद्दूष्यं भाष्यमेव ते ॥ ११२० ॥

अत्र ऐक्यज्ञाने। **अन्यत्र** प्रपञ्चज्ञाने ॥ **दूष्यमेव** उभयतः पाशारज्जुदूषणेन ॥ ॥ ११२० ॥

अज्ञानजत्वं दोषश्चेद्गतमेव मतं तव।
नाज्ञानजत्वं दोषश्चेद्गतमेव मतं तव ॥ ११२१ ॥

तदेव द्वाभ्यां विशदयति **अज्ञानजत्वमिति**। **तव मतं** त्वत्संमतमैक्क्य-ज्ञानम्। द्वितीययोजनायां **मतं** विश्वमिथ्यात्वम् ॥ ११२१ ॥

भाष्यस्यान्यार्थकथनं हन्तैक्यं तव कृन्तति।
यथास्थितार्थवार्ता च हन्तैक्यं तव कृन्तति ॥ ११२२ ॥

अन्यार्थकथनं अज्ञानोपादानकत्वस्य दोषत्वकथनम्। **ऐक्यं** अज्ञानोपादानकम्। **वार्ता** अज्ञानावृतत्वमेव दोष इति प्रजल्पः। **ऐक्यं** अज्ञानावृतम् ॥ ॥ ११२२ ॥

अन्यथा चिन्तितं कार्यं दैवेन कृतमन्यथा।
सर्वार्थान्सञ्जिहीर्षोस्ते महानर्थोऽगमत्क्षयम् ॥ ११२३ ॥

'महदपकारबुद्धिः आत्मन एव कात्स्न्येंन फलति' इति आभाणकविषयतां परस्याह **अन्यथेति**॥ महान् अर्थः इति पदच्छेदः। ऐक्यं इत्यर्थः॥ **क्षयं** अत्यन्तासत्त्वम्॥ ११२३ ॥

अनादेर्जीवभेदादेर्मानैर्भीर्न कथञ्चन।
मानं हीनं चिकीर्षोस्ते मानो हीनो भवेद्ध्रुवम्।
मानं वा तस्य हीनं स्यात्तामसब्रह्मगोचरम् ॥ ११२४ ॥

भीर्नेति अनादित्वेनाज्ञानोपादानकत्वस्याभावात् त्वदनङ्गीकृतत्वेन अज्ञानावृतत्वस्य चेति दोषद्वयस्याप्यभावात् इति भावः। **मानं** अनादित्वेन ब्रह्मवत्सत्यत्वसाधकम्। **मानः** अहङ्कारः। **मानं वा** चरमसाक्षात्काररूपं वा। **तामसेति** तमसाऽज्ञानेनावृतेत्यर्थः। हेतुगर्भविशेषणम्॥ ११२४ ॥

जीवेशभेदे चाज्ञाने बाधेऽनादावसंभवात्।
मृदाद्युपादानकेषु घटादिष्वप्यसंभवात् ॥ ११२५ ॥

बाधे अनादौ इति पदच्छेदः। बाधासंभवे अनादित्वं हेतुः॥ ११२५ ॥

बाधासंभवतः कल्पकाभावेनाप्यसंभवात्।
ब्रह्मज्ञानस्य हीनत्वापातादज्ञानजस्य ते ॥ ११२६ ॥

कल्पकेति अज्ञानोपादानरूपकल्पकेत्यर्थः। **अज्ञानजस्येति** हेतूक्तिः॥ ॥ ११२६ ॥

दोषजन्यासु धीष्वेवाप्रामाण्यस्य प्रदर्शनात्।
तमोऽवयवजन्येषु तमस्सु तददर्शनात्।
प्रामाण्यानुभवाच्चैव तमोनीलिम्नि चाखिलैः॥ ११२७ ॥

अज्ञानोपादानकत्वमप्यर्थेऽनर्थकृन्न तत्।
अविद्यावद्विषयता कथं दोषो भवेद्वद ॥ ११२८ ॥

तमउपादानकत्ववत् अज्ञानोपादानकत्वमपि न सत्यत्वविघटकमित्युक्तं स्मारयति दोषेति ॥ ११२७ ॥ ११२८ ॥

यद्वृत्तौ तन्निवृत्तिस्ते तन्नाशोत्तरवर्तिनी।
यतश्च दृक्तश्चैष दोषः कं दूषयेद्वद ॥ ११२९ ॥

अज्ञानदोषतावादस्तन्न खेदाय धीमताम्।
यतः केनाप्युपायेन जगज्ज्ञाने न हीनता ॥ ११३० ॥

कथमित्युक्तमेवोपपादयति यदिति यस्मादित्यर्थः। तन्निवृत्तिः अज्ञाननिवृत्तिः। दृक् ज्ञातो मया घट इति घटविषयकं ज्ञानम् ॥ ११२९ ॥ ॥ ११३० ॥

पश्य प्रामाणिकत्वाख्यहेतोर्नृपशिखामणेः।
तर्कमन्त्रिबलादेव प्रत्यर्थिमुखमोटनम् ॥ ११३१ ॥

नृपशिखामणेः जगतः क्षयकारिणो मिथ्यात्वसाधकमायिनो निरस्य संरक्षणपरस्य, त्रैलोक्यपालकब्रह्मणि गृहीतव्याप्तिकस्य। तर्केति। यदि सत्यं न स्यात् तर्हि प्रामाणिकत्वमेव न स्यादिति विपक्षे हेतूच्छित्तिरूपतर्कानुगृहीतत्वात् ॥ ॥ ११३१ ॥

यतोऽज्ञानस्यैव दोषाज्जन्मदोषो न वस्तुनः।
तमसो नीलिमा यस्मात्तमस्येव प्रमीयते ॥ ११३२ ॥

दोषेणापिहितत्त्वं तु स्यादर्थस्यापि दूषणम्।
तमोवृतघटादीनां यतो न स्फुटमीक्षणम् ॥ ११३३ ॥

अज्ञानावृतत्वमेव दोषः। न तदुपानकत्वमिति तमोदृष्टान्तेन समर्थितं स्मारयति **यत इति द्वाभ्याम्** ॥ ११३२ ॥ ११३३ ॥

अतस्तवैक्यधीरेव द्वेधाऽप्यासीद्धि विभ्रमः।
यदैक्यावृतिरज्ञानं तद्धीश्चाज्ञानजा तव ॥ ११३४ ॥

ऐक्यस्य अज्ञानावृतत्वेन तद्विषयकचरमसाक्षात्कारस्य अज्ञानजन्यत्वेन च ॥ ॥ ११३४ ॥

अनावृतं तु तमसा तवाज्ञानेन चाखिलम्।
जडं जगज्जडैर्मानैरज्ञानानाश्रयैश्शुभैः।
दृश्यमानं कथं च स्यादप्रामाणिकमुच्यताम् ॥ ११३५ ॥

किञ्चाज्ञानस्य सत्यत्वे तदुपादानकं जगत्।
सत्यमेवेति मानानां मानताहीनता कुतः ॥ ११३६ ॥

प्रपञ्चः तद्विषयकं ज्ञानं चोभयमपि जडरूपत्वेन न तत्राज्ञानप्रसक्तिरित्याह **अनावृतमिति**। 'आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला' इति त्वदुक्तेः ॥ ११३५ ॥ ११३६ ॥

अतो मानान्तरेणादौ मिथ्यात्वमखिलस्य च।
वक्तव्यमासीत्तेनायं त्यक्तव्यो भाष्यकृत्तदा ॥ ११३७ ॥

योऽविद्यावद्विषयतां व्यर्थमादत्त मत्तवत्।
अन्योन्याश्रयदोषं च योऽसौ भूषाममन्यत ॥ ११३८ ॥

मिथ्यात्वे जगतस्सिद्धे मानानां हीनता भवेत्।
विरोधिमानहैन्ये च मिथ्यात्वं जगतो यतः ॥ ११३९ ॥

अयं स्वसिद्धान्तविरोधिप्रक्रियां रचयन् ॥ ११३७ ॥ ११३८ ॥ ११३९ ॥

अतः प्रामाणिकत्वाख्यहेतुर्विजयतेतराम् ।
परन्यायेनैव परं यो हन्ति स्म रणाङ्कणे　　॥ ११४० ॥

परन्यायेन अज्ञानावृतत्वं दोष इति, जडे च न तदावृतत्वं इत्यादि न्यायेन ॥ ॥ ११४० ॥

भेदेशधर्मविश्वाख्यत्रिलोकीसत्त्वरक्षणे ।
प्रामाणिकत्वहेतुस्तज्जंभारिरिव जृंभते　　॥ ११४१ ॥

भेदश्च ईशधर्माश्च विश्वं चेति त्रिलोकी। उक्तत्रयेऽपि प्रमाणदृष्टत्वं परेणाभ्युपगतमिति न क्षुद्रोपद्रवः। प्रमाणानां अतत्वावेदकत्वोक्तिस्तु व्याहतत्वात्तिरस्करणीया ॥ ११४१ ॥

यदि मिथ्या जगत्सर्वं कथमर्थक्रिया ततः ।
मरीचिकाजलैः किं स्याद्धावतस्तृड्विमोचनम् ॥ ११४२ ॥

जलस्य मुख्यकार्यं हि पिपासाशमनं विदुः ।
मरीचिकाजले क्वापि
कदापि न कुतोऽस्ति तत् ॥ ११४३ ॥

अतस्त्वयाऽपि वक्तव्यं मिथ्यात्वादेव केवलम् ।
नाभूदिति तदा सिद्धं तवापि च ममापि च ।
मिथ्याभूतं स्वक्रियायामशक्तमिति सुस्फुटम् ॥ ११४४ ॥

'अर्थक्रियाकारित्वाच्च सत्यत्वसाधनं संभवती'ति वादावल्युक्तं द्वितीयहेतुं समर्थयते यदीति। अङ्गीकृतं चैतत्परेणापि। तथाहि 'नाभाव उपलब्धेरिति' सूत्रे तद्भाष्यं 'भुजिक्रियासाध्यायां तृप्तौ स्वयमनुभूयमानायां नाहं भुञ्जे न वा तृप्यामीति वदन् कथमुपादेयवचनः स्यादि'त्यादि ॥ ११४२ ॥ ११४३ ॥ ११४४ ॥

प्रातिभासिकतैवार्थक्रियाया घातिका यदि ।
प्रतिभासशरीरत्वं तन्मात्राकारताऽथवा ॥ ११४५ ॥

ननु अर्थक्रियया व्यावहारिकसत्यत्वमेव सिध्यति न तात्त्विकमिति चेन्न । किमिदं व्यावहारिकम् । बाध्यं उत अबाध्यम्, आद्ये प्रातिभासिकसमानयोगक्षेमता । बाधविलम्बस्तु न विशेषापादकः । न द्वितीयः इष्टापत्तेः । स्वव्याहता च व्यावहारिकतोक्तिः उक्तं हि भामत्याम् । 'प्रमाणानि खलु स्वगोचरे प्रवर्तमानानि तत्त्वमित्येव प्रवर्तन्ते । न पुनः सांव्यवहारिकं नः प्रामाण्यमि'ति ॥ ११४५ ॥

इदानीं बाध्यता वा स्यात्तत्र नाद्योऽर्थघातकः ।
ज्ञानात्स्वार्थक्रियादृष्टेर्द्वितीयेऽप्यर्थ एव हि ॥ ११४६ ॥

किञ्च व्यावहारिकत्वविशेषणेन व्यावर्त्यं प्रातिभासिकत्वं किं प्रतिभासशरीरत्वं उत प्रतिभासमात्राकारता उत ब्रह्मप्रमान्येन इदानीमेव बाध्यत्वम् । नाद्यः ज्ञानस्यापि स्वोचितार्थक्रियाकारित्वात् ॥ ११४६ ॥

व्यावर्त्त्यो मात्रशब्देन ततोऽर्थाभावलक्षणम् ।
मिथ्यात्वमेव कार्यस्य विघातकमभूद्बलात् ॥ ११४७ ॥

द्वितीयेऽपि मात्रशब्देन अर्थसत्यत्वमेव व्यवच्छिन्नमिति तद्व्यावृत्तौ अर्थाभावस्यैव व्यावर्तितत्वेन सत्यस्यैवार्थक्रियासिद्धिः इत्याह व्यावर्त्य इति ॥ ॥ ११४७ ॥

तृतीयेप्येवमेवासीद्यन्मिथ्यात्वं हि बाध्यता ।
मरीचिकाजलं तस्मान्मिथ्यात्वादेव नार्थकृत् ॥ ११४८ ॥

सत्यं जलं चार्थकारि ततस्सत्यमभूज्जगत् ।
अर्थक्रियाया योग्यत्वाद्व्यतिरेकान्मृषार्थवत् ॥ ११४९ ॥

तृतीयेऽपि बाध्यत्वस्यैव व्यवच्छेदात् अबाध्यस्य मरीचिकाभिन्ननदीजलस्यैव सत्यस्यैव अर्थक्रियासिद्धिरित्याह **सत्यमिति**। अन्वये आत्मा दृष्टान्तः ॥ ११४८ ॥ ११४९ ॥

किञ्च नार्थक्रिया तेऽपि प्रातिभासिकसत्यतः ।
सत्ये जलेऽस्ति सा स्पष्टं तेनेदं सिद्धमावयोः ।
सत्यताऽभ्यधिका यत्र तच्छक्तं नावरं त्विति ॥ ११५० ॥

'व्यवहारसतश्चापि बाधकत्वं तु पूर्ववत्' इति 'सत्त्वस्यासत एवं हि स्वीकार्यैव प्रतीतता' इति च अनुव्याख्यानोक्तं सविस्तरं समर्थयते **किञ्चेत्यादिभिः**। तेऽपि मते प्रातिभासिकसत्ताऽङ्गीकारमात्रतः अर्थक्रिया न स्वीकृता। प्रातिभासिके मरुमरीचिकादौ तददर्शनात् किन्तु त्वत्परिभाषितव्यावहारिकसत्तोपेते जल एव दर्शनात्। तथा च प्रातिभासिकाद्व्यावृत्तं तत्सत्ताऽधिकसत्ताकत्वमेव अर्थक्रियाहेतुरिति ॥ ११५० ॥

आधिक्यं यद्यबाध्यत्वं सिद्धं मम समीहितम् ।
अन्यच्चेन्नाममात्रं तत्त्रिकालासत्त्वसाम्यतः ॥ ११५१ ॥

तत्राधिक्यमेव विविच्यताम्। तत्किं सर्वथाऽबाध्यत्वं उत ब्रह्मप्रमाबाध्यत्वम्। **नाद्यः** इष्टापत्तेः। अबाध्यमेवार्थक्रियाकारि इति अस्मन्मतस्यैवोक्तेः। यदुक्तं वार्तिके 'सत्यं चेत्संवृत्तिः केयमि'ति। सांवृतापरपर्यायव्यावहारिकपदस्य वैयर्थ्येन वंचनार्थमेवोपन्यास इत्येव प्राप्तेः। तदुक्तं तत्रैव "वंचनार्थमुपन्यासो लालावक्त्रासवादिवदि'ति। **नाममात्रं**। तदुक्तं परैरेव 'बाध्यविषये च व्यावहारिकमित्यस्याद्वैतिपरिभाषामात्रसिद्धत्वादि'ति ॥ ११५१ ॥

असतोऽसिद्धकार्यस्य साधकत्वे प्रयोजिका ।
त्रिकालासत्यता स्यात्किं वाच्याऽन्या सत्यतैव हि ।
सा चाबाध्यत्वरूपैव तस्मादन्यन्न विद्यते ॥ ११५२ ॥

असतः इत्युपलक्षणं प्रातिभासिकादित्यपि ग्राह्यम्। तदुक्तं सुधायां 'न ह्यसत्प्रातिभासिकं वा क्वचिदर्थक्रियासूपयुज्यमानं दृष्टं येन तथात्वं प्रतीत्यापि प्रवर्तेत' इति। उभयेभ्यो व्यावृत्तं अबाध्यत्वमेव न तु पुनः प्रातिभासिकसत्यसाधारणं सत्यत्वमात्रम्। तथा सति प्रातिभासिकव्यावृत्त्यसिद्धेरित्याह **सा चेति। अन्यन्न विद्यते इति च** ॥ ११५२ ॥

नभोनैल्यं तव मते देहात्मैक्यं च केवलम्।
बाध्यते चरमज्ञाने साध्यते तावतापि किम् ॥ ११५३ ॥

तत्रार्थकार्यं तन्निष्ठतारादेर्नैल्यमेव च।
चित्त्वं च देहे बाधोऽसौ दूरस्थोऽपि हि वारयेत्॥ ११५४ ॥

बाधे विलम्बमात्रेण नार्थक्रियासिद्धिः किन्तु अबाध्यत्वेनैवेत्येतद् दृष्टान्तद्वयोक्तिपूर्वकं अन्वयव्यतिरेकाभ्यां समर्थयते **नभोनैल्यमिति द्वाभ्याम्**। बाधविलम्बेऽपि सत्यत्वाभावान्न साधकत्वं इत्यत्र दृष्टान्तौ नभोनैल्यं, देहात्मत्वं च। सर्वथाऽबाध्यस्यैव साधकत्वमित्यत्र तारादिनैल्यं चित्त्वं चेति विवेकः ॥ ११५३ ॥ ॥ ११५४ ॥

बाध्यते शुक्तिरूप्यादि तज्ज्ञानं तु न बाध्यते।
यतो रूप्यं नेति बाधो, न तु ज्ञानं च नेत्यपि ॥ ११५५ ॥

ज्ञानकार्यं प्रवृत्त्यादि ततस्तत्रापि जायते।
तस्मादबाध्यतैवार्थक्रियायामुपयुज्यते ॥ ११५६ ॥

'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम्। तदेवार्थक्रियाकारि तत्सदेवार्थकारकम्' इत्यनुव्याख्यानोक्तमाह **बाध्यत इति**। तत्सदेवेत्यनुव्याख्यानोक्तं समर्थयते **यत इति** ॥ ११५५ ॥ ११५६ ॥

अन्वयव्यतिरेकाभ्यां कार्याकार्यव्यवस्थितिः।
प्रवृत्त्या च निवृत्त्या च तौ ज्ञानस्यैव केवलम्॥ ११५७ ॥

प्रवृत्त्या शुक्तिरूप्यज्ञानेन। निवृत्त्या रज्जुसर्पज्ञानेन। तदुक्तं वादावल्यां 'न च रज्जुभुजङ्गादौ व्यभिचारः। तत्र तज्ज्ञानस्यैव भयकम्पादिजनकत्वादि'ति ॥ ॥ ११५७ ॥

उदाहरणमेतस्य कृष्णकाव्ये प्रदृश्यताम्।
पुनरुक्तेर्विस्तृतेश्च भयान्नेहापि लिख्यते ॥ ११५८ ॥

कृष्णकाव्ये रुक्मिणीशविजये। तेन तस्य काव्यस्य शास्त्ररूपत्वात् काव्यालापांश्च वर्जयेदिति निषेधाविषयत्वं अत्युपादेयत्वं च ध्वन्यते। विचित्रविमलश्लाघ्यार्थसंदायित्वोक्तेः ॥ ११५८ ॥

दुराग्रहगृहीतो यो युक्तियुक्तं न पोषयेत्।
स दूषयेन्निजं श्लाघ्यं दोषज्ञत्वं न संशयः ॥ ११५९ ॥

दोषज्ञत्वं पण्डितत्वं 'दोषज्ञः पण्डितः कविरि'त्यभिधानात् ॥ ११५९ ॥

इदानीं बाधबोधोऽस्ति नास्त्यन्यस्य किलाधुना।
किमनेन विशेषेण प्रकृतानुपयोगिना ॥ ११६० ॥

प्रकृतेति अर्थक्रियेत्यर्थः ॥ ११६० ॥

गृहे मृतस्य मरणमुरस्ताडनकारिभिः।
आघोष्यते गुहामध्ये मृतस्य तु कथाऽपि न ॥ ११६१ ॥

अयं न कार्यकर्ता चेत्स किं कर्ता भविष्यति।
अतो हि मरणादन्यज्जीवनं सिद्धये भवेत् ॥ ११६२ ॥

अनाघोषितत्त्वमात्रं न जीवनोचितार्थक्रियाहेतुः। किन्तु वास्तवं जीवनमेवेत्याह द्वाभ्यां गृह इति ॥ ११६१ ॥ ११६२ ॥

असत्त्वं मरणप्रायं सत्त्वमेव हि जीवनम् ।
तस्मादर्थक्रियासिद्ध्यै सत्त्वं वाच्यमबाधितम्॥ ११६३ ॥

प्रकृते सङ्गमयति **असत्त्वमिति** ॥ ११६३ ॥

व्यावहारिकसत्त्वं च सन्नाम्ना छादनं परम् ।
अमङ्गलस्य वारस्य यथा मङ्गलवारता ॥ ११६४ ॥

परिभाषामात्रेण न तदर्थक्रियेत्याह **अमङ्गलस्येति** ॥ ११६४ ॥

किं वाञ्छितफलं दद्यान्नाममात्रमहातरुः ।
त्रिकालेष्वपि सत्त्वस्याभावेन ह्युभयं समम् ॥ ११६५ ॥

व्यावहारिकताबाधे त्वसत्त्वापरनामिका ।
बाधाभावे तु सत्तैव नास्मत्पक्षविरोधिनी ॥ ११६६ ॥

उभयं प्रातिभासिकं व्यावहारिकं च ॥ ११६५ ॥ ११६६ ॥

अतस्ततोऽप्यन्यदेव सत्त्वं हेतुत्वसिद्धये ।
वाच्यं सा चाबाध्यतैव सत्त्रैविध्यं हि ते मते ॥ ११६७ ॥

सत्त्रैविध्यमिति व्यावहारिकस्य बाध्यत्वेऽपि सत्तेति परिभाषणात् ॥ ॥ ११६७ ॥

ध्वस्ते घटे ध्वंस एव कार्यकर्तृत्वघातकः ।
ध्वंसो नामोत्तरासत्त्वं तच्च यद्यर्थघातकम् ।
त्रिकालेऽप्यसतस्तर्हि कर्तृता कथमुच्यताम् ॥ ११६८ ॥

कार्यनियतपूर्ववृत्तित्वाभावो ह्युभयोः समः । अतः अन्यतरस्य अर्थक्रियाहेतुत्वमशक्यशङ्कमित्याह **ध्वस्त इति** ॥ ११६८ ॥

तदानीं बाधितद्रूप्यात्किं कालान्तरबाधिते।
अल्पापि कटकाद्यर्थयोग्यताऽस्ति विचार्यताम्।
अतो (दिनानां) हि मानबाहुल्या-
बाहुल्याभ्यां न किञ्चन ॥ ११६९ ॥

अबाधिताद्भवेत्कार्यं बाधिते तु न तद्भवेत्।
इत्येव वाच्यं भवता तद्बलात्सत्यता भवेत् ॥ ११७० ॥

उक्तश्रुतिबलात्सूत्रबलाद्युक्तिबलादपि।
अर्थक्रियायोग्यभावादप्यबाध्यमभूज्जगत् ॥ ११७१ ॥

बाधो विलम्बितोऽपि सर्वथाऽर्थक्रियावारक इत्यत्र दृष्टान्तमाह **तदानीमिति**। **मानबाहुल्यं** बाधकस्य कालपरिमाणविलम्बः ॥ ११६९ ॥ ११७० ॥ ११७१ ॥

अतस्तद्ब्रह्म नः कर्तृ तवापि ब्रह्मकर्तृताम्।
न सत्यता विघटयेन्निष्क्रियत्वश्रुतिः परम् ॥ ११७२ ॥

सा चेदर्थान्तरे लुब्धा ब्रह्म कर्तृ श्रुतेर्बलात्।
तस्मादर्थक्रियायोग्यं ब्रह्म स्याद्धि निदर्शनम् ॥ ११७३ ॥

'न च ब्रह्मण्यर्थक्रियाकारित्वं नास्तीति वाच्यम्। तस्य निखिलप्रपञ्च-कारणत्वेन श्रुतिशतसमधिगतत्वादि'ति वादावलीमनुरुध्याह **अत इति**। निरवकाशश्रुतिशतसिद्धं कर्तृत्वं सावकाशा एका च निष्क्रियत्वश्रुतिः न विघटयति किन्तु निष्क्रियत्वश्रुतेरेवार्थान्तरं कल्पनीयमित्याह **अर्थान्तरे** 'अक्लिष्टकारित्वा-दकर्तेत्यभिधीयते' इति वायुपुराणोक्तदिशा। **लुब्धा** स्वप्रामाण्यपरिरक्षणार्थम्। **हीति** अतो न ब्रह्मदृष्टान्तः साध्यविकलः ॥ ११७२ ॥ ११७३ ॥

अर्थक्रियायोग्यता च सत्त्वेनैवावसीयते।
हेतुता पूर्वभावित्वं तत्सत्ताऽपरनामकम् ॥ ११७४ ॥

भावित्वमेव सत्ता। 'भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः। प्रयोजकक्रियामाहुर्भावनामि'ति मीमांसकैः परिष्कृतेः ॥ ११७४ ॥

कुणपस्य प्रवृत्तिर्न सजीवस्तु प्रवर्तते।
अन्वयव्यतिरेकाभ्यां प्राप्ता चित्येव हेतुता ॥ ११७५ ॥

प्राप्ताप्राप्तविवेकेन चेतनस्यैव कर्तृता इति दृष्टान्तोक्त्या द्रढयति **कुणपस्येति** ॥ ११७५ ॥

करणादिसहायस्य हेतुत्वं यदि किं ततः।
सर्वं चावच्छेदकं ते जडत्वान्न प्रवृत्तिमत् ॥ ११७६ ॥

प्रवर्तकं च नान्यस्य तत एव घटादिवत्।
अतो जडप्रेरकोऽसौ स्वयमेव हि चेतनः ॥ ११७७ ॥

करणावच्छिन्नचेतनः एव कर्ता। अतः सत एव कर्तृत्वमित्याह **करणादीति** ॥ ॥ ११७६ ॥ ११७७ ॥

अज्ञानस्य प्रेरकत्वं नाज्ञानस्य सहायतः।
आत्माश्रयप्रसङ्गेन सन्मात्रं तत्प्रवर्तकम् ॥ ११७८ ॥

अज्ञानविशिष्टस्यैव कर्तृत्वं इति परस्याग्रहः। अतो जडत्वहेतुना तस्यापि निरस्तत्वेऽपि पृथक्तन्निरासः **अज्ञानस्येति** ॥ ११७८ ॥

प्रेरकत्वं हि चिन्मात्रे तज्जडस्यास्ति न क्वचित्।
अतः केवलचिन्मात्रे कर्तृताऽऽवश्यकी विदाम्।
अतश्चेतनमात्रस्य हेतुता सर्वसंमता ॥ ११७९ ॥

किञ्च तिष्ठतु तावदन्यव्यापारेषु। प्रेरणं प्रति कर्तृत्वं, न जडे किन्तु चेतन एवेति तावत्सर्वानुभवसिद्धम्। अतो व्यापारान्तरे सर्वत्र स एव कर्ता॥ कर्तृत्वं हि

ज्ञानेच्छापूर्वकम् । अतः कुत्राप्यचेतने कर्तृत्वासंभव एव । तदुक्तं भगवत्पादैः । 'न च कर्मविमामलकालगुणप्रभृतीशमचित्तनु तद्धि यतः' इति ॥ ११७९ ॥

विशिष्टस्यापि हेतुत्वे विशेष्ये हेतुता न किम् ।
न हि द्विनिष्ठधर्मोऽयमिति साधितमेव हि ॥ ११८० ॥

साधितं शुद्धिसौरभे ॥ ११८० ॥

अतो विशेष्यभागो यस्स एव स्यान्निदर्शनम् ।
स तु सत्यस्तव मते सर्वबाधेऽप्यबाधनात् ॥ ११८१ ॥

अतः अन्वयव्यतिरेकात् ॥ ११८१ ॥

अनामरूपं तद्ब्रह्म मायायाश्शास्तिकृत्पुरा ।
मायामनुससारेति श्रीमद्भागवते स्फुटम् ॥ ११८२ ॥

अनामरूपे निर्माये शुद्धे ब्रह्मणि केवलम् ।
मायाप्रवृत्तिहेतुत्वप्रोक्तेस्तन्मूलकारणम् ॥ ११८३ ॥

भागवतोक्त्याऽपि अप्राकृतस्य परमचेतनस्यैव स्वातन्त्र्येण चित्प्रकृतेरपि प्रेरकत्वं यदा तदा जडस्य तदभावः स्वतः सिद्ध इति साधयति । 'स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् । अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्तिकृत्' इति श्लोकं प्रकृतोपयोगितया व्याख्याति **अनामेति** । नामरूपात्मकप्रकृतिसंबन्धरहितत्वोक्त्या सिद्धोऽर्थः शुद्धे ब्रह्मणीति । मूलकारणं इत्युक्त्या चित्प्रकृतेरपि पराधीनैव प्रवृत्तिरित्युक्तम् । तदुक्तं भगवत्पादैः 'चिदचित्तनु सर्वमसौ तु हरिर्यमयेदि'ति । 'नित्यातादृशचिच्चेत्ययन्ते'ति च । वीर्यस्य निजत्वोक्त्या परोक्तं अज्ञानसहायकत्वमपि निरस्तम् ॥ ११८२ ॥ ॥ ११८३ ॥

दृष्टान्तीकृत्य तद्ब्रह्म विश्वस्यपरमार्थता।
अर्थक्रियाहेतुताख्यहेतुना स्यादिति स्थितम् ॥ ११८४ ॥

तथा च पारमार्थिकस्य आत्मन एवार्थक्रियाकारित्वात् तद् दृष्टान्तेन अर्थक्रियां प्रति पारमार्थिकसत्यत्वमेव हेतुरिति सिद्धम्। तदुक्तं वादावल्यां 'विशिष्टस्याप्यात्मनोऽर्थक्रियाऽभ्युपगमादात्मांशस्य सा कथं न स्यादि'ति ॥ ॥११८४ ॥

निमित्तमात्रं तत्रात्मा निर्गुणः पुरुषः परः।
व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ ११८५ ॥

इति भागवते साक्षन्निर्गुणस्य निमित्तता।
यत्प्रोक्ता तत्सदेवार्थक्रियाकारि न संशयः ॥ ११८६ ॥

अत्रैव निरवकाशं श्लोकान्तरमाह **निमित्तेति**। अत्र निर्गुणमिति कण्ठोक्त्या शुद्धब्रह्मैवार्थक्रियाकारीति सिध्यति ॥ ११८५ ॥ ११८६ ॥

अर्थक्रियानिमित्तत्वाज्जगतः परमार्थता।
निर्गुणब्रह्मदृष्टान्तात्सिद्ध्यतीत्यतिमङ्गलम् ॥ ११८७ ॥

एवं तद्दृष्टान्तेन जगतोऽपि पारमार्थिकत्वमित्याह **अर्थक्रियेति** ॥ ११८७ ॥

किञ्चेन्द्रियेण संबन्धाद्घटाद्यं परमार्थसत्।
चित्संवलितचित्तेन सन्निकृष्टपरात्मवत् ॥ ११८८ ॥

घटादिकं सत्यं इन्द्रियसंयुक्तत्वात्। परमात्मवत् इति प्रयोगान्तरमाह **किञ्चेति**। संयोगस्य संबन्धिसत्त्वनियतत्वेन नाप्रयोजकता। विषयविषयिभाव-संबन्धे तथाभावनियमाभावात् संयोगपर्यन्तधावनम् ॥ ११८८ ॥

किञ्च योगोऽस्ति मनसा यदा स्याच्चरमप्रमा ।
आवयोरुभयोस्तेन दृष्टान्तस्संमतो ह्ययम् ॥ ११८९ ॥

दृष्टान्ते साधनसंप्रतिपत्तिं साधयति । **योगः** संयोगः । चरमसाक्षात्कारे मनोरूपेन्द्रियेण अर्थस्य चैतन्यस्य संयोगावश्यंभावात् । 'मनसैवानुद्रष्टव्यं' इति श्रुतेः ॥ ११८९ ॥

अथवा स्तम्भकुम्भादिद्रव्यं नः परमार्थसत् ।
संयुक्तत्वात्तवाज्ञानधारागोचरवस्तुवत् ॥ ११९० ॥

इन्द्रियविशेषणप्रहाणेन संयुक्तत्वमात्रेणापि सत्यत्वसाधनं सुकरमित्याह **अथवेति** । अनुमानद्वयेऽपि शुक्तिरूप्ये व्यतिरेकग्रहसंभवेन नाप्रयोजकतता ॥ ॥ ११९० ॥

यथा शशोऽतिदूरस्थो नान्यत्र क्वापि दृश्यते ।
अच्छेन्दुनाऽपि च्छुरितो दृश्यतेऽद्यापि लौकिकैः ॥ ११९१ ॥

यदुक्तं परेण मिथ्यात्वानुमाने अप्रयोजकताशङ्कापरिहाराय शुद्धस्य घटावच्छेदेन दृश्यत्वेऽपि स्वरूपेण दृश्यत्वाभावात्तत्र न व्यभिचारग्रहः संभवतीति तद्दूषयति **यथेत्यादिभिः** । राहोः चन्द्रमण्डलावच्छेदेन यथा दृश्यत्वमिति परोक्तो दृष्टान्तः विषमः । राहोः नीलरूपवतः शुक्लभास्वरचन्द्रावच्छेदेन दृश्यत्वं घटते । नीरूपे तु ब्रह्मणि अवच्छेदशतेनापि तदसंभव एवेति निर्धारयितुं प्रत्यक्षतायां महत्त्वसमानाधिकरणं उद्भूतरूपवत्त्वं तन्त्रं इति नियमं स्थापयति **यथेति** । **शशः** शशारूपाङ्कः । **छुरितो** मिश्रः ॥ ११९१ ॥

तथा राहोरपि च्छाया नीला नीलाभ्रसङ्कुला ।
अन्यत्रादृश्यमानापि दृश्यतां चन्द्रमण्डले ॥ ११९२ ॥

नीलाभ्रसङ्कुला । राहोर्नीलरूपापेक्षया नीलतरव्योमव्यामिश्रा । **चन्द्रमण्डले** शुक्लभास्वरे । **दृश्यतां** स्वतो राहो रूपवत्त्वात् ॥ ११९२ ॥

नीरूपं ब्रह्म दुर्द्रव्यसाचिव्येऽपि नृचक्षुषा ।
कथं निरीक्ष्यते शुद्धं यद्धि प्राहुरधोक्षजम् ॥ ११९३ ॥

वैषम्यं नीरूपत्वं, अत एव चक्षुषः अयोग्यत्वं, अवच्छेदकस्य घटस्य स्वान्तर्गतरूपवद्दर्शनप्रतिबन्धकत्वं ब्रह्मणोऽव्यक्तत्वस्वभावत्वेन बाह्येन्द्रियागोचरत्वं इत्यादिकम् ॥ ११९३ ॥

रूपाभिभवमात्रेण तप्तवारिस्थतेजसः ।
यदा नेक्षा रूपशून्यद्रव्येक्षा ते कथं तदा ॥ ११९४ ॥

रूपस्याभिभवमात्रेण यदा न दृश्यता तदा किमु वक्तव्यं सर्वथा प्राकृतरूपरहितस्य अधःकृतेन्द्रियादिजन्यव्यापारस्याधोक्षजस्येति कैमुत्यमाह **रूपेति** । अत एव गीतायां श्रीकृष्णवचनं 'न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषे'ति ॥ ॥११९४ ॥

अतो वृत्तेर्भ्रमत्वे स्यान्निरधिष्ठानको भ्रमः ।
परोक्षवृत्तौ साधिष्ठानत्वं तु भवतोऽपि न ।
तस्मात्प्रमात्वं सर्वत्र वृत्तेर्युक्तिबलादभूत् ॥ ११९५ ॥

प्रकृते सङ्गमयति **अत इति** । अयं घटः इत्यत्रापरोक्षवृत्त्यविषयत्वात् ब्रह्म नाधिष्ठानम् । तथोक्तं वादावल्यां 'प्रपञ्चो न भ्रान्तिकल्पितः निरधिष्ठानत्वात् ब्रह्मवत् । न च ब्रह्मणोऽधिष्ठानत्वं अविषयत्वात्' इत्यादिना । **सर्वत्र** परोक्षायां अपरोक्षायां च वृत्तौ । **युक्तिबलात्** निरधिष्ठानकत्वादियुक्तिबलात् ॥ ११९५ ॥

तस्यामुल्लिखिता सत्ता तत्तदर्थगतैव तत् ।
तत्रोल्लिखितवस्तूनि चार्थात्प्रापुर्यथार्थताम् ॥ ११९६ ॥

तस्यां घटः सन्नित्याद्यपरोक्षवृत्तौ । **तत्तदर्थगतैव** । ब्रह्मणः सत्ता इत्यस्य दूषितत्वात् । उक्तं च भामत्यां 'प्रमाणैः सदित्युल्लिख्यमानं सदित्येव वस्तु व्यवस्थाप्यते' इति ॥ ११९६ ॥

साक्षाद्वृत्तावन्यसत्ता यत्रोल्लेख्या भवेत्तव ।
परोक्षवृत्त्या सा क्वत्योल्लिख्यते तेषु वस्तुषु ॥ ११९७ ॥

क्वत्या कुत्र विद्यमाना । तत्र ब्रह्मणोऽनुल्लेखस्य त्वयैवाङ्गीकारादिति भावः ॥ ११९७ ॥

तत्प्रमारूपया वृत्त्योल्लिख्यमानाऽखिलेषु च ।
सत्तेयं ब्रह्म सत्तायास्समैवेति मतिर्मम ॥ ११९८ ॥

समा त्रिकालाबाध्या तद्भिन्ना । न तु सैव । तदुक्तं 'यादृशं ब्रह्मणः सत्त्वं तादृशं स्याज्जगत्यपि' इति ॥ ११९८ ॥

अर्थोऽयं ब्रह्मवद्वस्तुतत्त्वं यस्तत्र भासते ।
वृत्तौ प्रतीतस्य तस्य प्राक्सतो न दृशिभ्रमः ॥ ११९९ ॥

वृत्तौ प्रतीतस्य प्रमाणदृष्टस्य । **प्राक्** वृत्तेः पूर्वं । **सतः इति** अन्यथा अर्थेन सन्निकर्षस्यैवायोगस्योक्तत्वादिति भावः । **दृशि** ब्रह्मणि **न भ्रमः** नारोपः । अतः अनारोपितत्वात् प्रमितिविषयत्वात् ब्रह्मवत्सर्वोऽपि भावाभावात्मकः तत्त्वमेवेति निष्टङ्कितम् ॥ ११९९ ॥

वृत्त्याऽज्ञानक्षये पश्चाद्दृक्चक्षुस्ते किलोन्मिषेत् ।
विभ्रमं तद्द्विधा धत्ते सत्ताद्या मत्तकाशिनी ॥ १२०० ॥

ते दृक् त्वदभिमतं घटाधिष्ठानचैतन्यम् । चक्षुः उन्मिषेत् । आवरणस्य निवृत्तत्वात् अर्थप्रकाशिनी स्यात् । **द्विधा** आसंसारमज्ञानावृतस्य रूपरहितस्य च वृत्तौ उल्लेखासंभवात् । भ्रान्तेः पूर्वं विद्यमानस्य भ्रान्तिकल्पितत्वासंभवेन च इति हेतुद्वयेन । **विभ्रमं** भ्रमाभावं प्रमामिति यावत् । **धत्ते** विषयतासंबन्धेन दधाति । प्रमाविषयो भवतीति यावत् । जगती इति शेषः । तत्र हेतुः **सत्ताद्येति** । प्रमाणप्रवृत्तिप्रयोजकसत्तावती । तदुक्तं वादावल्यां 'ब्रह्मण इव प्रपञ्चस्यास्माभिः प्रामाणिकत्वातिरिक्तसत्यत्वाभ्युपगमादि'ति । अन्यथा शशविषाणवत्तस्मिन्प्रमाण-

प्रवृत्त्ययोगादिति । सत्ता आद्या प्रमाणप्रवृत्तेः प्रागेव विद्यमाना यस्याः सा इति विग्रहः । श्लेषगर्भरूपकालङ्कारेण साहित्यमुद्रया रञ्जयति **मत्तकाशिनीति** उत्तमवधूः । **विभ्रमं** विलासम् ॥ १२०० ॥

योगायोगाद्भ्रमायोगं मा विस्मार्षीः पुरोदितम् ।
प्रमिनन्तीति वेदेऽस्यां प्राह प्रमितिमेव तत् ॥ १२०१ ॥

भ्रमायोगं अपरोक्षवृत्तिः भ्रम इत्यस्यायोगम् । तत्र हेतुः **योगायोगादिति** असत्त्वे सन्निकर्षासंभवादित्यर्थः । अत एव 'आपश्चन प्रमिनन्ति व्रतं वामि'ति वेदे **अस्यां** एतद्वृत्तिविषये **प्रमितिमेव प्राह** इति योजना ॥ १२०१ ॥

मायासृष्टौ च मायाविभ्रान्त्यारोपो न यौक्तिकः ।
अन्येषामर्थयोगोत्थवृत्तेश्चाभ्रमतोदिता ॥ १२०२ ॥

मायासृष्टिरिति पक्षस्य दूषणद्वयकथनपरतयाऽपि द्विधेत्युक्तं (श्लो. १२००) योजयति **मायेति** । तत्र मायाविनः भ्रान्तिर्नास्त्येव । अत्र तु मायाविन ईश्वरस्यैव भ्रम इति तव प्रक्रिया । न च मायाविना माया दृश्यते इति ब्रह्माण्डे । **अन्येषां** द्रष्टृणाम् । मायासृष्टौ पूर्वमेव विद्यमानपदार्थसन्निकर्षेण वृत्तिर्न जायते । अत्र जगति तु सन्निकर्षेणैव इत्येवं प्रकारद्वयेनापि न मायामयी जगत्सृष्टिरित्याशयः ॥ १२०२ ॥

निरीक्षतोऽपि यस्येक्षा माययाऽण्वपि नाज्यते ।
स्तौतीत्थं पञ्चमस्कन्धे पञ्चवक्त्र इतीरितम् ॥ १२०३ ॥

अज्यते लिप्यते । पञ्चवक्त्रः रुद्रः ॥ १२०३ ॥

न यत्रेत्यादि वाक्चोक्ता तत्प्रमाऽमायदृक्प्रभोः ।
आपश्च प्रमिनन्तीति प्रजानां च प्रमोच्यते ॥ १२०४ ॥

अतः प्रभोः प्रजानां च प्रमादोऽयं न शोभते ।
एवं चारोपितत्वेन मिथ्याभूतजगन्न मे ॥ १२०५ ॥

'न यत्र माया किमुतापरे हरेरनुव्रता यत्र' इति वाक् ईश्वरस्य दृष्टिः मायया ऽण्वपि नाज्यते इति वाक् च ईश्वरज्ञानस्य अमायत्वं प्रमात्वं च प्रतिपादयतः । आपः अवभिमानिदेवता अपि ईश्वरस्य जगत्सर्जनादिव्रतं प्रमाणतया जानन्ति इति प्रजानां अपि दृष्टिः प्रमेति आचष्टे ॥ **अतः** ईश्वरस्य प्रजानां च प्रमात्वस्य प्रमितत्वेन ततश्चोभयप्रमाविषयत्वेन, आरोपितत्वेन जगत् मिथ्याभूतमिति नैवेति सिद्धम् ॥ ॥१२०४ ॥ १२०५ ॥

निरधिष्ठानधीत्वं च परोक्षप्रमयोपमा ।
पूर्वप्रमितदृक्त्वं च योगायोगश्च बाधकः ॥ १२०६ ॥

मायाविभ्रान्त्ययोगश्च योगायोगोऽपरस्य च ।
रौद्री वाग्वारुणी वाक्च पार्थस्य वचनं तथा ।
श्रुतिश्चेति जगद्बाधारोपबाधा दशाभवन् ॥ १२०७ ॥

श्रीमदाचार्याणां दशप्रमतिरिति मन्त्रवर्णसिद्धं नाम अत्यनुरूपरूपकं इति प्रदर्शयन्नेव स्वकृतसेवां तत्पादयोः समर्पयितुं जगन्मिथ्यात्वनिराकरणे स्वोक्तबाधान् दशधा संगृह्णाति निरधिष्ठानेत्यादि पञ्चभिः श्लोकैः । अयं घट इत्यपरोक्षवृत्तौ रूपादिहीनस्य अव्यक्तस्वभावस्य ब्रह्मण उल्लेखासंभवेन, परोक्षवृत्तौ चिदनुल्लेखस्य परेणैवाङ्गीकृतत्वेन धीमात्रस्य अधिष्ठानाविषयकत्वेन **भ्रमत्वानुपपत्तिः प्रथमं बाधकम्** । परोक्षज्ञानेऽधिष्ठानानुल्लेखः परेणैवाभ्युपगतः । अन्यथा तस्यापि अपरोक्षैकरसचैतन्यसंवलनात्मकत्वे तत्रापि आपरोक्ष्यस्य अज्ञाननिवर्तकत्वस्याङ्गीकारापातादिति परप्रक्रिया । तथा च निरधिष्ठानक-विषयकत्वेन तस्य परोक्षज्ञानस्य प्रमात्वं तावत्सिद्धम् । तद्विषयाणां घटादिसकल-वस्तूनां सत्यत्वं च । यान्येव परोक्षप्रमायां विषया तान्येवेन्द्रियसन्निकर्षबला-दपरोक्षज्ञानेऽपि विषयाः । तथा चापरोक्षज्ञानस्यापि प्रमात्वं बलादापन्नम् । समानविषयकत्वेऽपि एकस्य ज्ञानस्य प्रमात्वं इतरस्य तु भ्रमत्वं इति नैव संभवति । वस्तुनो द्वैरूप्यापातात् । तददिमुक्तं **परोक्षप्रमयोपमेति** । अत्रोपमाशब्देन

परोक्षप्रमाया न्यूनोपमात्वमेवाभिप्रैति। अपरोक्षप्रमाया रेखोपरेखाग्राहित्वेन तदनिवर्त्यदिङ्मोहादिनिवर्तकत्वेन इतरप्रमाणाबाध्यायाः सर्वप्रमाणोपजीव्यापरोक्षप्रमायाः परोक्षप्रमाऽपेक्षया बलीयस्त्वात्। अयं द्वितीयबाधः। **पूर्वप्रमितदृक्त्वम्।** दृशश्चैतन्यस्य अयं घटः इत्युल्लेखात्पूर्वं आवरणनिवृत्तेरावश्यकत्वेन वृत्त्युपरागं विनाऽऽवरणनिवृत्त्ययोगात् अपरोक्षवृत्तेः सन्निकर्षं विनाऽसंभवात् सन्निकर्षस्य च संयोगस्य च संबन्धिद्वयसत्त्वनियतत्वात् भ्रमात्पूर्वं विद्यमानपदार्थानां सर्वथा बाधायोगः। अयं तृतीयो बाधबाधः। **योगायोगः।** सन्निकर्षानुपपत्तिः। तदुक्तं भगवत्पादैः 'योगः शशनृशृङ्गयोरि'ति। अयं चतुर्थो बाधबाधः **मायाविभ्रान्त्ययोगः।** अयं च 'न च मायाविना माया दृश्यते विश्वमीश्वरः। सदा पश्यति तेनेदं न मायेत्यवधार्यतामि'ति भगवत्पादवचनेन समर्थितः। अयं **पञ्चमः।** **अपरस्य योगायोगः** ऐन्द्रजालिकानामसत्त्वात्तत्र द्रष्टुरपरस्य इन्द्रियसन्निकर्षाभावः। जगद्द्रष्टुस्तु तैस्तैर्वस्तुभिः सन्निकर्षोऽस्ति तस्य योगस्यायोगः। एवं आरोपितत्वे जगति पराभ्युपगतार्थक्रियाकारित्वस्य हेतोः पक्षसंबन्धायोगः। अयं षष्ठः। **रौद्री वाक्।** [भागवते पञ्चमस्कन्धे १७ अध्याये १९ श्लोके] 'न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते' इति रुद्रकृतं सङ्कर्षणनामकतुरीयभगवन्मूर्तेरुपस्थानम्। तस्यायोगः 'अशक्ताः सत्यसृष्टौ हि मायासृष्टिं वितन्वते' इति भागवततात्पर्योक्तः अयं बाधः **सप्तमः॥ वारुणी वाक्** वरुणस्य कृष्णं प्रति वाक्। 'नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने। न यत्र श्रूयते माया लोकदृष्टिविकल्पना' इति। अत्र कृष्णस्य दृष्टेर्लोकवदमायिकत्वोक्त्या तद्विषयप्रपञ्चस्य बाधासंभवः। 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति श्रुतेः। अयं अष्टमः। **पार्थस्य वचनम्।** 'मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि' इति कृष्णं प्रति वचनम्। अत्र चितोऽज्ञानस्फोरकत्वनिरासेन अज्ञाननिरासकत्वोक्त्या चित आरोपाधिष्ठानत्वासंभवेन प्रपञ्चबाधस्य बाधः। अयं नवमः। **श्रुतिः** विश्वं सत्यमित्यादिश्रुतौ सत्यशब्देन अबाधितत्वं प्रमिनन्तीति प्रमाणदृष्टत्वं चोच्येते। अत्र सत्यशब्दस्य विद्यारण्येनापि अनारोपितमित्येवार्थ उक्तः। अयं दशमः। एवं च बाधस्य बाधाः दशाभवन्॥ १२०६ ॥ १२०७ ॥

सत्त्वस्याप्रतिषेधेन त्रिकालेष्वनिषेधनात्।
अखण्डार्थत्वतो वाचां
निर्विकल्पत्वतो धियाम्॥ १२०८॥

स्वस्वस्थानानिषेधाच्च शब्देऽक्षानुसृतीक्षणात्।
एकज्ञानेन सर्वस्य ज्ञानात्सत्त्वश्रुतेर्बलात् ॥ १२०९॥

प्रकारान्तरेण दशधा बाधं समर्थयते **सत्त्वस्येति**। सत्त्वस्याप्रतिषेधेन विश्वं न सत्यं इत्येवं कुत्रापि श्रुतेरभावेन। **अयं प्रथमः**। नासदासीन्नोसदासीदित्यादि-वाक्येषु पूर्वकल्पीयमूर्तामूर्तप्रपञ्चस्य ध्वंसस्य, स्रक्ष्यमाणस्य प्रागभावस्यैवोक्तत्वेन कुत्रापि पराभिमतत्रैकालिकनिषेधस्याश्रवणादिति। परेणापि 'एकमेवाद्वितीयं' इति श्रुतेः स्वकार्यपतितमन्यन्नास्ति इत्येव व्याख्यातमप्यत्रानुसन्धेयम्। **अयं द्वितीयः**। **वाचां अखण्डार्थत्वात्**। महावाक्यानां संसर्गासङ्गिसम्यग्धीजनकताङ्गीकारात्। संसर्गघटितलक्षणानां आकांक्षासन्निधियोग्यतानामसंभवात् वाक्यलक्षणस्यैवा-भावेन मिथ्यात्वपरत्वस्य गर्भस्रावेणैव गतत्वात्। **अयं तृतीयः**। **निर्विकल्पत्वतो धियाम्**। इदमित्थमिति सर्वधियां सप्रकारकत्वव्याप्यत्वेन व्यापकाभावेन ज्ञानत्वस्यैवासंभवेन बाधकज्ञानत्वस्याशक्यशङ्कत्वात्। विस्तृतमेतत्प्रकारद्वयं न्यायामृते अखण्डार्थभङ्गप्रकरणे। **अयं चतुर्थः**। अङ्गीकृतश्च महावाक्यानां ज्ञानजनकत्वाभावः परेणैव तथाहि 'तत्ज्ञानं नैव जायते। ——। केवलमज्ञाननिवृत्तिरेव भवति' इत्यादिना। युक्तिश्च तत्र परैरेवोक्ता। महावाक्याज्जायमानं ज्ञानं ब्रह्मस्वरूपं तद्भिन्नं वा। नाद्यः। ब्रह्मणोऽप्युत्पत्ति-प्रसङ्गात्। द्वितीये सत्यं चेदद्वैतभङ्गः। मिथ्या चेन्महावाक्यानामतत्त्वावेदकत्वम्। भागत्यागलक्षणया चिच्चितोरभेदो बोध्यते इत्यपि अवद्यम्। व्युत्पत्तिविरोधात्। तद्धर्मावच्छिन्नाभेदसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यताऽवच्छेदकसंबन्धेन शाब्दबुद्धित्वाच्छिन्नं प्रति तद्धर्मभेदस्य नीलो घट इत्यादौ क्लृप्तत्वेन अत एव घटो घट इति वाक्येन अभेदबोधाजननात् चित् चित् इत्यत्रापि विशेष्यतावच्छेदक-चित्त्वस्यैव प्रकारताऽवच्छेदकत्वेन अभेदबोधाजननात्। विस्तरः भेदपराण्येव खलु ब्रह्मसूत्राणि इति ग्रन्थे (पु. २/५८)। **अयं चतुर्थो बाधः**।

स्वस्वस्थानेष्वनिषेधादिति। 'नेह नानास्ति' इति वाक्यं तुष्यत्विति न्यायेन ब्रह्मणि जगतः सत्त्वं निषेधतु। न तावता मिथ्यात्वसिद्धिः। व्यधिकरणत्वात्। घटे घटत्वं, तन्तुषु पटः, भूतले घटः इत्यादिना प्रत्यक्षेण सिद्धस्य स्वस्वस्थानेषु वृत्तित्वस्यानिषेधादेव। **अयं च पञ्चमो बाधः। शब्देऽक्षानुसृतीक्षणादिति।** उक्तं हि भगवत्पादैः। न हि प्रत्यक्षसिद्धमन्येन केनापि बाध्यं दृष्टमिति। अङ्गीकृतश्चायं नियमो बहुत्र परेणापि तत्त्वमसि वाक्यादिषु प्रत्यक्षविरोधभिया लक्षणामाश्रयता। **अयं षष्ठो बाधः। एकज्ञानेन सर्वस्य ज्ञानादिति।** इदं च जगतो मिथ्यात्वे न जाघटीति। उक्तं हि भगवत्पादैः। 'न हि सत्यज्ञानेन मिथ्याज्ञानं भवति।' 'न हि शुक्तिज्ञो रजतज्ञो भवति' इत्यादिना। परेणापि अत्र ब्रह्मज्ञानस्य फलत्वं जगज्ज्ञानस्य फलित्वमेव व्याख्यातम्। अतो ब्रह्मणः प्राधान्यं जगतोऽप्राधान्यमेव तात्पर्यार्थः। न तु मिथ्यात्वम्। **अयं सप्तमो बाधः। सत्यत्वश्रुतेर्बलादिति।** 'याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः' इति विशिष्य त्रैकालिकनिषेधाप्रतियोगित्वरूप-सत्यत्वस्य निरवकाशतया प्रतिपादनात्। श्रुत्यैव पुनस्तन्निषेधे व्याहतेः। **अयमष्टमो बाधः** ॥ १२०८ ॥ १२०९ ॥

आरोपासंभवाद्ब्रह्मासत्त्ववाक्साम्यतोऽपि च।
बाधायोगेन सकलं विश्वमासीदनाकुलम् ॥ १२१० ॥

आरोपासंभवादिति। निर्धर्मकत्वेन निरंशत्वेन अविषयत्वेन च ब्रह्मणः अधिष्ठानत्वासंभवात्। अङ्गीकृतं च भ्रमस्य, दुर्घटत्वं परैरेव। 'तत्त्वप्रच्युतिविभ्रमक्षतिकरी तत्रान्त्यदृष्टिर्मता।' 'न परमार्थतो भ्रमो नाम कश्चित्। न च संसारो नाम। किन्तु सर्वमेतत् सर्वानुपपत्तिभाजनत्वेन अनिर्वचनीयमिति युक्तमुत्पश्यामः 'इत्यादिना। **अयं च नवमः। ब्रह्मासत्त्ववाक् साम्यतोऽपि च।** नेहनानास्तीत्यादावापातार्थं परिगृह्य प्रमितविश्वसत्यत्वापलापे, असदेवेदमग्र आसीदित्यादि वाक्येन प्रमितब्रह्मसत्यत्वस्याप्यपलापप्रसङ्गादित्यर्थः॥ ननु विश्वसत्यत्वस्य प्रमाणान्तरप्राप्तत्वेन तदनुवादेन श्रुत्या निषेधोपपत्तिः। ब्रह्मसत्यत्वस्य प्रमाणान्तराप्राप्तत्वात्कथमनुवाद इति चेन्न भ्रमानुपपत्त्या अधिष्ठानत्वेन कल्पितस्य अनूद्य निषेधोपपत्तेः। अधिष्ठानत्वेन प्रमितस्य कथं

अनुवादः इति चेत् सर्वप्रमाणप्रमितस्य विश्वसत्यत्वस्य कथमनुवाद इति समम्। लोकसिद्धविश्वसत्यत्वानुवाद इति चेन्न । लोके च प्रमाणसिद्धं अनूद्यते भ्रान्त्या वा । नाद्यः । तत्प्रमाणविरोधात् । न द्वितीयः । तथैव लोके भ्रान्तिसिद्धस्य ब्रह्मसत्यत्वस्य 'सत्यं ज्ञानमनन्तं' इति श्रुत्याऽनूद्य 'असदेवेदमग्र आसीदि'ति श्रुतिर्निषेधति इत्यतिप्रसङ्गः । यद्वा निरधिष्ठानक एव प्रपञ्चभ्रमोऽस्तु । किं स्विदासीदधिष्ठानमिति श्रुत्या अधिष्ठाननिषेधात् । यद्वा प्रपञ्च एव ब्रह्मारोपाधिष्ठानमिति वैपरीत्यं कुतो न स्यात् । तस्मात्त्यजेदेकं कुलस्यार्थ इति न्यायेन सकलप्रमाणविरोधपरिहाराय नेह नानास्तीति श्रुतेरेव अविरुद्धार्थकल्पनं आवश्यकमिति । अयं च **दशमो बाधबाधः । अनाकुलं** बाधाभावेन ब्रह्मवत्पारमार्थिकम् । 'मिथ्यात्वस्य च मिथ्यात्वे सत्यत्वं स्थापितं भवेदि'ति वचनात् ॥ १२१० ॥

दशधा बाधबाधानां प्रमितिर्यस्य चेतसि ।
दशप्रमतिनामासौ गुरुर्विजयतेतराम् ॥ १२११ ॥

दशधेति । बाधानामनन्तत्वेऽपि अत्र दिङ्मात्रप्रदर्शनाय दशानां एव चर्चा इति दशधा इत्यत्र प्रत्ययेन ज्ञाप्यते । **दशप्रमतिनामेति** 'दशप्रमतिं जनयन्त योषणः' इति मन्त्रवर्णप्रसिद्धनामधेयः । **विजयतेतरामिति ।** अतिशयार्थकतरामित्यनेन आदिगुरुत्वं, सर्वजीवावधिकोत्कर्षः पापपाटनपण्डितत्वं च कथ्यन्ते ॥ १२११ ॥

स्वपृष्ठचालने पक्षी त्रिलोकीं मनुतेचलाम् ।
किञ्चिन्मिथ्येत्यर्थवच्च सर्वं मिथ्या [illegible]त्किल ॥ १२१२ ॥

दुर्नीतिविषयतादर्शनेनापहसति मिथ्यात्ववादिनम् । **स्वपृष्ठेति ।** स्वकीय-मिथ्यात्वसाधकानुमानस्य पृष्ठस्थानीयदृष्टान्तस्य शुक्तिरूप्यस्य अर्थक्रिया-ऽनर्हतया सत्यत्वाच्चालने मिथ्यात्वे इति यावत् अर्थवत् अर्थक्रियावदपि सर्वं जगत् मिथ्येति मनुते । पक्षी जगतः निश्चलत्वमात्रं अपलपति अयं तु जगदेवापलपति इति ततोऽपि निकृष्ट इति भावः ॥ १२१२ ॥

एकयोगे परत्यागस्तुन्दिलाधरचुम्बने ।
मिथ्येत्यसत्त्वं न स्वस्या-
निर्वाच्यत्वं न कस्यचित् ॥ १२१३ ॥

असत्त्वमिति तदुक्तं भगवत्पादैः न चानिर्वचनीये किञ्चिन्मानम् । मिथ्याशब्दोऽनिर्वचनीयं वदतीत्यत्र च' इति । तथा च व्याघातपरिहाराय निषेधसमुच्चयस्य तात्त्विकत्वानङ्गीकारे निषेधसमुच्चयस्यैव अनिर्वचनीयत्वापातः ॥ १२१३ ॥

नीचो वाचा बहु वदेद्ददात्यत्यल्पमेव हि ।
घुष्टोऽनिर्वाच्यशब्दार्थो द्विधर्मावाच्यता किल ॥ १२१४ ॥

बहु वदेत् अखिलप्रपञ्चस्य मिथ्यात्वं वदेत् । **अल्पमेव ददाति** सत्त्वासत्त्वरूपधर्मद्वयमेव निषेधति । तच्च न जगन्मिथ्यात्वसाधकम् । तदुक्तं भगवत्पादैः । 'वैलक्षण्यं सतश्चापि स्वयं सद्भेदवादिनः । असतश्चापि विश्वस्य तेनानिष्टं कथं भवेदि'ति । धर्मद्वयनिषेधोऽपि स्ववचनविरुद्धः उक्तं च भामत्यां 'लौकिकानि हि प्रमाणानि सदसत्त्वगोचराणि' इति । प्रमाणानि खलु स्वगोचरे प्रवर्तमानानि तत्त्वमित्येव प्रवर्तन्ते इति च ॥ १२१४ ॥

स्वाङ्गं स्वयं हि च्छिन्दन्ति पिशाचग्रस्तचेतनाः ।
सत्त्वाभावे ह्यसत्त्वं स्यात्तच्च प्रच्यवते किल ॥ १२१५ ॥

तच्च असत्वं सत्त्वाभावेन व्याप्तिबलात्प्राप्तं असत्त्वम् । **प्रच्यवते** पुनः असत्त्वं न इति कथनेन स्वाङ्गीकृतमेव निषिध्यते । तदुक्तं वादावल्यां 'सत्त्वविरहे असत्त्वं असत्त्वविरहे सत्त्वमिति अस्य नियतत्वेनोभयविरहितत्वं व्याहतमेवे'ति ॥ ॥१२१५ ॥

दोषः किं किं न कुरुते यो जातिं हरति क्षणात् ।
अविद्यमानमेवाक्ष्णा काचे सति यदीक्ष्यते ॥ १२१६ ॥

ब्राह्मणे पूर्वं असदपि शूद्रत्वं ब्रह्महत्यादिदोषवशात् शास्त्रदृष्ट्या यथा प्रतिभासते एवं असदेव शुक्तिकायां असदेव रजतत्वं दूरस्थत्वसादृश्यादि-दोषवशादपरोक्षतया भासते न तावता रजतत्वस्य असद्विलक्षणत्वं सिध्यतीत्याह **दोष इति**। तदुक्तं पद्धतौ 'असदेव रजतं प्रत्यभादित्युत्तरकालीनपरामर्शात् शुक्तिकैव दोषवशादत्यन्तासद्रजतात्मना प्रतिभातीत्याचार्याः' इति ॥ १२१६ ॥

अदृष्टः श्वैव किं दृष्टौ श्वाश्वयोः स्याद्विलक्षणः।
असन्नृशृङ्गं दृष्टं चेद्भिन्नं सदसतोः किल ॥ १२१७ ॥

वास्तवं असदेव शशशृङ्गं भ्रमात्मकदर्शनमात्रेण असद्विलक्षणं भवतीति परप्रक्रियां अपहसति **अदृष्ट इति**। दर्शनात्पूर्वं श्वैव। दर्शनमात्रेण श्वाऽश्वविलक्षणो भवतीत्यस्य यथा अपहसनीयता तथेति भावः। दर्शनमात्रेण पदार्थस्य अन्यथाभाववचनमलौकिकमिति भावः ॥ १२१७ ॥

किं स्पृष्टोच्छिष्टयोरेकः शुद्धो शुद्धोऽपरो भवेत्।
सदन्याभावकालीनं सच्चेद्ब्रह्म तमोऽपि सत् ॥ १२१८ ॥

सदसन्निषेधकालीनावस्थितिसाम्येऽपि तमसः अज्ञानस्यानिर्वचनीयत्वं ब्रह्मणस्तु सत्यत्वमिति परस्य प्रजल्पः। तच्चायुक्तं निषिद्धत्वसाम्येन उच्छिष्टस्य उभयोरपि दुष्टत्वमेव यथा तथेति भावः। तदुक्तं भगवत्पादैः 'पारिशेष्येणानिर्वचनीयत्वाङ्गीकारे तदानीं परिशिष्टत्वाद्ब्रह्मणोऽप्यनिर्वचनीयत्वं स्यादि'ति ॥ १२१८ ॥

सदनेऽनदने प्राप्ते कदन्नेऽपि रुचिर्भवेत्।
ज्ञानात्मकेन भोगेनैवारब्धस्य क्षयोऽन्ततः ॥ १२१९ ॥

प्रसादेनैव बन्धनाशः इत्येतत् श्रुतिसिद्धं सदन्नम्। तत्र परस्यारुचिः मिथ्यात्वप्रतिकूलत्वात्। भोगेनारब्धक्षय इत्येतदनादृत्य चरमसाक्षात्कारेण बन्धस्य च स्वस्यापि च बाध इति कदन्नम्। तदेव रोचयते। तथा हि तदुक्तिः। 'वेणुसंघर्षजो वह्निः दग्ध्वा शाम्यति तद्वनम्। एवं गुणव्यत्ययजो वेदः शाम्यति' इति ॥ १२१९ ॥

विप्रोऽहं नैव विप्रोऽहमित्युक्तिं कोऽपि लालयेत्।
स्वस्वाभावौ सदैकत्र
स्वस्थौ स्तः किल मायिनाम्॥ १२२० ॥

कोऽपि उन्मत्तः। एकस्यैव ब्राह्मणत्वधर्मस्य तदभावस्य च स्वस्मिन् सामानाधिकरण्यं ब्रुवाण एव चेदुन्मत्तः तदा किं वक्तव्यं प्रपञ्चमात्रस्य स्वात्यन्ताभावसामानाधिकरण्यं सिद्धान्तयन् मायावादी इति भावः॥ १२२० ॥

सर्वसंप्रतिपन्नस्य कोऽभावं भावयेद्बलात्।
शुक्तिरूप्यस्य मिथ्यात्वेऽप्यापणस्थस्य तन्न हि॥ १२२१ ॥

शुक्तिरजतस्य दोषप्रयुक्तभानस्य अत एव बाधितस्य। आपणस्थस्य निर्दोषप्रमाणदृष्टस्य अत एव बाधानर्हस्य। स्वव्याहतं च आपणस्थरूप्यस्य बाधवचनम्। तथा हि परभाष्यं 'नैवं जागरितोपलब्धं स्तम्भादिकं कस्यामप्यवस्थायां बाध्यते' इति॥ १२२१ ॥

प्राणत्यागे मृतिर्युक्ता तदत्यागे कथं मृतिः।
बाध्यरूप्यस्य मिथ्यात्वेऽप्यबाध्यस्य
कुतो हि तत्॥ १२२२ ॥

प्राणत्यागेऽपि देहस्य विनाश एव न बाधः। अयं तु विद्यमानेष्वेव प्राणेषु सर्वस्य कालत्रये निषेधं आचष्टे। अहो उन्मादपरिपाक इति भावः॥ १२२२ ॥

शङ्कापिशाची रम्येऽर्थे पिशाचस्यैव केवलम्।
बाधशङ्का जगति चेद्ब्रह्मण्यपि कुतो न सा ॥ १२२३ ॥

शङ्कापिशाची निर्दलशङ्का। अकस्माच्चेद्द्राविबाधशङ्का अकस्मादेव ब्रह्मणोऽपि बाधशङ्का कुतो न कार्येत्याह शङ्केति॥ १२२३ ॥

अर्थज्ञाने ह्यकुशलः किं वाक्येन करिष्यति ।
अकस्मादिति वाक्येन कस्माद्ब्रह्म न बाध्यते ॥ १२२४ ॥

अर्थज्ञाने अकुशलः । आगमोऽपि सम्यक् श्रुतः समयस्मरणानुगृहीतः शाब्दन्यायानुसन्धानसहित एव स्वार्थं बोधयति इति लक्षणस्यानभिज्ञः । अकस्मादिदमाविरासीदिति वाक्ये पूर्वोत्तरविरुद्धं प्रमाणान्तरविरुद्धं चार्थं कल्पयित्वा, ब्रह्मणः कारणत्वमपलप्य शून्यादेव जगदुत्पत्तिः कुतो नोच्यते इति भावः ॥ १२२४ ॥

अबद्धं वदतोऽज्ञस्य किमवाच्यमिहोच्यताम् ।
किं नावादीत्कोऽपि वादी निरधिष्ठानकभ्रमम् ॥ १२२५ ॥

निर्विशेषत्वाच्छून्यवच्छून्यः इति विष्णुसहस्रनामसु शून्यशब्दं ब्रह्मणि सङ्गमयन् अधिष्ठानत्वरूपविशेषस्यापि ब्रह्मण्यनङ्गीकारात् मायिमतेऽपि भ्रमस्यापि निरधिष्ठानत्वमेवेति भावेनाह **कोऽपीति** । मायी शून्यवादी च । तदुक्तं भगवत्पादैः 'न च निर्विशेषब्रह्मवादिनः शून्यात्कश्चिद्विशेषस्तस्य' इति ॥ १२२५ ॥

दुराग्रहगृहीतस्य बुद्धिस्सद्यो विभिद्यते ।
न चेद्ब्रूते कथं हेतुमभावे भावदर्शनम् ॥ १२२६ ॥

अभावे प्रपञ्चमिथ्यात्वे । **भावदर्शनं** दृश्यत्वम् । तदुक्तं वादावल्यां 'दृश्यत्वस्य सन्मात्रवृत्तित्वाद्विरुद्धता चे'ति ॥ १२२६ ॥

उक्तं तु निर्वहेदेवेत्याग्रहोऽग्र्यग्रहो नृणाम् ।
किं न स्वोक्तानृतत्वार्थं वेदमप्यनृतं जगुः ॥ १२२७ ॥

अग्र्यग्रहः श्रेष्ठपिशाचः । नेहनानास्तीति स्वोक्तस्य मिथ्यात्वस्य निर्वाहाय श्रुतिं स्वस्यापि मिथ्यात्वपरां व्याचक्षाणः स्वशिरः स्वयमेव छेत्तारं महापिशाचं अतिशेत इति भावः । तथाहि परवचनं 'न वेदा न वर्णाश्रमाचारधर्माः इत्यादि ॥ ॥१२२७ ॥

कपर्दिकामात्रलब्ध्यै लक्षं त्यजति रूक्षधीः।
न चेन्नीचैक्यलाभाय जगत्सर्वं कथं जहौ ॥ १२२८ ॥

कपर्दिका सर्वप्रमाणबाधितमैक्यम्। लक्षं अनन्तप्रमाणसिद्धं सर्वज्ञत्वाल्पज्ञत्वादिविरुद्धधर्मजातोपलक्षितं सर्वं जगत् ॥ १२२८ ॥

यस्सर्वस्मै सदा द्रुह्येन्नह्येतस्य सुखं भवेत्।
किं मिथ्याश्रुतिरेवान्ते स्वयं मिथ्येति नापतत्॥ १२२९ ॥

महदपकारः कार्त्स्न्येन आत्मन एव प्रतिफलतीति न्यायविषयः परमतं नेहनानेतिश्रुतिरित्याह **य इति** ॥ १२२९ ॥

मिथ्याभिजल्पैरल्पानां शुद्धस्याशुद्धता न हि।
साधिका बाधिका किं स्या-
न्मिथ्या मिथ्यात्ववाग्यदि ॥ १२३० ॥

परवचसां स्वरूपतोऽसत्त्वावगमेन वन्ध्यासुतवचसः इव साधकत्व-बाधकत्वाभावात् शुद्धब्रह्मणो त्रैलोक्यपावनगङ्गापितुर्विष्णोर्नाशुद्धत्वमित्याह **मिथ्येति**। प्रत्युतोभयसंमत्याऽशुद्धत्वस्य मिथ्यात्वेन शुद्धत्वमेव नितरां सेत्स्यतीति भावः ॥ १२३० ॥

मनोरथरथारूढः कोऽर्थो व्यर्थं भवेत्तव।
कः कुर्याच्छुक्तिरूप्येण वलयं कटकानि वा ॥ १२३१ ॥

मनोरथरथः मिथ्याभूतेनापि अर्थक्रियासिद्धिः इति कुकल्पितप्रक्रिया। **क इति** बाधसाम्येन व्यावहारिकस्यापि तन्मते दुर्गत्यापात इति हृदयम् ॥ १२३१ ॥

पुत्रीजननशक्तश्चेन्न पुत्रं जनयेत्कुतः।
रागं चेज्जनयेच्छुक्तिरूप्यं न कटकं कुतः ॥ १२३२ ॥

ननु मिथ्याभूतं शुक्तिरजतं रागं जनयद् दृष्टमिति चेत् भ्रान्तोऽसि। तस्य व्यावहारिकत्वभ्रमेणैव राग इत्युक्तत्वात्। भ्रमश्च बाधाभावात्सत्य एवेति भावः। तदुक्तं भगवत्पादैः 'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम्। तदेवार्थक्रियाकारि तत्सदेवार्थकारकमि'ति ॥ अन्यथा अतिप्रसङ्गमाह। **कटकं इति**। नपुंसकस्य न पुत्रीजननं नापि पुत्रजननं इति भावः ॥ १२३२ ॥

राज्ञा प्रत्यक्षतो दृष्टस्याक्षेपी शिक्ष्यते नरैः।
यथेशदृष्टमिथ्यात्ववादो वेदोऽप्यपोद्यते ॥ १२३३ ॥

'सर्वापरोक्षविद्विष्णुर्विश्वदृक् तत्र तन्मृषा' इति भगवत्पादोक्तिमनुरुध्याह **राज्ञ इति। प्रत्यक्षतो दृष्टस्य** प्रकाशतस्करत्वस्य **आक्षेपी** दोषद्वयभाक् तस्करत्वं राजदृष्टापलापेन राज्ञो मिथ्याभाषित्वापादनं चेति। **नरैः** वायुभटैः ईश्वरे भ्रान्तत्वापादिनः मायावादिनः तृतीये तमसि उग्रशिक्षा इति ध्वन्यते ॥ १२३३ ॥

गुरोरगुरुतां ब्रूते लघोरलघुतां खलः।
भ्रान्तिस्तात्कालिकी भ्रान्ति-
र्दीर्घभ्रान्तिः किल प्रमा ॥ १२३४ ॥

'सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी' इति गीतोक्ततामसबुद्धेर्लक्षणं मायावादिबुद्धौ अवच्छेदकावच्छेदेन श्लिष्टतया समन्वेतीति निदर्शनैः दृढयति **गुरोरिति** दीर्घभ्रान्तेः वियदादिविषयिण्या अगुरुतां भ्रान्तिभिन्नप्रमाया इव व्यवहारनिर्वाहकवस्तुविषयकत्वम्। लघोः तत्कालीनाया ब्रह्मप्रमाऽन्येन बाध्याया शुक्तिरूप्यादिविषयिण्या भ्रान्तेस्तु व्यवहारानिर्वाहकत्वेन प्रातिभासिकत्वं इति वैपरीत्यं मायिबुद्धेरित्याह **भ्रान्तिरिति** ॥ १२३४ ॥

उष्ट्रः कण्टकमेवात्ति पक्वं न क्वापि भक्षयेत्।
श्रुतिः श्रौतार्थसत्यत्वत्यागि मिथ्यात्वरागि तत् ॥ १२३५ ॥

श्रुतिः नेहनानास्तीत्यादिका। **श्रौतं** स्वरसलभ्यं **अर्थसत्यत्वं** स्वगतभेदराहित्येन सर्वरूपेषु परिपूर्णसत्यगुणवत्त्वलक्षणं भगवन्महिमानं त्यक्त्वा

कण्टकं जगत्कण्टकं तन्मिथ्यार्थरूपं अर्थमेव वक्तीति ब्रुवाणः अमृते विषवद्धेयत्वं विषे चामृतवदुपादेयत्वं इति बुद्धेः वैपरीत्यं स्फोरयतीति भावः। उष्ट्रेण कण्टकमात्रमपि लभ्यते। अस्य मिथ्यात्वे आशामात्रम् न लाभः। अत उष्ट्रादपि निकृष्ट इति भावः ॥ ११३५ ॥

रसार्थी श्वा गृहीत्वास्थिदन्तैरन्तर्निकृन्तति।
यथार्थिकार्थमिथ्यात्व-
व्यर्थार्थोऽर्थं कुयुक्तिदृक् ॥ १२३६ ॥

अन्यदपि विपरीतार्थग्राहित्वं मायिबुद्धेर्निदर्शयति **रसार्थीति।** अखण्डैकचैतन्यरसरूपं श्रुत्यर्थमर्थयमानः। अन्यत्र रुधिरार्थी। गृहीत्वा अहं कर्ता इत्यादि पदद्वयेन। अन्यत्र चरणाभ्याम्। **दन्तैः** युष्मदस्मत्प्रत्ययगोचरयो-रित्याद्यध्यासवाक्यैः। अन्यत्र स्पष्टम्। **निकृन्तति** 'अन्योन्यस्मिन् अन्योन्यात्मकतां अन्योन्यधर्मांश्चाध्यस्य' इति अध्यासवर्णनेन विरुद्धधर्मान् भागत्यागलक्षणमाश्रित्य मुख्यार्थात्प्रच्यावयति। निकृन्ततीत्यनेनास्य दुरुपक्रममात्रं न तु कार्यसिद्धिः। निरवकाशश्रुतिसाक्षिसिद्धानां मिथ्यात्वायोगात्। अन्यत्र अस्थिचर्वणेऽपि न रसलाभ इति भावः। **आर्थिकार्थः** ज्ञान निवर्त्यत्वान्यथाऽनुपपत्त्या लब्धः। **व्यर्थार्थः** मिथ्यात्वरूपः। उपपाद्यस्य अन्यथैव सिद्धेः अप्रमितत्वेन च, उपपादकस्य च प्रमाणविरुद्धत्वेन, विगतप्रयोजनः विरुद्धप्रयोजनश्च। अन्यत्र शुष्कास्थिभक्षणेन रसालाभः दन्तभङ्गेन विरुद्धप्रयोजनः। **कुयुक्तिदृक्** प्रसादं विना साक्षाज्ज्ञानेनैव बन्धनिवृत्तिः, ज्ञानमज्ञानस्यैव निवर्तकम्। बन्धस्य अज्ञानोपादानकत्वं, सूत्राणां ऐक्ये तात्पर्यं इत्यादि कुयुक्तयः। स्वव्याहतं च परोक्तं सूत्राणां ऐक्यपरत्वाभिधानम्। स्वयमेव भाष्ये द्वित्राणि सूत्राणि विहाय अन्येषां सर्वेषां भेदपरत्वं इति भाषितत्वात्। द्वित्राणामपि विशिष्टैक्यासंभवेन चिदैक्यस्य च अखण्डार्थपरवाक्यार्थत्वासंभवेन च, अभेदपरत्वासंभवात्। यथा चैतत्तथा निपुणतरमुपपादितं अभिनवानन्दतीर्थेति प्रथावद्भिः श्री सत्यध्यानतीर्थश्रीचरणैः 'भेदपराण्येव खलु ब्रह्मसूत्राणि' इति स्वग्रन्थे। विस्तरस्तत्रैव ॥ १२३६ ॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका ।
विश्वसौरभसर्वस्वमथ विष्णौ न्यवेदयत् ॥ १२३७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वादिराजतीर्थश्रीपाद-विरचितायां श्रीमद्युक्तिमल्लिकायां विश्वसौरभं संपूर्णम् ॥ ४ ॥

समर्पणं शास्त्रोक्तप्रकारेण विदधाति **वादिराजाख्येति** । आख्या इति प्रयोगेण स्वस्य वादिराज इत्यभिधानं स्वगुरुणाऽख्याततत्वेन न केवलं रूढ्या, किन्तु 'वादी मध्वो राजा यस्ये'ति अन्यत्र स्वयमेव व्युत्पादिततत्वस्यानुसारेण योगेन चेति स्वनाम्नो योगरूढत्वं प्रदर्शितम् । **साधिता** रचिता । यद्वा प्रसन्नीकृता युक्तिमल्लिकाग्रन्थाभिमानिनी सकलवचनचेतोदेवता भारती । तेन समर्पणक्रियायां भारत्या एव कर्तृत्वं, तस्या एव समर्पणे योग्यता च ज्ञापिता । **विश्वसौरभसर्वस्वं** विश्वनामकविष्णोः सत्याशेषजगज्जन्मपूर्वकर्तृत्वं सौरभं गुणपूर्णत्वादिमहिम-स्थापकम् । विश्वसत्यत्वस्थापनेनात्मना समासादितं सुकृतम् । **अथ** भेदसौरभसर्वस्वसमर्पणानन्तरं, इति, स्वरमणमुख्यप्राणे समर्पणानन्तरं तद्द्वारैव इति च अर्थः । अनन्तरं करिष्यमाणं फलसौरभमपि तत्पूजात्वेन सङ्कल्पयामासेति चार्थः । 'एष्यत्तु निश्चितं' इति न्यायेन लङ्प्रयोगः । ग्रन्थान्त्येऽपि मङ्गलस्यानुष्ठेयत्वेन अथशब्दो मङ्गलप्रयोजनकश्च इत्यशेषमतिमङ्गलम् ॥ १२३७ ॥

यत्कृपालेशमाश्रित्य लब्धात्मेयं कृतिर्मम ।
समर्पयन्तु तां विष्णौ सत्याभिज्ञगुरूत्तमाः ॥

श्रीकृष्णार्पणमस्तु ॥

